अष्टादशपुराणेषु श्रीजगन्नाथः

डॉ० काह्नुचरणपण्डा

PURUSOTTAM RESEARCH ACADEMY OF INDOLOGY
PURI, ODISHA

अष्टादशपुराणेषु श्रीजगन्नाथः

डॉ० कान्हुचरणपण्डा
पुराणविभागः,
रामाधीनसंस्कृतमहाविद्यालयः,
ब्रह्मपुरम्, गञ्जाम, ओडिशा

ASTADASA PURANESU SRI JAGANNATH

Published by.
Purusottam Research Academy of Indology, Puri

First Edition : 2000

Reprint : 2011

500 Copies

@ By the Author

Available at :
Samvidi, 15, Mahodadhi Market, Puri-752001
Sadgranth Niketan,
Sri Jagannath Temple, Puri-752001, Odisha (India)

Printed at :
Sri Narayan Press, Balisahi, Puri-752001

Price : Rs. 200/-

अष्टादशपुराणेषु श्रीजगन्नाथ:

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानप्रकाशित:

प्रथमप्रकाशनकाल: -२०००

पुनर्मुद्रणेन प्रकाशनम्- २०११

ग्रन्थकर्त्रा सर्वस्वत्वं संरक्षितम्

प्राप्तिस्थानम् -

सांविदी, १५, महोदधि मार्केट, पुरी-७५२००१

सद्ग्रन्थनिकेतनम्, श्रीजगन्नाथमन्दिरम्, पुरी-७५२००१

मुद्रणम्-

श्रीनारायणप्रेस्

वालिसाहि, पुरी

मूल्यम् - रू० २००/-

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम् , पुरी
Purusottam Research Academy of Indology,
Sarvodaya Nagar, Puri-752002 (Orissa)

प्रकाशकीयम्

बुद्धिमत्सु जीवेषु मनुष्य: श्रेष्ठ: । निरन्तरं सत्त्वानुसन्धानं तस्य कर्त्तव्यम् । ततो भावाभिव्यक्ति: । ततश्च सद्ग्रन्थविरचनम् । यथाकालमुद्यमेन हि तस्य प्रकाशनम् । सर्वमेतत्तु भगवदायत्तम् । परब्रह्म-शब्दाभिधेय: श्रीजगन्नाथ: एव साक्षी, कर्मसु प्रेरयिता । "अष्टांदशपुराणेषु श्रीजगन्नाथ:" इति शोधग्रन्थ: डॉ० काह्नुचरणपण्डामहोदयेन विरचित: । ग्रन्थोऽयमनुत्तम: । श्रीजगन्नाथपुरीस्थं पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम् एतस्य ग्रन्थस्य पुनर्मुद्रणं कृत्वा अधुना प्रकाशयति इति आनन्दस्य विषय: । शोधग्रन्थप्रकाशनमिदं प्रतिष्ठानस्यास्य प्रथमं पुष्पम् ।

प्रकाशनमिदं जगज्जनकल्याणाय भवतु इति नीलाद्रिनाथ-श्रीजगन्नाथचरणकमलेषु विनिवेदनम् । इति ।

विदुषां विधेय:
डॉ० विश्वनाथस्वाईँ
महासचिव:
पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम्
पुरी, ओडिशा

माघपूर्णिमा
१८.२.२०११ तारिका

पण्डितश्रीगणेशप्रसादत्रिपाठिशर्मा
प्राचार्यः, रामाधीनसंस्कृतमहाविद्यालयः, ब्रह्मपुरम्
गञ्जाममण्डलम्, ओडिशा ।

प्रशस्तिषट्कम्

"नागेन्दुसङ्ख्येषु पुराणकेषु
श्रीमज्जगन्नाथ" इति प्रसिद्धः ।
शोधस्य साक्षाद्विषयोऽस्ति यस्य
सोऽयं तमेवं जगदीश्वरेऽव्यात् ।।१ ।।
नीलाद्रिसंचारिहरिर्मुरारि-
र्भक्तार्त्तिनाशाय सदा धृतारिः ।
श्रीकाह्नुपण्डाख्यबुधं स शौरिः
पायात्प्रभुश्रीकमलाविहारी ।।२ ।।
लोकाय भद्रार्पणसिद्धहस्तो
भद्रानुजोऽयं सततं सुभद्रः ।
दत्वा च तस्मै पुरुषार्थवर्गं
पण्डागृहं तद् विदधातु पूतम् ।।३ ।।
शोधस्य शुद्धं विषयं विधाय
प्रत्यक्षमानेतुमिह प्रयासः ।
यस्यास्ति गोविन्दकृपाकटाक्षात्
जेजीयतां पण्डितवर्यरिषः ।।४ ।।
पौराणिकं भागवतं महत्वं
योगीन्द्रयोगेन सदा हि गम्यम् ।
तस्यापि शोधं यदि कोऽपि कुर्यात्
धन्यो न किं स्याद्धरिकीर्त्तनेन ? ।।५ ।।
शोधस्य सन्दर्भ इह प्रकाशं
प्राप्तेति वार्त्तां मुखतो निशम्य ।
सानन्दमेवं हृदयं मदीयं
सूदर्कपूर्णं सुखमिच्छतीदम् ।।६ ।।

******

पुनर्मुद्रणस्य प्राक्कथनम्

"जगन्नाथस्वामी नयनपथगामी भवतु मे ।"

करुणावरुणालयस्य श्रीजगन्नाथस्य तत्त्वं प्रतिपादयितुं यथामति प्रयत्नं कुर्वता अकिञ्चनेन मया "अष्टादशपुराणेषु श्रीजगन्नाथः" इत्यभिधेयः शोधग्रन्थः विरचितः । भारतसर्वकार-राष्ट्रियसंस्कृतसंस्थानस्य आंशिकवित्तसहायतां प्राप्य अयं ग्रन्थः २००० तमे ख्रीष्टसम्बत्सरे प्रथमतया प्रकाशितः । अधुना एतस्य प्रतिः सुलभा न भवति । अतः विद्वद्‌जनानाम् आवश्यकताम् अनुभूय अस्य ग्रन्थस्य पुनः प्रकाशनार्थं मया "प्राची" - इत्यभिधेयस्य पुरीस्थस्य पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानस्य प्रबन्धसमितिः अनुरुद्धा । अस्य ग्रन्थस्य विरचने येषां परमसहायता मया लब्धा, अधुना चापि लभ्यते तेभ्यः आचार्येभ्यः डॉ० विश्वनाथस्वाईँ महोदयेभ्यः हार्दिकी कृतज्ञता विनिवेद्यते । ग्रन्थोऽयं सर्वेषाम् उपकाराय भवतु इति श्रीजगन्नाथमहाप्रभुचरणकमलेषु मदीया प्रार्थना ।

विदुषामनुचरः

बाहुचरण पण्डा

श्रीपञ्चमी

ता० ८-२-११

पुराणविभागः,

रामाधीनसंस्कृतमहाविद्यालयः

ब्रह्मपुरम्, गञ्जाममण्डलम्, ओडिशा

मोवाइल् - ०९४३७६१६७५१

पुरुषोत्तमप्राच्यविद्याशोधप्रतिष्ठानम् , पुरी
Purusottam Research Academy of Indology,
Sarvodaya Nagar, Puri-752002, Odisha, Ph. 06752-250588

Prof. A.C. Sarangi
Former Vice-Chancellor,
Shree Jagannath Sanskrit Vishvavidyalaya, Puri.
President
Dt. 8.02.11

FOREWORD

Purusottam Research Academy of Indology "PRACI" established at Puri, Odisha (India) is an institute dedicated for spreading the unique culture of humanity. Sanskrit being the life-force of the ancient cultural heritage, this institute is publishing works related with our heritage in sanskrit. Now it is my great pleasure that Purusottam Research Academy of Indology "PRACI", Puri is publishing a treatise entitled "Aṣṭādaśa Purāṇeṣu Śrī Jagannāthaḥ" written by Dr. Kanhu Charan Panda, an erudiate scholar serving as a faculty member in the Deptt. of Puranetihasa, Ramadhin Sanskrit College, Brahmapur in the state of Odisha. This book was published first with the financial assistance from the Rashtriya Sanskrit Sansthan, Ministry of Human Resource Development, Govt. of India. In the meantime all the copies of the book are exhausted. Sri Jagannatha Dharma is elaborately described in this book based on Vedic and Puranic sources. I hope this publication will help researchers and scholars working in the field of religion and philosophy.

I pray Lord Sri Jagannatha for the success of this publication.

Asarangi

President
Purusottam Research Academy of
indology "PRACI", Puri, Odisha, India.

भूमिका

ॐ नीलाचलनिवासाय नित्याय परमात्मने ।
बलभद्रसुभद्राभ्यां जगन्नाथाय ते नमः ।।

करुणावरुणालयनीलाचलनाथं भगवन्तं श्रीजगन्नाथदेवमाधारीकृत्य विद्वज्जनैः विविधभाषानिवद्धाः बहवः प्रबन्धः ग्रन्थाश्च प्रतिपादिताः । तत्र संस्कृतभाषानिबद्धसन्दर्भाणां नितराम् अभावं परिलक्ष्य पुराणानामबलम्बनेन 'अष्टादशपुराणेणु श्रीजगन्नाथः' इति गवेषणामूलकसन्दर्भोऽयं रचितः ।

श्रीजगन्नाथतत्त्वसम्बलितः सन्दर्भोऽयं संस्कृतवाङ्मये प्रथमः प्रयास इति मन्ये । एतद्विषये अन्यभाषारचितेषु सन्दर्भेषु यानि यानि तथ्यानि प्रतिपदितानि सन्ति तेषामेव विचारपुरःसरं स्वकीयभावनासम्पुटः सरलः भावगम्यश्चायं सन्दर्भः उपन्यस्तः ।

चतुर्षुः परिच्छेदेषु विभक्तोऽयं सन्दर्भः । तत्र प्रथमपरिच्छेदे भारतीयसंस्कृतेः आलोचनावसरे मूर्त्तिपूजायाः विकाशधारा तथा च भारतीयसंस्कृतेः मूलाधारत्वेन प्रसिद्धानामष्टादशपुराणानाम् उत्पतिविभाजन-कालादिविशयाः प्रतिपादिताः सन्ति । तदनन्तरम् उत्कलप्रदेशस्य पौराणिकप्रसिद्धिविषये सम्यक् सूचना दत्ता । अनन्तरं श्रीजगन्नाथदवस्य पृष्ठभूमिविषयकज्ञानलाभार्थं सवर-जैन-वौद्ध-प्रभृतिधर्मसम्प्रदायानां सिद्धान्ताः प्रदर्शिताः ।

द्वितीयपरिच्छेदे चतुर्थसब्दीत आरभ्य अधुना यावत् श्रीजगन्नाथमन्दिरस्य संक्षिप्तेतिहासः लौकिक-वैदिक-साहित्ययोः पुरुषोत्तमजगन्नातस्य स्वरूपतत्त्वञ्चेति प्रदर्शितम् । तत्र विभिन्नशीलालेखानां तथा च इतिहाससिद्धान्तानां विचारच्छलेन जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनदेवतानां मूर्त्तितत्त्वानां विशिषमालोचनं कृतम् । ततः पौराणिकदृष्ट्या अत्र प्रचलितपूजाविधिप्रदर्श्य हिन्दूसाम्राज्ये नृपाणामुपरि जगन्नाथचेतनायाः प्रभावः वर्णितः । तदवसरे यीषु-नानक-सङ्कराचार्य-चैतन्यप्रभृतयःधर्मप्रचारकाः केनभावेन जगन्नाथचेतनया प्रभाविताः तत्प्रदर्श्य संस्कृतभाषायां उत्कलीयकविभिः रचितजगन्नाथस्तुतिविषयकतथ्यं विदूषां पूरतः उपन्यस्तम् ।

तृतीयपरिच्छेदे ब्रह्मा - स्कन्द - नारद - पद्मादिपुराणानुसारं

श्रीजगन्नाथदेवस्य तत्त्वसकलमालोचितम् । तत्र द्वादशयात्राविधिवर्णनया साकं सम्प्रति पालितानामन्यासां यात्राणां वेशादीनां तथा च पुरुषोत्तमक्षेत्रस्य भोगोलिकस्थितेः पुरुषोत्तमक्षेत्रस्य माहात्म्यस्य च वर्णना संक्षेपेण कृता ।

चतुर्थपरिच्छेदे उपसंहारः कृतः ।

"भीमस्यापि रणे भङ्गो मुनेरपि मतिभ्रमः" इत्युक्ति दिशा प्रस्तुतग्रन्थेऽस्मिन् अकिञ्चनस्यास्य मम कदाचित् त्रुटिः परिलक्षिताः भवेत् । सुधिभिः सौजन्यावतारैः श्रीजगन्नाथदेवभक्तैः ताः संशोध्य पठितव्याः इति मदीयप्रार्थना ।

ग्रन्थस्यास्य प्रतिपादने येषां मार्गदर्शनं मया स्वीकृतं तेषामस्माकं गुरुपादानां दिवंगतानां पण्डितश्रीसोमनाथदाशशर्मणमाशीर्वादं सर्वदाऽहं कामये । पुरीस्थश्रीसदाशिवकेन्द्रीयसंस्कृतविद्यापीठस्य लब्धावसरैः अङ्ग्लभाषाद्यापकैः मदीयगुरुचरणैः श्रीप्रशन्नकुमारमिश्रशर्मभिः अहं कर्मण्यस्मिन् सर्वदा प्रचोदितः । श्रीजगन्नाथवेदकर्मकाण्डमहाविद्यालयस्य धर्मशास्त्रविभागाध्यापकैः डॉ० विश्वनाथस्वाईँ महोदयैः ग्रन्थस्यास्य सम्पादनकर्मणि सर्वाधिकसाहाय्यं प्रदत्तम् । ब्रह्मपुरस्थरामाधीनसंस्कृत-महाविद्यालयस्य प्राचार्यैः श्रीगणेशप्रसादत्रिपाठिशर्मभिश्च एतत्कर्म-सम्पादनार्थमहं सर्वदा उपदिष्टः । एतस्मात् एतेभ्यः सर्वेभ्यः मम हार्दिकीं कृतज्ञतां विनिवेदयामि ।

दिल्लीस्थराष्ट्रियसंस्कृतसंस्थानस्य कतृपक्षैः ग्रन्थस्यास्य प्रकाशनार्थं वित्तसहायता प्रदत्ता इति हेतोः ते धन्यवादार्हाः ।

त्वदीयवस्तु गोविन्द ! तुभ्यमेव समर्प्यते ।

भगवान् श्रीजगन्नाथदेवः स्वविषयस्य आलोचनात्मक-कर्मण्यऽस्मिन् नितरां तृप्तः सन् करुणाशीर्वादेन मम अभीष्टसिद्धिनिमित्तं समुचितविधानं करोतु इति सम्प्रार्थ्य विरमामि । इति ।

विदुषामनुचरः

काह्नुचरणपण्डा

पुराणविभागाध्यापकः,

रामाधीनसंस्कृतमहाविद्यालयः,

ब्रह्मपुरम्, गञ्जाममण्डलम्,

ओडिशा ।

श्रीगणेशचतुर्थी

ता० १.०९.२०००रिका

विषयसूची

विषया:		पृष्ठाङ्का:
प्रथमपरिच्छेद:		
१.	भरतीयसंस्कृते: परिचय:	१-८
२.	पुराणानां परिचय:	८-१३
३.	इतिहासपुराणयोर्मध्ये पार्थक्यम्	१३-१७
४.	पुराणानां लक्षणानि	१७-२३
५.	पुराणानां प्रकारकल्पनम्	२३
६.	पुराणानां संख्या	२४-२७
७.	पुराणानां वर्गीकरणम्	२७-२९
८.	पुराणानां काल:	२९-३४
९.	उत्कलानां पौराणिकी प्रसिद्धि:	३४-३९
१०.	उत्कलीयसंस्कृतौ जदन्नाथधर्म:	३९-४१
	(क) शावरसंस्कृतौ जगन्नाथ:	४१-४७
	(ख) जैनसंस्कृतौ जगन्नाथ:	४७-५२
	(ग) बौद्धसंस्कृतौ जगन्नाथ:	५३-५८
	(घ) तन्त्रेषु जगन्नाथ:	५८-६०
	(ङ) वैष्णवधर्मे जगन्नाथ:	६०-६५
द्वितीयपरिच्छेद:		
११.	जगन्नाथसंस्कृते: संक्षिप्तेतिहास:	६६-८०
१२.	वैदिकलौकिकसाहित्ययो: जगन्नाथ:	८०-८८
१३.	पुरुषोत्तमतत्त्वम्	८८-९४
१४.	मूर्त्तिकल्पनम्	९४-१०१
	(क) श्रीजगन्नाथतत्त्वम्	१०१-११३
	(ख) श्रीबलभद्रतत्त्वसमीक्षा	११३-१२१
	(ग) सुभद्रातत्त्वम्	१२१-१३३
	(घ) सुदर्शनतत्त्वम्	१३३-१३६

विषयाः	पृष्ठाङ्काः

१५. पूजाविधिः १३६-१४४

१६. हिन्दुसाम्राज्ये श्रीजगन्नाथचेतनायाः प्रभावः १४४-१५३

तृतीयपरच्छिेदः

१७. श्रीजगन्नाथतत्त्वप्रतिपादितानि पुराणानि १५४

(क) ब्रह्मपुराणम् १५४-१५६

(ख) स्कन्दपुराणम् - उत्कलखण्डः १५६-१५८

(ग) पद्मपुराणम् १५८-१५९

(घ) नारदपुराणम् १५९-१६०

(ङ) गरुडपुराणम् १६०-१६१

(च) मत्स्यपुराणम्

१६१-१६२

(छ) अग्निपुराणम् १६२-१६३

(ज) वामनपुराणम्

१६३-१६५

(झ) कूर्मपुराणम् १६५

(ञ) विष्णुपुराणम् १६५-१६७

१८. श्रीजगन्नाथतत्त्वप्रतिपादकानां पुराणानां विश्लेषणम् १६७-२१८

१९. द्वादशयात्राविधिः २१९-२३५

२०. पुरुषोत्तमक्षेत्रस्य माहात्म्यम् २३५-२३७

२१ पुरुषोत्तमक्षेत्रस्य भौगोलिकस्थितिः २३७-२४२

चतुर्थपरिच्छेदः

२२. उपसंहारः २४३-२५४

२३. सहायकग्रन्थसूची २५५-२६१

***

प्रथमपरिच्छेदः

भारतीयसंस्कृतेः परिचयः-

जगद्वन्द्यनीलाचलमणिमुकुटायमानपुरुषोत्तमविष्णुत्वेन परिप्रकाशमानस्य श्रीजगन्नाथदेवस्य प्रसङ्गालोचनावसरे तद्देवेन साकमोतप्रोतभावेन संश्लिष्टा सती समग्रपृथिव्यां या खलु श्रीजगन्नाथ-संस्कृतिरिति प्रसिद्धिं लभते तस्याः उद्भवस्य मूलरूपं सर्वादौ उपस्थापनीयमिति कर्त्तव्यताच्छलेन भारतीयसंस्कृतिः मुख्यतः अवतारणीया इति मनसि निधाय तस्याः विकाशविस्तारार्थं परिपोषकत्वेन समुचितमन्यमानानां वस्तुजातानां समावेशः प्रेक्षावतां पुरतः क्रियते ।

'सा संस्कृतिर्विश्ववारा' इत्यस्मदीयसर्वस्ववेदवचनानां[1] विदुषां पुरतः सदुपयोगकरणावसरे मनसि स्वतः प्रश्नो जागर्त्ति, का सा संस्कृतिः, या खलु विश्ववारेति ? विषयेऽस्मिन् ब्राह्मणग्रन्थेषु स्थलविशेषे विचाराः प्रवर्त्तते तस्य व्याख्यानं नाद्यावधि कुत्रापि सम्यक्तया जातमिति वदन्ति विपश्चितः । संस्कृतिशब्दस्य विभिन्नेषु प्रसङ्गेषु व्यावहारो विद्यते । तथापि साम्प्रतमस्मिन् प्रसङ्गे केयं संस्कृतिः इति सोपपत्तिकं विविच्यते । सभ्यतासंस्कृतिशब्दयोः व्यवहारो लोके प्रायशः सहैव भवति । परन्तु अनयोर्वर्त्तते कश्चन अर्थभेदो न वेति साम्प्रतं विभिन्नमतोपस्थापनपूर्वकमालोच्यते ।

सम् इति उपसर्गयुक्त 'कृ' धातो क्तिन्प्रत्यये संस्कृतिरिति शब्दो निष्पद्यते । अत्र सम् इत्युपसर्गः आवहमानकालात् निरवच्छिन्नभावेन परम्परानुरोधेन च संघटितं व्यापारजातमिति बोधयति । मानवसमाजस्य कालानुसारम् अवस्थानुसारं वा विविधाः व्यवस्थाः

---

१. "अच्छिन्नस्य ते देवा सोम सुवीर्यस्य रायस्पोषस्य ददितारः स्याम ।
सा प्रथमा संस्कृतिर्विश्ववारा स प्रथम वरुण मित्रो अग्निः ॥"
- शुक्लयजुर्वेदे - ७/१४ ।

अत्र संस्कृतिशब्दे अन्तर्भुक्ता भवन्ति । तस्मादत्र परिवेशः सभ्यतापदेन व्यपदिष्टुं शक्यते इति यदि कैश्चित् तर्क्यते तर्हि इदमेव प्रतिपादयितुं युज्यते यत् मानवसमाजस्य सभ्यता तत्रत्यसुशिक्षितपरिवेशात् एव मूलतः केन्द्रीकृत्य सञ्जायते । एतद्विषये पण्डितश्रीरामजीउपाध्यायानां[२] मतं सुरुचिरमेव ।

अत्र सभ्यता सभ्यपरिवेशानुरोधेन अवश्यमेव तात्कालिकीति नास्ति काचित् विचिकित्सा, प्रत्युत प्रतियुगं सुसभ्यपरिवेष्टन्याः अनुरोधेन सिन्धुसभ्यता-रोमसभ्यता-महेञ्जोदारसभ्यताप्रभृतिवत् नूतनसभ्यतायाः सृष्टिः सम्भवेत् इति कथयितुं शक्यते । किन्तु संस्कृतिस्तु सभ्यतातः भिन्ना विलक्षणसम्पन्ना च । संस्कृतिः मानवसमाजस्य निरवच्छिन्नाऽऽचरणगतपरम्परा एव । तन्मध्ये कासाञ्चन सभ्यतानामपि उद्भवविकाशविलोपाः सम्भवेयुः । अतः संस्कृत्या इतिवृत्तमित्यर्थकरणेन प्रायशो नास्ति दोषः । संस्कृतिः तामेव कथयितुं शक्यते यद्द्वारा तदानीन्तनसमाजस्य आचारव्यवहारादयः तत्कालीनलोकसाहित्ये प्रतिफलिताः भवन्ति । लोकभाषया निबद्धग्रन्थः एव साहित्यं, यत्र तत्कालीनसमाजस्य आचारव्यवहारौ धर्मविषयकपुङ्खानुपुङ्खवर्णना समालोचनमूलकतथ्यसकलं च कविलेखकप्रभृतीनां भावधारयैव परिस्फुटितानि भवन्ति । संस्कृतेः रूपं कालानुसारेण समयानुक्रमेण च भिन्नतां प्राप्नोति यथा वैदिकोपनिषद्-ब्राह्मणारण्यकसंस्कृतिरिति । एषा संस्कृतिः सार्वजनीना वैयक्तिकी वा भवतु अनया सह मानवसमाजस्य विकाशः परिलक्ष्यते । इत्थमेतत् सुस्पष्टं प्रतिपादितं रामजीउपाधायैः[३] ।

---

२. "सभायां साधुरिति सभ्यः । तस्य भावः सभ्यता । कस्यापि मानवस्य समाजस्य वा तान् गुणान् अधिकृत्य सभ्यता जायते, यैस्ते समाजस्य संघटनं कुर्वन्ति, परस्परं सम्बर्धयन्ति, सौहार्दं सहिष्णुतां च दर्शयन्ति । इत्थं सभ्यतापदेन मानवस्य सर्वोच्चगुणाः सामस्त्येन व्यक्ताः भवन्ति ।"

-भारतस्य सांस्कृतिकनिधिः (रामजीउपाध्यायकृतः) - पृ०- १२ ।

३. "संस्कृतिस्तु कस्मिंचिदपि वस्तुनि सर्वोच्चयोग्यतायाः आधानमेव संक्षेपेण भवति । मानवीयसंस्कृत्याः व्यक्तित्वस्य विकाशः परिलक्ष्यते । किन्तु तेन विकाशेन सार्वजनिकं कल्याणं भवति न वेत्यनिश्चितमेव ।

भारतीयविद्याभवनस्य व्याख्यानमालायां योगदानं कृत्वा चक्रवर्त्ति-राजगोपालाचार्यमहोदयैः[४] तावत् देशजातिभेदेन संस्कृतिः भिन्ना भवति तथा च एकजातितः अपरजातिं प्रति या खलु प्रसरति सा संस्कृतिरिति उररीकृतम् । एतत् सहकारेणापि तैः स्वकीयसंयमस्य प्रमुखतया उपस्थापनं कृतमस्ति यत् विजयान्वितम् आत्मसंयमनं संस्कृतिरिति[५] । राजगोपालाचार्यमहोदयानामुक्तिरियं बहुप्रशंसिता विजयलक्ष्मी-पण्डितमहाभागाभिः[६] । सर्वेषामेतेषां मतानामुपरि विलक्षणसम्पन्न-मुत्कृष्टसिद्धान्तमूलकं मतं प्रदाय उत्कलभाषानिबन्धग्रन्थः एकः रचितः

कल्याणकारीत्वं च संस्कृतेः सभ्यतायां सञ्जायते । कोऽपि वैद्यराजः-प्राप्तविद्यः संस्कृतोऽपि यदि रोगिणामार्थिकशोषणं करोति तर्हि सोऽसभ्य एव ।''

-भारतस्य सांस्कृतिकनिधिः (रामजीउपाध्यायकृतः) - पृ०- १२ ।

४. The "Culture on which I shall attempt to say something is he sometotal of the way of living built up by groups of human beings and transmitted from one generation to another. people each with their own long history built up separate patterns of cultures. There in much that is common, but also a great deal that is particular to each nation."

-Our Culture, P.1

५. "Indeed, it may be truly said that culture is the habit of successful self-control and that nothing that reduces self-control or which does not held self-control is culture."

- Ibid - P.6

६. "In three lectures contained in this book Rajaji has drawn upon his vast knowledge and explained the sources of our culture. He defines culture as "the habit of sucessful self-control". Afer the needs of the body and the mind have been met, culture is the third demision lends deapth to man's personality.

The principal value that have been eroded through the vicissitudes of centuries. But they have persisted and will continue to do so. I may say that our culture is the one silver thread that gleams unbroken all through the vista of our history and substained our nation in its many hours of travail. Povidence has posed one such challange to our value and the way of living just now. It is doubtly appropriatly,

पण्डितनीलकण्ठदाशमहाभागैः[७]। संस्कृतं विना संस्कृतेः स्थितिरसम्भवा । अतः भारतवर्षस्यास्माकं प्रतिष्ठायाम् उभयोः अनयोः कारणत्वं विपश्चिद्भिः स्वीक्रियते[८] । संस्कृतसंस्कृत्योरुभयोः परस्परं परिपुरकावस्थितिं विज्ञाय स्थलविशेषेऽपि उभयोः साम्यं प्रकल्प्य राजगोपालाचार्यमहोदयाः सीतारामयोः पारस्परिककथनसम्बन्धि-रामायणीयवचनमुद्धाट्य[९] इदमेव प्रतिपादयन्तीति विदन्ति विद्वांसः। इत्थं भारतीयसंस्कृतेः परिचायकत्वेन या खलु गीर्वाणवाणी संस्कृतभाषा प्रसिद्धा तद्भाषानिबद्धग्रन्थेषु वेदानां सर्वप्राथम्यं स्वीकृतं सर्वैः । 'ऋग्यजुसामाथर्वभेदेन वेदाः चत्वारः प्रसिद्धाः । अनन्तरं समसामयिकपरम्परानुक्रमेण वेदार्थसरलीकरणाय ब्राह्मणारण्यकोपनिषदां तथा सूत्रग्रन्थस्मृतिपुराणेतिहासानां रचना जातेति ऐतिहासिकसिद्धान्तः सर्वजनगोचरीभूतः एव । एवंप्रकारेण भारतीयसंस्कृतिपरम्परायाः व्यापकत्वात् ताम् एकस्मिन् निर्दिष्टपरिसीमामध्ये आकलयितुं न शक्नुमः ।

भारतवर्षे प्रतिष्ठितसांस्कृतिकक्षेत्रेषु उत्कलप्रदेशः मूर्द्धन्यतमः । उत्कलेषु प्रसिद्धिं गतानां लिङ्गराज-कोणार्क-पुरुषोत्तमप्रभृतीनां सांस्कृतिकक्षेत्राणां मध्ये पुरुषोत्तमक्षेत्रमेव भारतीयसंस्कृतौ विशिष्ट-स्थानं प्राप्य [१०]सर्वधर्मसमन्वयक्षेत्रत्वेन प्रसिद्धिं प्राप्नोति । विलक्षणसम्पन्नोऽयं भगवान्पुरुषोत्तमश्रीजगन्नाथः कालानुसारेण

---

therefore that one of our distinguished contemporaries should have taken time and efforts to remind us of our heritage and summon us to stand true to its essentials and varities."

-Foreward of 'Our Culture' by : Bijaylaxmi Pandit

७. संस्कृत ओ संस्कृति - पण्डित नीलकण्ठ दाश ।

८. "भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा ।"

९. "किं मामसदृशवाक्यमीदृशं श्रोत्रदारुणम् ।
रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव ॥"

१०. (क) "सर्वेषामपि क्षेत्राणां राजा श्रीपुरुषोत्तमः ।
सर्वेषामपि देवानां राजा श्रीपुरुषोत्तमः ॥"

- कपिलसंहितायां पञ्चमाध्याये ।

समाजस्य उत्थानपतनयोर्मध्ये शावरजैनबौद्धतन्त्रब्राह्मण्य-धर्मावलम्बिनां समाजे उपासितः सन् तेषां संस्कृतेः मुख्यदेवत्वेन स्थानमधिकृत्य स्वतन्त्रसंस्कृतिसंघटने कारणं भूत्वा स्वालौकिक-महिमानं समग्रे विश्वेऽस्मिन् प्रकटयन्ति । तद्देवसम्पृक्तसंस्कृतिः श्रीजगन्नाथसंस्कृतिः पुरुषोत्तमधर्मसंस्कृतिः वेति रूपेण लोके ख्याता । पुरुषोत्तमश्रीजगन्नाथस्य मुलविकाशः कस्मात् कीदृश आसीत् इति विषये विद्वांसः संप्रत्यपि भिन्नभिन्नमतानि पोषयन्ति । अतएव पुरुषोत्तम श्रीजगन्नाथस्य प्रकृततत्त्वप्रतिपादनार्थं वैदिककालादारभ्य वर्त्तमानं यावत् मूर्त्तिपूजायाः क्रमविकाशः कथं जातः तथा च पुराणेषु विष्णुपुरुषोत्तमस्य अवतारणा कथमितिविषये विचारः नितरा-मपेक्ष्यते इति ।

वैदिककाले मूर्त्तिपूजायाः प्रचलनं नासीत् इति ज्ञायते । प्रथमतः निराकारनिर्गुणब्रह्मणः उपासना प्रचलिता आसीत् । तन्निराकारब्रह्मणो रूपकल्पना विष्णुभगवदीश्वरत्वेन परिचिता आसीत् । पुनश्च दृश्यमानसूर्यचन्द्रप्रभृतीनां वृक्षाणाम् अग्नेः च पूजा देवतारूपेण कल्पिता आसीत् । कालक्रमेण समाजस्य उन्नतिर्जाता । तत्सहायेन मानवस्य बुद्धेर्विकाशो जातः । समयक्रमेण अर्यमपूष्येन्द्रवरुणमित्रसवितृप्रभृति-देवानां कल्पनं कृत्वा तेषां पूजार्चनानिमित्तं स्तुतिपाठादिः साधुभिः रचितः । वैदिकसभ्यतायाः परिप्रकाशः ऋग्वेदकालादेवाभवत् । ऋग्वेदे अग्निसवितृब्रह्म विष्णुशिवप्रभृतिदेवानां स्तुतिर्वर्णिता अस्ति । वेदेषु विष्णुः स्वतन्त्रदेवत्वेन न वर्णितः परन्तु अर्यम-सवितृसूर्यपर्यायमध्ये सः परिगृहीतः । अतएव ऋग्वेदे[११] विष्णुः सूर्यरूपेण वर्णितोऽस्ति । निरुक्तकारेण यास्काचार्येणाऽपि विष्णुः सूर्यरूपेण वर्णितः । विष्णुशब्दः विश्-धातोः निष्पद्यते । विश्-

---

(ख) "उत्कलर तुहि शतहददल ।
तामध्ये उत्कल पुण्य नीलाचल ॥"
- पण्डित गोपबन्धुदासकृत बन्दीर आत्मकथा - पृ०- ८ ।

११. "तद्विष्णोः परमं पदं सदा पश्यन्ति सुरयः । दिवीव चक्षुराततम् ॥"
- ऋग्वेदे - १/२२/२० ।

शब्दस्यार्थः प्रवेशः अथवा (वि+अश्) व्याप्तिः । अतः यः सर्वत्रः सर्वस्मिन् काले परिव्याप्तः स एव विष्णुपदेन[१२] व्यपदिश्यते । वैदिककाले अग्निरुद्रसूर्यचन्द्रवरुणेन्द्रप्रभृतीनां देवानाम् उत्कर्षः समाजे सर्वोपरि आसीत् । परन्तु कालक्रमेण समाजस्य लोकव्यवहारस्य च परिवर्त्तनेन सह धार्मिकभावस्य आचारगतपरिवर्त्तनमपि जातम् येन जनाः निराकारदेवानां साकाररूपं परिकल्प्य मूर्त्तिपूजायाः परिकल्पनां कृतवन्तः तथा च तेषां सावयवकल्पनं कृत्वा लोके देवानाम् उत्कर्षं प्रतिपादयितुं चेष्टितवन्तः । [१३]विष्णुधर्मोत्तरपुराणे देवानां साकाररूप-कल्पनाविषये प्रमाणानि प्राप्यन्ते । न केवलं तत्र अपि च रामायणे महाभारते तथा च अनेकेषु पुराणेषु क्रमशः तेषामङ्गप्रत्यङ्गानां सुन्दरं चित्रणं जातमिति दृश्यते ।

सावयवत्वेन अपकर्षं गतानां विष्णुब्रह्मशिवयमप्रभृतीनां देवानां परमोत्कर्षः तथा च समाजे मुख्यदेवत्वेन स्थानप्राप्तिः कालक्रमेण पुराणेतिहासे एवं दृश्येते । उदाहरणस्वरूपतः वैदिकयुगे सूर्यत्वेन वर्णितः विष्णुः पुराणेतिहासे युगे चतुर्भुजत्वं प्राप्य शङ्खचक्र-गदापद्मधारी नानालङ्कारैः विमण्डित इति प्राप्यते । वेदेषु यस्य देवस्य नाममात्रं निर्वचनमासीत् पुराणेषु स एव जगन्नियन्तृत्वेन सर्वदेवाग्रे पूज्यते । इत्थमपि यमप्रभृतिदेवानां मुख्यत्वारोपणं पुराणेषु बहुलतया दृश्यते । इन्द्रवरुणकुवेराग्निप्रभृतयः वैदिककालीनमुख्यदेवाः पौराणिककाले गौणत्वं प्राप्य नाममात्रदेवतात्वेन पूज्यन्ते ।

---

१२. "विष्णातेर्विशते वा स्यात् विवेष्टेर्व्याप्तिकर्मणः ।
विष्णुर्निरुच्यते सूर्यः सर्वं सर्वान्तरश्च यः ॥"
- निरुक्ते - २/६९ ।

१३. "साकारविकृतिर्ज्ञेया तस्य सर्वं जगत्स्मृतम् ।
पूजाध्यानादिकं कर्तुं साकारस्यैव शक्यते ॥
स्वतस्तु देवः साकारः पूजनीयो यथाविधिः ।
अतो भगवतानेन स्वेच्छया यत्प्रदर्शितम् ॥
प्रादुर्भावेष्वथाकारं तदर्चन्ति दिवौकसः ।
एतस्मात् कारणात् पूजा साकारस्य विधीयते ॥"
- विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डे - ४६/२-६ ।

वैदिकदेवमण्डलस्य सम्राट् वरुणः पुराणे केवलं समुद्रस्य राजत्वेन, मुख्यदेवोऽग्निः ब्राह्मणत्वेन, इन्द्रः यः वैदिकदेवमण्डले श्रेष्ठयोद्धा श्रेष्ठशासकः इति ख्यातः आसीत् स एव पौराणिकदेवतामध्ये केवलं वृष्ट्यधिपतित्वेन स्वर्गे अप्सरसां सम्भोगकारित्वेन च परिचितः । रामायणे वर्णितमस्ति यत् असुरविनाशार्थं सूर्यवंशीयराजा काकुस्थः (रघुः) आहूतो भूत्वा वृषभरूपधारिणः इन्द्रस्य पृष्ठे आसीनः सन् युद्धभूमिं चलितः । महाभारते वर्णितमस्ति यत् मध्यमपाण्डवेन अर्जुनेन सह इन्द्रः राक्षसानां विनाशं कृतवान् । श्रीमद्भागवतपुराणे सप्तदिवस-वर्षकारी इन्द्रः श्रीकृष्णस्य शरणं लब्धवान् इति वर्णितमस्ति । पुराणेषु ब्रह्माविष्णुमहेश्वरदेवत्रयस्य उत्कर्षः मुख्यता च दृश्येते । अपि च स्कन्द-दुर्गागणेशहनुमत्प्रभृतयः नूतनकोटिकदेवदेवीरूपेण उद्भूताः जाताः ।

ऋग्वेदे प्रदर्शित[१४]त्रयोस्त्रिंशद्देवाः [१५]ब्रह्मविष्णुपुराणयोः त्रयस्त्रिंशत्कोटित्वेन परिगणिता जाता । मूर्त्तीनां निर्माणविधिः मत्स्यपुराणे[१६] विष्णुधर्मोत्तरपुराणे[१७] च विस्मृततया वर्णितोऽस्ति । कालक्रमेण परशुरामवामनरामचन्द्रबलरामबुद्धकृष्णप्रभृतीनां भगवतः अवताररूपेण ग्रहणं जातम् । अतएव पौराणिकयुगे मानवानां नैतिकगुणानाम् उत्कर्षः भारतीयधर्मसंस्कृतेः नूतनत्वं प्रदर्शयति । समयानुसारेण बलभद्रकृष्णयोर्यथाक्रमं शिवविष्णुरूपेण कल्पनं जातम् । परवर्त्तिनि काले रामकृष्णौ बलभद्रजगन्नाथरूपेण पुरुषोत्तमक्षेत्रस्थमन्दिरे पूजितौ भवतः । पुराणवर्णितः विष्णुः धार्मिकभावाधारायाः क्रमविकाशकाले विष्णुहरिपद्मनाभरङ्गनाथ-श्रीकृष्णमाधवपुरुषोत्तमजगन्नाथभेङ्कटेशनारायणप्रभृतिभिः नामभिः,

---

१४. एकादशरुद्राः, द्वादशादित्याः, अष्टौ वसवः, अश्विनीकुमारौ एते मिलित्वा त्रयोस्त्रिंशद्देवाः भवन्ति ।

१५. (क) "तिस्रः कोटिस्तथा पञ्चशतानि मुनिसत्तम ।
तीर्थानां तत्र व्युष्टिं च कः शृणोति ब्रवीति वा ॥"
- ब्रह्मपुराणे - ११०/१४६ ।

(ख) विष्णुपुराणे - १/१५/१३९ ।

१६. मत्स्यपुराणस्य मूर्त्तिकलाध्याये ।

१७. विष्णुधर्मोत्तरपुराणस्य तृतीयखण्डस्य ४४-८५तमाः अध्यायाः द्रष्टव्याः ।

शिवस्तु मृडरुद्रमहाकालेशानेश्वरनीलकण्ठलोकनाथलिङ्गराज-सदाशिवप्रभृतिभिः नामभिः, शक्तिः दुर्गाकालीमहाकालीतारापार्वती-मङ्गलालक्ष्मीविमलासुभद्राभुवनेश्वरीसर्वमङ्गलाभगवतीप्रभृतिभिः नामभिश्च ख्यातिं लब्धवत्यः । ततः भक्ताः उपासकाश्च शैवशाक्त-वैष्णवप्रभृतयः भिन्नभिन्नक्षेत्रं पीठं च स्थापयित्वा तत्र स्वस्वमतानुसारं देवदेवीनां पूजार्च्चनादिकं कृतवन्तः । तत्तत्स्थलविशेषाः विष्णुक्षेत्रं, शैवक्षेत्रं, शाक्तक्षेत्रमिति लोके प्रसिद्धिं गताः ।

क्षेत्रं नाम पवित्रभूमिः यत्र यज्ञादिशुभकार्यानन्तरं कस्यचन विशिष्टस्य लोकशास्त्रप्रसिद्धदेवस्य स्थापनं भवति । एवंप्रकारेण भारतवर्षे बहुत्र विष्णुक्षेत्राणि वर्त्तन्ते यथा रङ्गनाथपद्मनाभ-भेङ्कटेशपुरुषोत्तमप्रभृतीनि क्षेत्राणि । एतेषु विष्णुक्षेत्रेषु उत्कल-प्रदेशान्तर्गतं पुरुषोत्तमक्षेत्रं क्षेत्रराजरूपेण[१८] प्रसिद्धम्, यस्य महिमा तु समग्रपृथिव्यां वरीवर्त्ति इति सर्वे मुक्तकण्ठेन स्वीकुर्वन्ति ।

अस्य क्षेत्रस्य महत्त्वं ख्यातिश्च पुराणेषु सर्वत्र विद्येते । वैष्णवाः विष्णुक्षेत्रं पुरुषोत्तमधाम मर्त्त्यवैकुण्ठमिति जानन्ति । शैवाः हरिहरयोः ऐक्यं मन्यमानाः तथैव स्वीकुर्वन्ति । शाक्ताः लक्ष्मीप्रभृतीनां देवीनां प्राधान्यं विभाव्य श्रीक्षेत्रमिति, तान्त्रिकाश्च भैरवपीठमिति च कल्पयन्ति । अन्ये च सम्प्रदायाः स्वस्वधर्मदृष्ट्या जगन्नाथं स्वीकुर्वन्ति । किं बहुना यवनप्रभृतयः म्लेच्छा अपि जगन्नाथधर्मस्य संस्कृतेश्च प्रभावेणाभिभूताः सन्तः श्रीजगन्नाथं देवाधिदेवत्वेन चिन्तयन्ति इति ।

पुराणानां परिचयः-

भारतीयसंस्कृतेः मूलाधाररूपेण प्रसिद्धिं गतानां वेदानामनन्तरं स्मृतीनां पुराणानां च प्रामाण्यं वर्त्तते इति उररीकृतं प्रमुखविद्वद्भिः[१९] । पुराणं

१८. "यथा समस्ततीर्थानां धर्मः संसारतारकः ।
तथा समस्ततीर्थानां श्रेष्ठं तत्पुरुषोत्तमम् ॥"

- ब्रह्मपुराणे - ६९/४३ ।

१९. वेदस्मृत्योरनन्तरं पुराणनामेवास्तिकजगति प्रमाण्यमङ्गीक्रियते । यतोऽत्र वेदार्थमेव स्पष्टीकर्तुं ज्ञानकर्मोपासनानां सिद्धान्ता अति सरलया भावगम्यया प्राञ्जलया भाषया विविधाभिर्भक्तशिरोमणीनां मानवमणीनां कथाभिः

भारतीयसंस्कृतेः मेरुदण्डरूपमिति विदुषाम्[20] अभिमतं सुरुचिरम्। अतः प्रथमतः तत्पुराणशब्दव्युत्पत्तिसम्बन्धे किमप्युपस्थापनीयम्।

पुराणशब्दस्य व्युत्पत्तिलभ्यार्थः साधारणतः स्रोतश्चतुष्टयात् उपलभ्यते। तत् स्रोतश्चतुष्टयं क्रमानुसारं निरुक्तं, व्याकरणं, पुराणं, कोशश्चेति। यास्काचार्याणां[21] निरुक्तप्रतिपादनानुसारं प्राचीनत्वेऽपि यस्य नव्यत्वं नितरामस्ति तदेव पुराणं बोध्यते। एतदर्थसम्बलितः पुराणशब्दः प्रमुखतया [22]ऋग्वेदे उपलभ्यते। [23]अथर्ववेदे [24]शतपथब्राह्मणे [25]गोपथब्राह्मणे [26]तैत्तिरीयारण्यके [27]बृहदारण्यके

सम्यगवबोधिताः सन्ति येषां मननद्वारा साधारणबुद्धयोऽपि जनाः व्यावहारिकीं स्थितिं सम्पादयन्तो वेदोपनिषत्प्रतिपाद्यं मानवानां प्रधानं लक्ष्यं परमात्मनं प्राप्य मुक्ता भवितुमर्हन्ति।

- पुराणपर्यालोचनस्य समीक्षात्मकभागः - पृ०- १।

२०. पुराण भारतीय संस्कृति का मेरुदण्ड है। वह आधारपीठ है, जिसपर आधुनिक भारतीय समाज अपने नियमन को प्रतिष्ठित करता है।

- पुराणविमर्श - पृ०- १।

२१. पुराणं - पुरा भवं भवति नेदानीम्। जीर्णं हि पुराणमुच्यते। पुरानवशब्दस्य व-लोपेन णत्वेन च।

-निरुक्तभाष्यटीकायां - ३/१९/४, पृ०- १८६।

२२. (क) "स ना पुराणमध्येरात्"। - ऋग्वेदे- ३/४४/९।

(ख) "पुराणमोकः सख्यं शिवं वाम्।" -तत्रैव - ३/५८/६।

२३. ऋचः सामानि छन्दांसि पुराणं यजुषा सह।
उच्छिष्टाज्जज्ञिरे सर्वे दिविदेवा दिविश्रिता॥-अथर्ववेदे - ११/७/२५।

२४. "अथ नवमेऽहनि किञ्चित् पुराणमाचक्षीत्।"

- शतपथब्राह्मणे - ३/१२/१३।

२५. "एवमिमे सर्वे वेदा निर्मिताः सकल्पाः सरहस्याः सब्राह्मणाः। सोपनिषत्काः सेतिहासाः सान्वख्याताः सपुराणाः॥"

- गोपथब्राह्मणे - २/१०।

२६. ब्राह्मणानीतिहासान् पुराणानि कल्पान् गाथा नाराशंसीर्मेदाहुतयो देवानामभवन्।" -तैत्तिरीयारण्यके - २/९।

२७. "स यथाऽर्द्रेधाग्नेरभ्याहितात् पृथग्धूमा विनिश्चरन्ति एव वा अरेऽस्य महतोभूतस्य विश्वसितमेतद्ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासपुराणं पञ्चमं वेदानां वेदम्।"

- बृहदारण्यकोपनिषदि - २/४/११।

[२८]छान्दोग्योपनिषदि [२९]आश्वलायनगृह्यसूत्रे [३०]गौतमीयधर्मसूत्रे [३१]याज्ञवल्क्यस्मृतौ च एतदर्थसम्बलितः पुराणशब्दः दरीदृश्यते ।

व्याकरणशास्त्रदृष्ट्या अयमेव अर्थः यद्यपि सिद्धान्तितः तथापि एतदर्थस्य विविधस्थलेषु प्रतिपादनशैल्या भिन्नत्वात् सर्वतोभावेन तदर्थलाभार्थं सर्वे पन्थानः अत्र प्रतिपादनीयाः ।

१. तुदादिगणपठितात् पुर अग्रगमने इति धातोः औणादिके का-प्रत्यये कृते 'पुरति अग्रे गच्छतीति' अर्थविशिष्टं यत् 'पुरा' इति अव्ययपदं साधारणं निष्पद्यते, तत् पदतः 'च्यु'प्रत्ययसंयोगे 'पुराणं' इति शब्दः निष्पद्यते ।

२. 'पुरा भव पुराणम्' इति विग्रहे 'पुरा' इति अव्ययात् 'च्यु'प्रत्ययानन्तरं हलन्तटकारस्य इत्संज्ञायां लोपे[३२] च कृते [३३]अनादेशे नकारस्य [३४]णत्वे [३५]पूर्वकालैकापि सूत्रदर्शनात् निपातनेन तुटोऽभावे पुराणशब्दस्य सिद्धिर्भवति ।

---

२८. "ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमथाथर्वाणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदम् ।"

- छान्दोग्योपनिषदि - ७/१/२ ।

२९. "ब्राह्मणानि कल्पगाथा नाराशंसी इतिहासपुराणानि अमृतस्य कुल्याः ।"

- आश्वलायनगृह्यसूत्रे - ३/४ ।

३०. "स एव बहुश्रुतो भवति लोकवेदवेदाङ्गविद् वाकोवाक्येतिहासपुराण-कुशलः ।"　- गौतमधर्मसूत्रे - ८/४/६ ।

३१. "पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥"

- याज्ञवल्क्यस्मृतौ - १/३ ।

३२. "सायं चिरं प्राहणे प्रगेऽव्ययेभ्यष्ट्युटच्युलौ तुट् च ।"

- पाणिनीयाष्टाध्यायाम् - ४/३/३२ ।

३३. "युवरनाकौ" ।　-तत्रैव - ७/१/१ ।

३४. "अटकुप्वाङ्नुम् व्यवायेऽपि ।"　-तत्रैव - ८/४/२३ ।

३५ (क) "पूर्वकालिके सर्वजरत् पुराणनवकेवलाः समानाधिकरणेन ।"

- तत्रैव - २/१/४ ।

(ख) "पुराणप्रोक्तेषु ब्राह्मणकल्पेषु ।"　-तत्रैव - ४/३/१०५ ।

३. पुरा पुरातनम् अनीति जीवयति बोधयतीति विग्रहात् ग्रन्थविशेषं सूचयन् पुराणशब्दः पुरा पूर्वकात् औदादिकात् अण् प्राणने इति धातोः अचि प्रत्यये णत्वे कृते सिद्ध्यति ।

४. पुरा अतीतान् अर्थात् अणति कथयति जीवयति इति व्युत्पत्तौ 'पुरा' इति उपपदात् भौवादिकात् अण् शब्दे इति धातोः पचादित्वात् अचि प्रत्यये सति पुराणशब्दः सिद्ध्यति ।

५. पुरा पूर्वक 'णीञ् प्रापणे' इति धातोः औणादिके ड्-प्रत्यये टिलोपे णत्वे च कृते पुरा+नि+ड्= इति एतेषां त्रयाणाम् अवयवानां मेलनात् पुराणशब्दः निष्पद्यते इति ।

कोशेषु स्थलविशेषेऽपि पुराणशब्दस्यार्थाः प्रतिपाद्यन्ते । यद्यपि त एव कोशनिहितार्थाः विशेषतस्तानेव पूर्वप्रसिद्धान् प्राचीनार्थान् बोधयन्ति तथापि तत्र तत्र प्रतिपादनवैभिन्यात् तत्तत्कोशवचनानि अत्र उपस्थाप्यन्ते । तत्र दृष्टान्ततः [३६]हेमचन्द्रकोशे पुराणशब्दस्य प्रत्नशास्त्रत्वेन उपलब्धिः भवति । [३७]नानार्थरत्नमालायाः [३८]मेदिनी-कोशस्य च प्रतिपादनमपि प्रामाण्यम् तथा सुरुचिरम् ।

इत्थं पुराणसम्बन्धीनि अनेकानि तथ्यानि अपि साक्षात् पुराणेषु समुपलभ्यन्ते । तत्र पुरातनार्थस्य उच्छेदेन सह यदि केनचित् तत्र अर्वाचीनत्वमारोपयितुमुपक्रम्येत तर्हि पूर्वोक्तेषु प्रमाणपथिषु तेन कदाचिदपि स्वपादमेकं न स्थापितम्, अथवा स नितरां प्रगल्भपदभागिति अपख्यातिं लभ्येत । संस्कृतसाहित्ये विशेषतः पुराणशास्त्राणामुपरि अनुशीलनकर्तृणां विदुषां[३९] मतं पूर्वोक्तैः

---

३६. "पुराणं षोडशपणे पुराणं प्रत्नशास्त्रयोः ।"
- हेमचन्द्रकोषे - ८, पृ०- ३३ ।

३७. "पुराणं ग्रन्थभेदे च क्लीवे त्रिषु पुरातने ।"
- नानार्थरत्नमालायाम् - ८, पृ०- २० ।

३८. "स्यात् प्रबन्धे पुरातीते सङ्कटागमिके तथा ।" - मेदिनीकोषे -२५ ।

३९. यदि पुराणं कश्चित् नवीनं कथयति तर्हि स एव कथयितुमुद्यतो भविष्यति, यस्य पूर्वोक्तानां व्युत्पत्तीनां ज्ञानं नास्ति ।"
-पुराणपर्यालोचनस्य गवेषणात्मकभागः- पृ०- ५७ ।

प्रमाणितमतैः सह ऐक्यं वर्त्तते । ये तु तथा न स्वीकुर्वन्ति तैः पुराणेभ्यः इत्थं भूतं ज्ञानं नोपार्जितमिति ते जाल्मवत् तथा रटन्ति । यदि सूक्ष्मतया विषयेऽस्मिन् पुराणेषु सन्निवेशितानां वचनानाम् उल्लेखः क्रियेत तर्हि एकार्थबोधकत्वेऽपि प्रतिपादनशैली भिन्ना भवति इति हेतोः तत्तत्पुराणानां स्वातन्त्र्येण सह तन्निष्ठवचनानां प्रतिपादनं समुचितं मन्यते। अतः इत्थम् आरब्धेऽस्मिन् उद्यमे मत्स्यपुराणस्य[४०] वचनं पुरातनत्वेन साधारणं भवति । पुराणस्यास्य एतदभिमतं स्कन्दपुराणस्य [४१]प्रभासखण्डे अपि समुपलभ्यते । [४२]वायुपुराणमपि यत् खलु पुराकाले संघटितमासीत् यस्य च स्मरणेनाऽपि अधुना पापेभ्यः मुक्तिर्मिलति तत् पुराणमिति मनुते । किन्तु [४३]ब्रह्माण्डपुराणे सामान्यतः इतः किञ्चित् भिन्नं वचनमुपलभ्यते, यत्र प्राचीनकाले इत्थम् आसीत् इति स्पष्टमर्थबोधो भवति । किन्तु [४४]पद्मपुराणप्रतिपादनानुसारं यत् प्राचीनां परम्परां प्रतिपादयन्ति तत् पुराणमेव । अतः रचनावैचित्र्यात् च सर्वकालीकभावेन नित्यमभिनवं यत् प्रतीयते तत् पुराणमिति [४५]पुराणपर्यालोचकानां मतं साधु इति ।

---

४०. "पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः ।"

- मत्स्यपुराणे - ५३/७२ ।

४१. "पुरातनस्य कल्पस्य पुराणानि विदुर्बुधाः ।"

- स्कन्दपुराणे प्रभासखण्डे - २/१८ ।

४२. "यस्मात् पुरा ह्यनतीदं पुराणं तेन कथ्यते ।
निरुक्तिमस्य यो वेद सर्वपापैः प्रमुच्यते ॥"

- वायुपुराणे - १/२०३ ।

४३. "यस्मात् पुरा ह्यभूच्चैतत् पुराणं तेन तत् स्मृतम् ।"

- ब्रह्माण्डपुराणे - १/१/१७३ ।

४४. "पुरा परम्परां व्यक्ति पुराणं तेन वै स्मृतम् ।"

- पद्मपुराणे - १/२/५४, ५/२/५३ ।

४५. प्राचिनानि सन्त्यपि पुराणानि रचनावैचित्र्यवस्तुवैचित्र्याभ्यां सदा अभिनवानि प्रतीयन्ते ।

- पुराणपर्यालोचनस्य गवेषणात्मकभागः - पृ० - ५८ ।

[46]बृहदारण्यके [47]छान्दोग्योपनिषदि च इतिहासपुराणमिति एकं पदं श्रूयते । विदुषां मनसि कदाचित् संशयः आगच्छेत् किम्वा पुराणमिति यत् पदं यमेव अर्थं प्रस्तौति तमेवार्थमितिहासपुराणम् इति पदं स्वीकरोति इति । अवश्यमत्र [48]व्यवहारोत्थितः कश्चन सिद्धान्तः उपस्थापनीयः । तत्र वादिपक्षः एतत्सर्वं यत् यदि इतिहासपुराणमेक एव मौलिकशब्दः स्यात् तर्हि अत्र यावत् पुराणविषयिणी चर्च्चा इतिहासपुराणपदमपि उपकुर्य्यात् । यदि च इतिहासपुराणमेक एव मौलिकशब्दः स्यात् इतिहासापुराणाभ्यां वेदं [49]समुपबृंहयेत् इति वचनात् इतिहासपुराणयोः शब्दयोः भिन्नताज्ञानं निरर्थकं स्यात् । पि च यदि इतिहासपुराणम् एक एव मौलिकशब्दो भवेत् तर्हि आरण्यकात् आरम्भ पुराणं यावत् स्वतन्त्रस्वतन्त्ररूपेण इतिहासपुराणयोः प्रतिपादनं अयुक्तियुक्तं स्यात् । अवस्यमेतत्सर्वं विचार्यम् । स्थलविशेषे हीनातिहीनादपि युक्तियुक्तिवचनस्य ग्राह्यत्वे न तावत् दोषः इति मुक्तकण्ठेन ऊररीकृतमस्ति [50]शास्त्रकारैः । अस्मात् अवश्यमेव इतिहासपुराणयोः मध्ये अस्ति अर्थभेदः । छन्दः प्रतिपादनसौकर्यात् पुर्वोक्तारण्यकोपनिषदोः इतिहासपुराणम् इति एकवचनान्तयुक्तपद-प्रतिपादनेन नास्ति दोषस्वीकारस्य अवसरः ।

इतिहासपुराणयोर्मध्ये पार्थक्यम्-

[51]यास्काचार्येण इतिहासशब्दस्य निरुक्तिकरणावसरे इति+ह+आसः इति एवं प्रकारेण ह= निश्चितरूपेण, आसः= वर्त्तमान

---

४६. बृहदारण्यकोपनिषत् - २/४/१० ।

४७. नाम वा ऋग्वेदो यजुर्वेदः सामवेदः आथर्वणश्चतुर्थ इतिहासपुराणपञ्चमवेदानां वेदम् ।'' - छान्दोग्योपनिषदि - ७/१/४ ।

४८. ''वि नानार्थेऽव सन्देहे हरणं हर उच्यते ।
नानासन्देहहरणाद् व्यवहार इति स्मृतः ॥''
- याज्ञवल्क्यवीरमित्रोदय (२/१)धृत कात्यायनवचनम् ।

४९. महाभारते आदिपर्वाणि - १/२६८ ।

५०. ''युक्तियुक्तं वचो ग्राह्यं वृद्धादपि शुकादपि ।'' -चाणक्यनीतौ ।

५१. ''निदानभूतम् इति ह एवमासीत यः कथ्यते सः इतिहासः ।''
- निरुक्तभाष्यटीका- माहेश्वरभाष्ये- २/१०/३, पृ०- ७१ ।

आसीत् इति अर्थः प्रदत्तः । तर्हि तस्य एव इतिहासशब्दस्य पुरावृत्तत्वेन [52]'अमरकोशः' [53]महाभारतयोः प्रतिपादनं न तावत् अयुक्तियुक्तं भवति। यद्यपि तत् इतिवृत्तम् [54]अर्थशास्त्रे साधारणतया इतिहासार्थेन उपलब्ध भवति तथापि स्थलविशेषे वेदेषु विशेषतः [55]अथर्ववेदे पुराणात् स्वतन्त्ररूपेण उपलब्धितः अस्ति उभयोर्मध्ये पार्थक्यम् । [56]शतपथब्राह्मणे इतिहासपुराणयोः पृथक्तया चर्चा उपलभ्यते । तत्र भाष्यकारैः [57]श्रीमच्छङ्कराचार्यैरपि यत् अभिमतं दत्तं तस्मादपि उभयोर्मध्ये पार्थक्यं स्पष्टं भवति । वेदवेदान्तादिग्रन्थान् अनुसृत्य तत्तत् सिद्धान्तप्रतिपादनानन्तरं प्रसिद्धं प्रसिद्धं यत् यत् वचनं इतिहासमाधारीकृत्य महाभारतादिग्रन्थेषु समुपलभ्यते तत् तद् वचनानाम् अत्र प्रतिपादनार्थं यदि उद्यमः क्रियते तर्हि नास्ति दोषः । तदनुरोधेन अत्र प्रस्तूयते । [58]महाभारते इतिहासशब्दस्योल्लेखः केवलं पुरातत्त्वे अज्ञानदूरीकरणार्थम् उपलब्धो भवति । विचित्रमेतदपि च महाभारते प्रतिपादितं येन पुराणम् इतिहासश्च उभौ [59]द्वैपायनेन प्रोक्तौ

---

५२. "इतिहासः पुरावृत्तम् ।" - अमरकोशे - १/५ ।

५३. "पुराणम् पुरावृत्तम् ।"
- महाभारते आदिपर्वणि (नीलकण्ठीटीका) - १/५/१ ।

५४. "पुराणमितिवृत्तमाख्यायिकोदाहरणं धर्मशास्त्रं चेति इतिहासः ।"
- कौटलीयार्थशास्त्रे- ५/१४ ।

५५. "तमितिहासश्च पुराणं च गाथाश्च नाराशंसीश्चानुव्यचलन् ।
इतिहासस्य च सर्वे पुराणस्य च गाथानां च ।
नाराशंसीनां च प्रियं धाम भवति, य एव वेदः ।।"
- अथर्ववेदे - १/१५/६/११-१२ ।

५६. शतपथब्राह्मणे- ११/५/२/१ ।

५७. "इतिहास इत्युर्वशीपुरुरवसोः संवादादिः ऊर्वशीहाप्सरा" इत्यादि ब्राह्मणमेव । पुराणम् । 'असद्वा इदमग्रं आसीदित्यादि' ।
- शाङ्करभाष्यवचनं पुराणविमर्शधृतम् - पृ०- ६ ।

५८. "इतिहासप्रदीपेन मोहावरणघातिना ।
लोकगर्भगृहं कृत्स्नं यथावत् सम्प्रकाशितम् ।।"
- महाभारते आदिपर्वणि - १/८७ ।

५९. "द्वैपायनेन यत् प्रोक्तं पुराणं परमर्षिणा ।" - तत्रैव- १/८७ ।

इति ज्ञायते । महाभारतस्य [60]इतिहासत्वे समुपलम्भात् पुराणेतिहासयोर्मध्ये अस्ति भेदः, महाभारतम् इतिहासः इति नास्ति कश्चिद् सन्देहः । [61]वायुपुराणे स्वतन्त्ररूपेण इतिहासपुराणयोः प्रदर्शनात् तत्र निश्चितम् अस्ति भेदः । [62]मत्स्यपुराणेऽपि पुरातनत्वे इतिहासस्यो-पस्थापनात् पुराणात् अस्य किञ्चित् वैशिष्ट्यम् इति विभाव्यते । यद्वा भवतु प्राग्वृत्तकथने इतिहासत्वं सिद्धं भवतीति[63] शास्त्रप्रतिपादनात् काल्पनिकं तथा आख्यानमूलकं पुराणं तथा च वास्तविकपुरातन-घटनासम्बलितः इतिहासश्च इति उभयोः मध्ये प्राचीनगतः अर्थभेदः इति प्रतिपादयितॄणां [64]विदुषां मतं साधु मन्यते । साधारणतया इतिहासशब्दस्योल्लेखनात् परम् इतिहासस्य भेदद्वयम्, यत् खलु

---

६०. ''जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ।''

- महाभारतस्य उद्योगपर्वणि - १३६/१८ ।

६१. ''इमं यो ब्राह्मणो विद्वानितिहासं पुरातनम् ।
शृणुयात् श्रावयेद्वापि तथाऽध्यापयतेऽपि च ॥
धन्यं यशस्यमायुष्यं पुण्यं वेदैश्च समन्तम् ।
कृष्णद्वैपायनेनोक्तं पुराणं ब्रह्मवादिना ॥''

- वायुपुराणे- १०३/४८-५१ ।

६२. ''अत्राप्युदाहरतीममितिहासं पुरातनम् ।''

- मत्स्यपुराणे- ७२/६ ।

६३. ''प्राग्वृत्तकथनं चैव राज्यकृत्यमिषादितः ।
यस्मिन् स इतिहासः स्यात् पुरा वृत्त स एव हि ॥''

- शुक्रनीतौः - ४/९२ ।

६४. (क) इससे स्पष्ट है कि काल्पनिककथा या आख्यान को 'पुराण' नाम से और वास्तविक घटना को 'इतिहास' नाम से पुकारते थे । और यही दोनों के प्राचीन अर्थों में विभेदसीमा है ।

- पुराणविमर्श- पृ०- ५ ।

(ख) एवं पुराणशब्दस्यार्थो भवति यत् प्राचीन सदपि नवीनं स्यात् तत् पुराणम्, तथा इतिहासस्यार्थो भवति यः प्राचीनकाले वास्तविकरूपेण घटितघटनायाः सङ्केतं करोति स भवतीतिहासः ।

- पुराणपर्यालोचनस्य गवेषणात्मकभागः- पृ०- ६६ ।

"शास्त्रकारैः परिकल्पितं तदुपरि एवं विचारं प्रतिपादयितुं शक्यते यत् परिक्रियापुराकल्पेति भेदेन इतिहासः द्विविधः । तत्र एकनायकविशिष्टः इतिहासः परिक्रियापदेन, बहुनायिकाविशिष्टः इतिहासः पुराकल्पपदेन च व्यवह्रियते यत्र रामायणं महाभारतं च उदाहरणद्वयं क्रमानुसारं भवितुं शक्यते।

अत्र स्वतन्त्ररूपेण इतिहासपुराणयोः यत् अर्थोपस्थापनं जातं तत् आधारीकृत्य आलोचनस्य कर्त्तव्यता अस्ति । अपि च समासतः पुराणे इतिहासस्य "अन्तर्भावप्रदर्शनात् पुराणं सकलं बोधयति इति ज्ञानम् अवधार्यम् । "धर्मशास्त्रे पुराणशब्दस्य साधारण्येन व्यवहारात् तस्मिन्नेव इतिहासः अन्तर्भुक्तः इति विद्वद्भिरवधेयम् । अस्मिन्स्थले च पुराणेतिहासयोः अभेदत्वपरिकल्पनेन सह उभौ परस्परयोः परिपूरकौ इति "विदुषां मतानुसारं पुराणन्तर्गतौ पुराणमितिहासश्चोभौ मन्येते । अतः वेदानां समुपबृंहणे भिन्नभिन्नतया पुराणेतिहासयोः प्रतिपादनत्वेऽपि वस्तुगत्या तत् एकम् । धर्मज्ञापने वेदात्परं यद्यपि स्मृतिशास्त्राणां स्थितिः तथापि आख्यायिकोदाहरणमाध्यमेन सरलातिसरलभावेन सर्वसाधारणानां सम्मुखे प्रतिपादितत्वात् पुराणानाम् अवरत्वम् उपस्थापितम् । "पुराणानामवरत्वपरिकल्पनात्

---

६५. "परिक्रिया पुराकल्पः इतिहासगतिर्द्विधा ।
स्यादेकानायिका पूर्वा द्वितीया बहुनायिका ॥"
- काव्यमीमांसायाम् - पृ०- २ ।

६६. "श्रृणु वत्स प्रवक्ष्यामि पुराणानां समुच्चयम् ।
यस्मिन् ज्ञाते भवेज्ज्ञातं वाङ्मयं सचराचरम् ॥"
- वायुपुराणे- १/९२/२१ ।

६७. याज्ञवल्क्यस्मृतौ - १/३ ।

६८. एवमितिहासपुराणशब्दौ परस्परं प्रयुक्तौ भवतः स्म । अतएव विद्वद्भिरेकं द्वितीयस्य पूरकं मन्यते । पुराणेतिहासशब्दौ कदाचित् भिन्नेषु अर्थेषु प्रयुज्येते स्म, कदाचिच्चैकस्मिन्नेवार्थे उभयोः प्रयोगो भवति स्म । अतोः द्वयोः परिभाषायां न कश्चन भेदो लक्ष्यते ।
- पुराणपर्यालोचनस्य गवेषणात्मकभागः - पृ०- ६९ ।

६९. "अतः स परमो धर्मो यो वेदादधिगम्यते ।
अवरः स तु विज्ञेयो यः पुराणादिषु स्थितः ॥
- History of Dharmashastra, Vol.- I , p. 410.

अत्र पुराणानां न्यूनत्वं न जातं, प्रत्युतः धर्मज्ञापने वेदानां सन्निकर्षत्वात् अवश्यमस्ति पुराणस्य वैशिष्ट्यम् इति विद्वद्भिः स्वीकर्त्तव्यम् ।

पुराणानां लक्षणानि-

पुराणस्य लक्षणविषयिणी चर्च्चा इतः प्राक् सामान्यतः सन्निवेशिता । विस्तृतेऽस्मिन् संस्कृतवाङ्मये पुराणशास्त्रस्य प्रथम-सृष्टित्वेन तस्य कीदृशं माहात्म्यं तत्तु विशेषतो [७०]मत्स्यादिपुराणेषु समुपलभ्यते । लोककल्याणार्थं प्राचीनकाले शास्त्रसम्बन्धिन्यौ ऋषिधारा मुनिधारा चेति धारे द्वे प्रचलिते आस्ताम्, ययोश्च सङ्केतः अस्माभिः [७१]मार्कण्डेयपुराणात् प्राप्यते । ऋषयः वेदानां प्रसारप्रचारच्छलेन तेषां सुरक्षार्थं भारं गृहीतवन्तः, तथा च मुनयः पुराणानां संरक्षणार्थं तेषां प्रवचनस्य प्रसारस्य प्रचारस्य च कार्यं साधितवन्तः । अतः तदनुसारं सर्गादौ अव्यक्तजन्मनः ब्रह्मणो मुखेभ्यो वेदपुराणानामाविर्भावोऽभूत् इति [७२]विदुषां मतं ग्रहणीयम् । वेदस्य अवश्यम् अपौरुषेयत्वं 'यस्य निश्वसितं वेदाः' इति न केवलं [७३]श्रुतिवाक्यात् अपि च [७४]मींमासाशास्त्रात् ज्ञायते ।

---

७०. "पुराणं सर्वशास्त्राणां प्रथमं ब्रह्मणा स्मृतम् ।
अनन्तरं च वक्त्रेभ्यो वेदास्तस्य विनिर्गताः ॥"
- मत्स्यपुराणे - ५३/३ , पद्मपुराणे सृष्टिखण्डे- १/४५,
स्कन्दपुराणे रेवाखण्डे- १/२४ ।

७१. "उत्पन्नमात्रस्य पुरा ब्रह्मणोऽव्यक्तजन्मनः ।
पुराणमेतद्वेदाश्च मुखेभ्योऽनुविनिसृताः ॥
वेदान् सप्तर्षयस्तस्माज्जगृहुस्तस्य मानसा ।
पुराणं जगृहुश्चाद्या मुनयस्तस्य मानसाः ॥"
-मार्कण्डेयपुराणे- ४५/२०,२३ ।

७२. ऋग्वेदादिका उदय तो ब्रह्मा के पूर्वमुख से आरम्भ कर क्रमशः हुआ, परन्तु पुराण की उत्पत्ति चारों मुखों से एककाल में ही उत्पन्न हुई ।
-पुराणविमर्श - पृ०- ५८ ।

७३. शतपथब्राह्मणे।

७४. जैमिनीयन्यायमालाविस्तरे वेदापौरुषेयत्वाधिकरणम् ।

पुराणं ततः किञ्चित् विलक्षणसम्पन्नम् । मुनिधारायां प्रवर्त्तमानानां शास्त्राणां मध्ये तस्य सृष्टेः प्राथम्यात् यत् वैशिष्ट्यं प्रतिपादितं कलौ युगे अल्पबुद्धीनां जनानां ब्राह्मणानां च हितार्थाय सरलवाक्यसम्बलितं पुराणशास्त्रमिदं सृष्टमिति [75]देवीभागवतवचनं स्मरणीयम् । तदनुरोधेन वेदान्तशास्त्रात् आरभ्य [76]श्रीमद्भागवतादि-पुराणपर्यन्तं सर्वं जातम् । वस्तुतस्तु वेदेषु सार्वजनीनाधिकाराभावात् तदर्थसम्बलितं तत् पुराणशास्त्रं सर्वेषामुपयोगाय व्यासेन सृष्टमिति युक्तियुक्तं मन्यते । पुराणानां किं लक्षणम् ? इति विदुषां मनसि संशयो नूनं स्यात् । स एव सम्प्रति अपनोद्यः ।

कस्यचन वस्तुनः सिद्धौ लक्षणप्रमाणयोरवश्यमेव आवश्यकता वर्त्तते । अतः किं लक्षणकं पुराणमिति जिज्ञासायाम् अस्माभिः समग्रेऽस्मिन् संस्कृतवाङ्मये केवलं पुराणभागे एव तद्विषयविचारः प्राप्यते । तत्र च पुराणेषु तल्लक्षणवर्णनप्रसङ्गे अस्माभिः द्विविधं लक्षणं प्राप्यते यथा पञ्चलक्षणं दशलक्षणं चेति । किन्तु साधारणतः पञ्चलक्षणम् एव प्रसिद्धमस्ति यस्य प्रमाणं विविधेषु कोशेषु समुपलभ्यते ।

पुराणं पञ्चलक्षणम्-

'पुराणम् पञ्चलक्षणम्' इति परिलक्ष्यते । तत्र पञ्चलक्षणेषु सर्ग-प्रतिसर्ग-वंश-मन्वन्तरवंशानुचरितानि एव अन्तर्भवन्ति । इत्थं प्रतिपादकं वचनं बहुषु [77]प्रसिद्धपुराणेषु समुपलभ्यते ।

---

७५. "अल्पायुषऽल्पबुद्धिश्च विप्रान् ज्ञात्वा कलावथ ।
पुराणसहिता पुण्या कुरुतोऽसौ युगे युगे ॥"
- देवीभागवते - १/३०/२० ।

७६. (क) "न हि वेदेष्वधिकारः कश्चित् सूतस्य जायते ।"
-वायुपुराणे- १/३४ ।
(ख) "स्त्रीशूद्रद्विजबन्धुनां त्रयी न श्रुतिगोचरा ।"
-श्रीभागवतपुराणे- १/४/२५ ।

७७. "सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चेति पुराणं पञ्चलक्षणम् ॥"
-मत्स्यपुराणे- ५३/६३, गरुडपुराणे- २१५/१४, विष्णुपुराणे- ३/

१. सर्गः- जगतः उत्पत्तिः सर्गपदात् अवबोध्यते । तत्र ब्रह्मव्यतिरिक्तं यत् यत् वस्तु जगति दृश्यमानं भवति तत्तद्वस्तुन उत्पत्तिः सर्गपदेन व्यपदिश्यते । एतन्मूलकत्वेन इन्द्रियार्थादीनां सर्वेषां सम्भवः [७८]श्रीमद्भागवतात् ज्ञायते ।

२. प्रतिसर्गः- सर्गात् विपरीतं यत् यो वा प्रलयः स एव प्रतिसर्गः कथ्यते । ब्रह्माण्डस्यास्य समयानुसारं प्रलयो भवति । अयं नैमित्तिकप्राकृतिकनित्यात्यन्तिकेति भेदेन [७९]चतुर्विधः । सकलमेतत् संस्थापदेन श्रीमद्भागवते सन्निवेशितम् । विष्णुपुराणे अयमेव प्रतिसर्गः प्रतिसञ्चरपदेन व्यवहृतो भवति ।

३. वंशम्- वंशपदेन कदाचित् केवलं राजवंशस्य अर्थबोधः स्वीकृतः भवेत् । किन्तु तन्न समीचीनं यतः राजवंशपदेन वंशपदस्य व्यवहारात् तस्य सीमितत्वदोषो भवति । अतः संसारेऽस्मिन् ब्रह्मणा येषां येषां राज्ञां सृष्टिः कृता तेषां तेषां भूतभविष्यवर्त्तमानकालीन-स्थितिः वंश इति [८०]श्रीमद्भागवतादिग्रन्थेषु यत् प्रतिपादितं ततः व्यापकरूपेण अपरेषां मुनिऋष्यादिसकलानां वंशमपि स्वीक्रियते । पुराणान्तरे एतत्सम्बन्धे वर्णना वर्त्तते इति कृत्वा [८१]विदुषामेतेषां स्वीकारमूलिका

६/२४, मार्कण्डेयपुराणे- १३४/२४, अग्निपुराणे- १/१४, भविष्यपुराणे- २/५, ब्रह्मवैवर्त्तपुराणे- १३३/६, वराहपुराणे-२/४, स्कन्दपुराणे प्रभासखण्डे- २/८४, कूर्मपुराणे पूर्वार्द्धे- १/१२, ब्रह्माण्डपुराणे प्रक्रियापादे- १/३८, शिवपुराणे वायवीयसंहितायाम्- १/४१ ।

७८. "अव्याकृतगुणक्षोभात् महतस्त्रिवृतोऽहमः ।
भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ॥"
- श्रीभागवतपुराणे- १२/७/११ ।

७९. "नैमित्तिकः प्राकृतिको नित्यं आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्ता चतुर्द्धाऽस्य स्वभावतः ॥"
-तत्रैव - १२/७/१७ ।

८०. "राज्ञा ब्रह्मप्रसूतानां वंशस्त्रैकालिकोन्वयः ।"
- तत्रैव - १२/७/१६ ।

८१. इस शब्द के भीतर ऋषिओं के वंश का ग्रहण अन्य पुराणों में किया गया है । - पुराणविमर्श - पृ०- १२६ ।

युक्तिरवश्यमेव अनुसर्त्तव्या ।

४. मन्वन्तरम्- संसारस्यास्य अवस्थाविशेषे विविधसृष्ट्यर्थं ये ये परिच्छेदाः समालोचनमाध्यमेन समुपलभ्यन्ते ते एव पुराणवाङ्मये मन्वन्तराण्येव । सम्पूर्णरूपेण महाप्रलयस्य संघटनार्थं चतुर्दश-मन्वन्तराणि पुराणवाङ्मये आपद्यन्ते । तथा च प्रतिमन्वन्तरम् एकस्यैव मनोराधिपत्यं स्वीकृतं भवति इति हेतोः मन्वन्तरं तत् कथ्यते । प्रतिमन्वन्तरं मनुदेवतादिपदार्थषटकम्[८२] आपद्यते यस्मात् पदार्थपञ्चकं मनोः सहयोगित्वेन ज्ञातं भवति ।

५. वंशानुचरितम्- पूर्वोक्तवंशेषु समुत्पन्नानां वंशधराणां तथा च प्रथमतः प्रसिद्धानां राज्ञां विशिष्टविवरणं यस्मात् एव समुपलभ्यते तत् वंशानुचरितं कथ्यते । [८३]श्रीमद्भागवतीयवचनम् अस्माभिः अत्र संयोजयितुं शक्यते । विशेषतः महर्षिणां राज्ञां च चरित्राणि यत्र समाविष्टानि, महर्षिभ्यः यत्र च राज्ञां चरित्राणि अधिकानि उपलब्धानि भवन्ति तत् पुराणेषु वंशानुचरितं कथ्यते । आचार्यबलदेवउपाध्यायाः कौटलीयार्थशास्त्रस्य जयमङ्गलाव्याख्याधृतपुराणसम्बन्धीयवचनं[८४] यत् उपस्थापयन्ति अस्मादेव लक्षणपञ्चकात् भिन्नत्वेन प्रतीयमानत्वात् तत् विचार्यम् । अधिकन्तु तत्र [८५]उपाध्यायपादैः एतत् प्रसङ्गे यादृशी युक्तिरुपस्थापिता सुरुचिरा सा न मन्यते । अन्तिमे संक्षेपतः इदमेव

---

८२. "मन्वन्तरं मनुर्देवा मनुपुत्राः सुरेश्वरः ।
ऋषयोऽशावतारश्च हरेः षड्विधमुच्यते ॥"
-श्रीभागवतपुराणे -१२/७/१५ ।

८३. "वंशानुचरितं तेषां वृत्तं वंशधराश्च ये ।
- तत्रैव - १२/७/१६ ।

८४. "सृष्टि-प्रवृत्ति-संहार-धर्म-मोक्षप्रयोजनम् ।
ब्रह्माभिर्विविधैः प्रोक्तं पुराणं पञ्चलक्षणम् ॥"
- कौटिलीयार्थशास्त्रे - १/१५ ।

८५. ध्यान देने की वात है कि धर्म पुराण का एक अविभाज्य लक्षण स्वीकार किया गया है । इसका तात्पर्य यह है कि मूलरूप से पुराण में धार्मिकविषयों का सन्निवेश अभीष्ट था । धर्म का सम्बन्ध पुराण के साथ अवान्तर

निश्चेतुं शक्यते यत् "न हि वेदेवधिकारः कश्चित् सूतस्य जायते" इति यद्वचनं पुराणे बहुशः उररीकृतमस्ति तदनुरोधेन सूतजातीयानां चरित्रचर्च्चा सन्तानपरम्परा च वंशानुचरितामिति ज्ञायते ।

पुराणस्य दशलक्षणकत्वम्-

पुराणं पञ्चलक्षणम् इत्यतः किमपि विलक्षणं पुराणे समुपलभ्यते। तत्र एवं लक्षणप्रतिपादकेषु "श्रीमद्भागवते स्थलद्वये समुपलब्धेषु लक्षणषु मूलतः प्रायः साम्यमस्ति । नामतः वैषम्यं दृष्टिगोचरीभूतं भवति । अत्र केवलं शब्दभेदं विना अभिप्रायभेदः परिलक्ष्यते । तद्यथा-

क्रमः	द्वितीयस्कन्धलक्षणम्	द्वादशस्कन्धलक्षणम्
१.	सर्गः	सर्गः
२.	विसर्गः	विसर्गः
३.	स्थानम्	वृत्तिः
४.	पोषणम्	रक्षा
५.	ऊत्तिः	हेतुः

शताब्दीयों की घटना है, जब वह विकसित होकर अन्य विषयों के भी अपने में सम्मिलित करने लगा था । आधुनिक संशोधकों का प्रायः यही सर्वमान्य मत है । परन्तु जयमङ्गला के महत्त्वपूर्ण उल्लेख से यह मत यथार्थतः विशुद्ध नहीं प्रतीत होता । मन्वन्तराणि सद्धर्म कहकर भागवत ने भी मन्वन्तर के भीतर धर्म का उपन्यास न्याय्य माना है । यह कथन पूर्वोक्त सिद्धान्त का पोषक माना जा सकता है ।

- पुराणविमर्श- पृ०- १२७ ।

८६. (क) "अत्र सर्गो विसर्गश्च स्थानं पोषणमूत्तयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥"

-श्रीभागवतपुराणे- २/१०/१ ।

(ख) "सर्गोऽस्याथ विसर्गश्च वृत्तिरक्षान्तराणि च ।
वंशो वंशानुचरितं संस्था हेतुरपाश्रयः ।"

- तत्रैव - १२/७/९ ।

क्रमः	द्वितीयस्कन्धलक्षणम्	द्वादशस्कन्धलक्षणम्
६.	मन्वन्तरम्	अन्तरम्
७.	ईशानुकथा	वंशवंशानुचरिते
८.	निरोधः	संस्था= नित्यप्रलयः नैमित्तिकप्रलयः प्राकृतिकप्रलयः
९.	मुक्तिः	संस्था= आत्यन्तिकप्रलयः
१०.	आश्रयः	आश्रयः

"ब्रह्मवैवर्त्तपुराणेऽपि पुराणस्य दशलक्षणकत्वं सन्निवेशितम् अस्ति । यद्वा भवतु पूर्वोक्ते लक्षणपञ्चके दशलक्षणस्यान्तर्भावः अस्माभिः परिकल्पनीयः अन्यथा उभयोः मतविरोधात् उभयोः अप्रामाण्यम् आपद्येत । तत्र केचन समीक्षकाः महापुराणानां दशलक्षणकत्वम् उपपुराणानां च पञ्चलक्षणकत्वमिति स्वीकुर्वन्ति । तदनुरोधेन ते पञ्चलक्षणप्रसङ्गे ब्रह्मवैवर्त्तपुराणस्य "श्रीकृष्णजन्म-खण्डीयवचनं तथा च दशलक्षणप्रसङ्गे "श्रीमद्भागवतीयवचनं समुद्धरन्ति । किन्तु तत्र उभयोः लक्षणयोः सामञ्जस्यभावात्

८७. "सृष्टिश्चापि विसृष्टिश्च स्थितिः तेषां च पालनम् ।
कर्मणां वासना वार्त्ता मनूनां च क्रमेण च ॥
वर्णनं प्रलयानां च मोक्षस्य च निरूपणम् ।
उत्कीर्त्तनं हरेरेव देवानां च पृथक् पृथक् ॥
दशाधिकं लक्षणं च महतां परिकीर्त्तितम् ॥"

-ब्रह्मवैवर्त्तपुराणस्य श्रीकृष्णजन्मखण्डे- १३१/८८-९० ।

८८. "एतदुपपुराणानां लक्षणं च विदुर्बुधाः ।
महतां च पुराणानां लक्षणं कथयामि ते ॥"

- तत्रैव - १३१/७ ।

८९. "दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।
केचित् पञ्चविधं प्राहुर्महदल्पव्यवस्थया ॥

- श्रीभागवतपुराणे - १२/७/१० ।

प्रामाणिकताविचारे अस्माभिः तत्र एकवाक्यता करणीया । तत्र पञ्चलक्षणेन सह दशलक्षणस्य कीदृशं सामञ्जस्यमस्ति तदत्र विचार्यते।

सर्गे= विसर्गहेत्वाश्रयापाश्रयाणामन्तर्भावः ।

प्रतिसर्गे= संस्थाविरधयोरन्तर्भावः ।

मन्वन्तरे= अन्तरस्यान्तर्भावः ।

वंशवंशानुचरितयोः= वृत्तिस्थानरक्षापोषणेशानुकथानामन्तर्भावः।

अतः दशलक्षणानि पञ्चलक्षणेषु अवश्यम् अन्तर्भुक्तानि भवितव्यानि इति अस्मिन् प्रसङ्गे [10]विदुषां मतं स्वीकार्यम् ।

पुराणानां प्रकारकल्पनम्-

पूर्वप्रतिपादितद्विविधलक्षणानुसारं यद्यपि पुराणानां महापुराणोपपुराणभेदेन प्रकारद्वयं परिकल्पितं तथापि तयोर्मध्ये नास्ति भेदः । साधारणतः पुराणानां प्रकारत्रयम् अस्ति । तद् यथा- महापुराणम्, उपपुराणम्, औपपुराणं चेति । संख्यागणनाप्रसङ्गे प्रत्येकस्य अष्टादशसंख्यागणनाप्रतिपादयिष्यते । इतः किञ्चित् विलक्षणसम्पन्नमभिमतं स्वामिपादैः दत्तम्, यस्य च उद्धारः [11]पुराणपर्यालोचने दृश्यते । तदनुसारं पञ्चप्रकारकाणि पुराणानि सन्ति । तानि यथा- (१) महापुराणानि, (२) उपपुराणानि, (३) औपपुराणानि, (४) उपोपपुराणानि, (५) उपौपपुराणानि चेति । वस्तुतः तत् विचार्यम्।

१०. "तस्मात् श्रीमद्भागवतीयानि दशलक्षणानि पुराणान्तरोक्तस्य ।
पञ्चलक्षणस्य प्रपञ्चमात्रमुपबृंहितरूपं वेति स्वीकारे न काऽप्यनुपपत्तिः ॥"
- पुराणपर्यालोचनस्य गवेषणात्मकभागः - पृ०- २९५ ।

११. एवं श्रीस्वामिना ज्ञानानन्दसरस्वतीमहोदयेन स्वकीये धर्मकल्पद्रुमे अष्टादशानामुपौपपुराणानामपि सङ्केतः कृतोऽस्ति । तन्मतेन पञ्चप्रकारकाणि पुराणानि सन्ति । (१) पुराणानि (महापुराणानि), (२) उपपुराणानि, (३) औपपुराणानि, (४) उपोपपुराणानि, (५) उपौपपुराणानि च । तथा चैवंविधं भेदमजानानाः केचन महापुराणेतराणां सर्वेषामुपपुराणत्वेन गणनं विधाय सर्वाणि उपपुराणष्वन्तर्भावयन्ति । तेषां मते असंख्यकानि सन्ति उपपुराणानीति सुधिभिर्विभाव्यमत्रत्यं स्वारस्यम् ।
-तत्रैव- पृ०- २८२ ।

पुराणानां संख्या-

अधुनातनयुगे प्रसिद्धिं गतानि यानि पुराणानि समुपलभ्यन्ते, वस्तुतः तानि प्रथमतः आसन् न वा इत्यस्मिन् विषये अस्ति महान् संशयः । न केवलं [१२]वेदे अपि च [१३]धर्मशास्त्रयुगपर्यन्तम् अपि पुराणस्य एकवचनत्वेन व्यवहारः उपलभ्यते । किन्तु तैत्तिरीयारण्यके पुराणानि इति समुपलब्धितः तदानीन्तनकाले अन्यूनतया त्रीणि पुराणानि आसन् इति तर्कयितुं शक्यते । तथापि ततः पूर्वं प्रथमतः वा पुराणम् एकमेव आसीत् एतस्मिन् विषये पूर्वसन्निवेशितवचनप्रामाण्यात् तथा च साक्षाद्रूपेण मत्स्यपुराणे प्रतिपादनात् नास्ति संशयः इति [१४]आचार्यकाणेमहोदयानां युक्त्यनुसारं स्वीकर्तुं शक्यते । सर्वेषां पुराणानां भगवत्स्वरूपत्वात् भगवतः पर्यायेषु सहस्रनामादिषु पुराणपुरुषरूपेणोपवर्णितत्वात् एकत्वदृष्ट्या एकवचनं संगच्छते, अपि च पुरणस्योत्पत्तिः वेदसमकालीनत्वात् वेदेन सह पुराणस्यैक्यं प्रतिपादनार्थमेकवचनं पुराणानां महत्त्वं वर्द्धयति इति मदीयो विचारः । साधारणतः अनुक्रमणिकानुसारमष्टादशपुराणानि विविधेषु पुराणेषु वर्ण्यन्ते । तान्येव पुराणानि पद्मनारदविष्णुभागवतशिववायु-मार्कण्डेयाग्निब्रह्मवैवर्त्तलिङ्गस्कन्दकूर्ममत्स्यगरुडाख्यानि[१५] ।

---

१२. अथर्ववेदे- ११/७/२५ ।

१३. (क) "पुराणो मानवो धर्म साङ्गोपाङ्गोक्तमिश्रितः ।"

- तन्त्रवार्तिके - १/३/२७ ।

(ख) "अथ पुराणे श्लोकानुदाहरन्ति ।"

- आपस्तम्बधर्मसूत्रे- १/६/१९/१३ ।

(ग) याज्ञवल्क्यस्मृतौ- १/३ ।

१४. (क) "पुराणमेकमेवासीत्तदा कल्पान्तरेऽनघः ।
त्रिवर्गसाधनं पुण्यं शतकोटिप्रविस्तरम् ॥"

- मत्स्यपुराणे - ५/३४ ।

(ख) It is unlikely that originally there was only a single work called Puran.

-History of Dharmasastra. Vol- I,P.409.

१५. शिवपुराणे उमासंहितायाम्- ४४/१२०-१२२, वायुपुराणे-१०४/३-११, नारदपुराणे - ९२/१-३, मार्कण्डेयपुराणे- १३७/८-१०,

यद्यपि अष्टादशपुराणानामुल्लेखो वर्त्तते तथापि तान्येव न सर्वत्र समानानि वर्ण्यन्ते । उदाहरणतः नारदपुराणे यस्मिन्स्थले वायवीय-पुराणस्य नामोल्लेखः कृतः अन्येषु एव पुराणेषु तस्मिन् स्थले शिवपुराणस्योल्लेखो दृश्यते । [९६]देवीभागवते अष्टादशपुराणानामाद्यक्षराणां निर्देशप्रसङ्गे यत् प्रतिपादितम् अस्ति तस्मादेव वायुपुराणस्य सत्त पुराणपर्यायेे एव आगच्छति । तत्र शिवपुराणस्य वायवीयसंहितायाः वायुप्रोक्तत्वात् तदेव वायुपुराणानाम्ना प्रसिद्धं जातमिति तर्कयितुमवसरः मिलति यत्-

यथा शिवस्तथा शैवपुराणं वायुनोदितम् ।
शिवभक्तिसमायोगान्नमद्वयं विभूषितम् ॥ इति

उभयोः पुराणयोरैक्यमिति बङ्गलाविश्वकोषकारप्रभृतीनां मतमपास्य विद्वद्भिः [९७]पुराणपर्यालोचने यादृशी युक्तिः अन्तिमे [९८]प्रदत्ता

श्रीभागवतपुराणे- १२/७/२३-२४, १२/१३/३-८, अग्निपुराणे- २७२/१-२३, लिङ्गपुराणे- ३९/६१-६३ , ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे - १३०/११२२, स्कन्दपुराणे प्रभासखण्डे- १/२८-७६, कूर्मपुराणे पूर्वार्द्धे - १/३-५, मत्स्यपुराणे- ५३/६४,गरुडपुराणे- २१५/१५-२६।

९६. "मद्वयं भद्वयं चैव व्रत्रयं वाचतुष्टयम् ।
अना-प-लिङ्गकूस्कानि पुराणानि प्रचक्षते ॥"
- देवीभागवते - १/३/२१

९७. तत्र युक्तिसहं प्रमाणपुष्टं च 'एसिआटिक् सोसाइटी' कलिकतातः आनन्दाश्रमः संस्कृतग्रन्थावलीपुनातः, महामहोपाध्यायपण्डितपञ्चानन-तर्करत्नद्वारासम्पादितवङ्गवासीप्रेससंस्करणात् गुरुमण्डलग्रन्थमालायां कलिकतातश्च प्रकाशितस्य वायुपुराणस्य विषयसूची, वेङ्कटेश्वरप्रेस बम्बईतः, पण्डितपुस्तकालयवारणासीतश्च प्रकाशितस्य शिवपुराणस्य विषयसूचितः सर्वथाऽस्ति भिन्ना । अतो वायुपुराणं शिवपुराणान्तर्गतमिति स्वीकरणम् उभयोरैक्यं चेति मतमप्रामाणिकम् ।
- पुराणपर्यालोचनस्य गवेषणात्कभागः- पृ०- १७७ ।

९८. अतः श्रीमद्भागवतदेवीभागवतयोरिवेतरयोरपि महापुराणत्वं मतान्तरेणाङ्गीकार्यमिति सुधिभिर्विभावनीयम् ।
- तत्रैव- पृ०- १९० ।

सा एव सुरुचिरा मन्यते । "हाजराप्रभृतिभिः विद्वद्भिः मूलतः इत्थमेव अभिमतं दत्तम् । अतः पाठसौकर्यात् महापुराणत्वे उभयोः [९९]पर्यालोचनदृष्ट्या विकल्पकल्पनेन काचित् हानि इति सुस्थितम् अन्तर्निहितदोषाष्टक[१०१]निवारणपुरस्सरम् इति ।

एतेषामष्टादशपुराणानां श्लोकसंख्यासम्बन्धीयनिर्देशः विभिन्नेषु पुराणेषु समुपलभ्यते । तत्तत्पुराणेषु श्लोकसंख्यायाः तारतम्यप्रदर्शनात् पाठसौकर्यार्थं सोऽयं निर्देशः एकत्र समुपस्थाप्यते ।

अष्टादशपुराणानां श्लोकसंख्यासूची (सहस्रभेदेन)-

क्रमः	पुराणानां	श्रीमद्भागवते	अग्निपुराणे	देवीभागवते	मत्स्यपुराणे
१.	ब्रह्मपुराणम्	१८०००	२५०००	१००००	१३०००
२.	पद्मपुराणम्	५५०००	१२०००	५५०००	५५०००
३.	विष्णुपुराणम्	२३०००	२३०००	२३०००	२३०००
			वायुपुराणे	वायुपुराणे	वायुपुराणे
४.	शिवपुराणम्	२४०००	१४०००	२४६००	२४०००

९९. There has been a confusion between the Vayu and the Siva Puranas as to which comes under the catagory of the Mahapuranas. In priority of date, style, contents and the peculiar classification into four Padas the Vayu can easily be ranked as the Mahapurana.

-The puranas : a study- by R.C.Hazra, IHQ, Vol-VIII, P.766.

१००. तस्मात् शिवपुराणं वायुपुराणस्य विकल्पाङ्गीकरणमेव युक्तियुक्तं प्रामाणिकं च।

पुराणपर्यालोचनस्य गवेषणात्मकभागः - पृ०- १७७ ।

१०१. विकल्पेऽस्ति दोषाष्टकम्, तद्यथा-

"प्रमाणत्वाप्रमाणत्वं परित्यागप्रकल्पने ।
प्रत्युज्जीवनहानिभ्यां अष्टौ दोषाः प्रकीर्त्तिता ॥

- मीमांसान्यायप्रकाशे- पृ०- २७७ ।

(क) अत्र वायुपुराणस्य प्रमाणत्वे शिवपुराणस्य प्रमाणत्वस्य परित्यागः ।

(ख) वायुपुराणस्य प्रमाणत्वस्य स्वीकारे शिवपुराणस्य अप्रमाणत्वस्य प्रकल्पनम् ।

(ग) परित्यक्तवायुपुराणस्य पुनः प्रमाणत्वे प्रत्युज्जीवनम् ।

(घ) प्रकल्पितवायुपुराणस्य अप्रमाणत्वस्य हानिः इति पक्षद्वये दोषाष्टकम्।

५. श्रीमद्भागवतपुराणम्	१८०००	१८०००	१८०००	१८०००
६. नारदीयपुराणम्	२५०००	२५०००	२५०००	२५०००
७. मार्कण्डेयपुराणम्	९०००	९०००	९०००	९०००
८. अग्निपुराणम्	१५४००	१२०००	१६०००	१६०००
९. भविष्यपुराणम्	१४५००	१४०००	१४५००	१४५००
१०. ब्रह्मवैवर्त्तपुराणम्	१८०००	१८०००	१८०००	१८०००
११. लिङ्गपुराणम्	११०००	११०००	११०००	११०००
१२. वराहपुराणम्	२४०००	१४०००	२४०००	२४०००
१३. स्कन्दपुराणम्	८१०००	८४०००	८१०००	८१०००
१४. वामनपुराणम्	१००००	१००००	१००००	१८०००
१५. कूर्मपुराणम्	१७०००	८०००	१७०००	१००००
१६. मत्स्यपुराणम्	१४०००	१३०००	१४०००	१४०००
१७. गरुड़पुराणम्	१९०००	८०००	१९०००	१८०००
१८. ब्रह्माण्डपुराणम्	१२०००	१२०००	१२१००	१२२००

पुराणानां वर्गीकरणम्-

महापुरणानामष्टादशसंख्यानिर्देशानन्तरं तेषां वर्गीकरणमपि पुराणेषु समुपलभ्यते । तदेव विभाजनं सात्त्विकं राजसं तामसं चेति भेदेन त्रिविधम् । विष्णु-नारद-भागवत-गरुड-पद्म-वराहपुराणानि सात्त्विकपुराणत्वेन, ब्रह्माण्ड-ब्रह्मवहवर्त्त-मार्कण्डेय-भविष्य-वामन-ब्रह्मपुराणानि राजसपुराणत्वेन, तथा च मत्स्य-कूर्म-लिङ्ग-स्कन्द-शिवाग्निपुराणानि तामसपुराणत्वेन प्रसिद्धानि । त्रिविधमित्थं वर्गीकरणं [१०२]पद्मपुराणे वर्णितमस्ति । न केवलमेतदपि च

१०२. "वैष्णवं नारदीयं च तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ।
सात्त्विकानि पुराणानि विज्ञेयानि शुभानि वै ॥
ब्रह्माण्डं ब्रह्मवैवर्त्तं मार्कण्डेयं तथैव च ।
भविष्यं वामनं ब्राह्मं राजसानि निबोध मे ॥
मात्स्यं कौर्मं लैङ्गं शैवं स्कान्दं तथैव च ।
आग्नेयं च षडेतानि तामसानि निबोध मे ॥"

-पद्मपुराणे उत्तराखण्डे - २३६/१९-२१ ।

[१०३]गरुडपुराणे सात्त्विकपुराणानां सात्त्विकमधमं, सात्त्विकमध्यमं, सात्त्विकमुत्तमं चेति त्रिविधः उपभेदः परिकल्पितोऽस्ति । तत्र सात्त्विकेऽधमे मत्स्यकूर्मपुराणे, सात्त्विकमध्यमे वायुपुराणं, सात्त्विकोत्तमे विष्णु-भागवत-गरुडपुराणानि च परिगणितानि सन्ति। किन्तु [१०४]मत्स्य-पुराणानुसारं विष्णोर्माहात्म्यप्रतिपादकानि पुराणानि सात्त्विकपुराणानि, ब्रह्मणः अग्नेश्च माहात्म्यप्रतिपादकानि राजसपुराणानि, शिवस्य माहात्म्यप्रतिपादनानि तामसपुराणानि इति त्रिधा विभाजनम्। सरस्वत्या तथा च पितॄणां महत्त्वप्रतिपादकानि पुराणानि सङ्कीर्णपुराणानि इति चतुर्विधत्वाभिधानात् विलक्षणोऽयं उपन्यासः मन्यते । किन्तु पद्मपुराणे[१०५] फलश्रुत्यनुसारं प्रसिद्धानि एतानि त्रिणि प्रकाराणि सात्त्विक-राजस-तामसभेदेन यथाक्रमं मोक्ष-स्वर्ग-निरयप्राप्ति-फलदातृत्वात् अभिलेखान्तर्गतानि भवितुं युज्यते । शिवब्रह्मादेवी-हरीणां माहात्म्यप्रतिपादकत्वेन अष्टादशपुराणानां चतुर्द्धावर्गीकरणं [१०६]स्कन्दपुराणे दृष्टिगोचरीभूतं भवति । पञ्चलक्षणकस्य पुराणस्य प्राचीनप्राचीनोत्तरत्वेन यत् द्विधा विभाजनं कृतं [१०७]विमर्शकैः समुपस्थाप्यते तत् तादृशं न शोभनं यथा

---

१०३. "सत्त्वाधमे मत्स्यकूर्मे तदाहुर्वायुं चाहुः सात्त्विकं मध्यमं च ।
विष्णोः पुराणं भागवतपुरणं सत्त्वोत्तमे गारुडं प्राहुरार्याः ॥"
-गरुडपुराणे - ५/२४/२१ ।

१०४. "सात्त्विकेषु पुराणेषु माहात्म्यमधिकं हरेः ।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥
तद्वदग्नेश्च माहात्म्यं तामसेषु शिवस्य च ।
सङ्कीर्णेषु सरस्वत्याः पितॄणां च निगद्यते ॥"
-मत्स्यपुराणे- ५३/३८-३९ ।

१०५. "सात्त्विका मोक्षदाः प्रोक्ताः राजसा स्वर्गदाः शुभा ।
तथैव तामसाश्चेति निरयप्राप्तिहेतवः ॥
-पद्मपुराणे उत्तराखण्डे- २३६/२१ ।

१०६. "अष्टादशपुराणेषु दशभिर्गीयते शिवः ।
चतुर्भिभगवान् ब्रह्मा द्वाभ्यां देवी तथा हरिः ॥"
-स्कन्दपुराणे केदारखण्डे- १/३०/३८ ।

१०७. पुराण के पञ्चलक्षण को आधारमान प्राचीन और प्राचीनतर वे दो लेख

सात्त्विकादिभेदकल्पनम् । इत्थभूतेषु पुराणेषु यद्यपि धार्मिक-सामाजिक-राजनैतिकविषयाः दृष्टिगोचरीभूताः भवन्ति, तथापि मुख्यतया धार्मिकविषयाः आलोचिताः भवन्ति ।

पुराणानां कालः-

पुराणानां रचना कस्मादेव कालात् आरब्धा, एतद्विषये न केवलं पुराणेषु अपि तु अन्येषु प्रसिद्धेषु शास्त्रेषु न कुत्रचित् किमपि तथ्यं समुपलभ्यते । किन्तु पुराणानां मूलरूपं वैदिककालेऽपि आसीत् इति [१०८]नारदवचनात् सुस्पष्टं भवति । आधुनिकविदुषां[१०९] तथाविधः आशयः परिलक्ष्यते । पुराणेषु वर्णिततीर्थादिप्रसङ्गेभ्यः निर्दिष्टपुराणस्य देशादिनिर्द्धारणे यथा सामर्थ्यं मिलति कालनिर्द्धारणे तथा नोपलभ्यते । एतस्मिन्नेवप्रसङ्गे [११०]विद्वद्भिः स्वाभिमतं यत् दत्तं तत् असमीचीनमिति कथयितुं न शक्यते । अधिकन्तु सुस्पष्टरूपेण उपलब्धानां प्रक्षिप्तपाठानां समालोचनया निर्दिष्टपुराणस्य वस्तुतः कालः कः तस्य सिद्धान्तार्थं पन्था न मिलति । तथापि पुराणानां समयस्य निर्द्धारणम् अत्यन्तम् असम्भवं नास्ति । [१११]पर्यालोचनदृष्ट्या प्राचीनमतपोषकाणां विदुषां

विभाग किये जा सकते हैं । इस कसौटी के अनुसार वायु-ब्रह्माण्ड-मत्स्य और विष्णु प्राचीन मालूम पडते हैं । क्योंकि उन चारों में पुराण के पांचो विषय उचित परिमाण में वर्णित है । इनसे भिन्न पुराणों को प्राचीनोत्तर वर्ग में अन्तर्भुक्त समझना चाहिए ।

- पुराणविमर्शे -पृ०- ९१-९२ ।

१०८. छान्दोग्योपनिषत् - ७/१/२ ।

१०९. In the epoch of the Brahmanas and the Upanishads, we already find some references to a form of composition allied to the puranas. It seems that the earlier Puranas were composed in the last stages of the Vedic period but what these puranas were we can not say at present with any definiteness:

-The puranas, a study: R.C.Hazra, IHQ Vol-VIII, Mar.1932.

११०. पुराणविमर्शः- पृ०- ५३० ।

१११. एवं प्राचीनपरम्परापोषका विद्वांसः पुराणानां निर्माणकालं कलिद्वापरयोः सन्धिकालं मन्यन्ते । तेषां मान्यतानुसारं महर्षिव्यासो हि सरस्वतीनद्याः

मतानुसारं महर्षिव्यासप्रणीतत्वात् पुराणानां रचनाकालः कलिद्वापरयुगयोः सन्धिकालः । प्रसङ्गेऽस्मिन् स्वाभिमतं प्रतिपादयन्तः केषांचन पुराणानां रचनाकालः अत्यन्तं प्राचीनः, महाभारतस्य रचनाकालतः पूर्ववर्त्ती, अपरेषां पुराणानां रचना अर्वाचीनयुगे संघटिता इति च मन्यमानाः [११२]हाजरामहोदयाः साध्वीं युक्तिं सर्वेषां पुरतः उपस्थापयन्ति । वस्तुतः अतिप्राचीनकालादेव पुराणानां रचना जाता इति निश्चप्रचम् ।

पुराणानां प्राचीनत्वेऽपि कस्य कस्य क्रमशः प्राचीनत्वं कस्य कस्य वा क्रमशः अर्वाचीनत्वमिति विषयोऽपि संशयमूलकः भवेत् । एकधिकेषु पुराणेषु निर्दिष्टस्य एव विषयस्य प्रतिपादनात् तत्र मूलरूपेण किं पुराणं स्वीकर्त्तव्यम् इत्यत्र विचारे कृते विषयैकत्वप्रतिपादकेषु पुराणेषु यस्मिन्नेव पुराणेषु सम्पूर्णमेव निर्दिष्टं तथ्यं समासतः सन्निविष्टं भवति तदेव प्राचीनतमं पुराणमिति अभिमतपोषकाणां [११३]विमर्शकारिणां श्रीकृष्णचरितोपस्थापनपूर्वकं दृष्टिगोचरीभूता युक्तिः सुरुचिरा मन्यते ।

तीरस्थे स्वाश्रमे समुपविष्टो ध्याननिमग्नः सन् समग्रं पुराणसाहित्यं प्रणीतवान् । परन्तु ऐतिहासिकपद्धत्या विचारकर्त्तारः आधुनिकाः समालोचकाः मतमिदं न मन्यन्ते । तेषां मते स्वयं पुराणैः इदमित्थं रूपेणात्मनो निर्माणविषये न किमपि प्रोक्तमस्ति । अतस्तन्मतेऽवान्तरशताब्दीषु पुराणानां प्रणयनं संस्कारः प्रतिसंस्कारश्च निरन्तरं जायते एव ।

-पुराणपर्यालोचनस्य गवेषणात्मकभागः - पृ०- १२६ ।

११२. The some puranas were prior to the Mahabharat is evident from the fact that the puranas in general, with the exception of the Markandeya and perhaps few more do not mention by name either the Mahabharat or the Ramayana, though they are familiar with the narrations and legends found mentioned therein.

-The Puran : a study - R.C.Hazra, IHQ, Vol No. VIII, Calcutta, March, 1932

११३. भगवान् श्रीकृष्ण के चरित्र की ही मीमांसा इस बिषय में दृष्टान्त रूप से ली जा सकती है । यह चरित्रमूल में तो एकाकार ही है । परन्तु घटनाओं के विन्यास से इसका क्रमविकाश भी अनुसन्धेय है । जितना कम विस्तार

पुराणानां रचनाकालनिर्द्धारणानन्तरं सम्प्रति निर्दिष्टस्य पुराणस्य कालविचारार्थं प्रथमतः संक्षिप्तोपन्यासः प्रदीयते ।

अष्टादशपुराणानां रचनाकालः-

१. ब्रह्मपुराणम् - दशमशताब्दीतः त्रयोदशशताब्दीमध्ये अस्य रचनाकालः ।

२. पद्मपुराणम् - अष्टमशताब्दीतः चतुर्द्दशशताब्दीमध्ये अस्य रचनाकालः ।

३. विष्णुपुराणम् - पञ्चमशताब्दीतः नवमशताब्दीमध्ये अस्य रचनाकालः ।

४.(क)वायुपुराणम् - पञ्चमशताब्दी अस्य रचनाकालः ।

(ख)शिवपुराणम् - दशमशताब्दी अस्य रचनाकालः ।

५. श्रीमद्भागवतपुराणम् - चतुर्थशताब्दीतः षष्ठशताब्दीमध्ये अस्य रचनाकालः ।

६. नारदीयपुराणम् - नवमदशमशतकयोर्मध्ये अस्य रचनाकालः।

७. मार्कण्डेयपुराणम् - तृतीयशताब्दीतः दशमशताब्दीमध्ये अस्य रचनाकालः ।

८. अग्निपुराणम् - अष्टमनवमशतकयोर्मध्ये अस्य रचनाकालः ।

९. भविष्यपुराणम् - पञ्चमशतकाद्द्वादशशतकमध्ये अस्य रचनाकालः ।

१०. ब्रह्मवैवर्त्तपुराणम् - अष्टमशताब्दीतः दशमशतकमध्ये अस्य रचनाकालः, परवर्तिरचनाकालः पञ्चदशषोडशशतकमध्ये ।

११. लिङ्गपुराणम् - दशमशतके अस्य रचनाकालः ।

१२. वराहपुराणम् - अष्टमशतकात् एकादशशतकमध्ये अस्य रचनाकालः ।

होगा, किसी पुराण में, वह उतना ही प्राचीन होगा । मान्यता यह है की प्राचीन पुराण में कृष्ण चरित की स्थूल कतिपय घटनाएं ही उल्लिखित हैं, और अवान्तर काल में श्रीकृष्ण के माहात्म्य तथा आकर्षण की अभिवृद्धि होने से उस चरित में नयी यी घटनाएं जोडकर उसे परिपुष्ट किया गया है ।

-पुराणविमर्शे - पृ०- ५३३ ।

१३. स्कन्दपुराणम् - सप्तमशताब्दीतः त्रयोदशशताब्दीमध्ये अस्य रचनाकालः ।

१४. वामनपुराणम् - नवमशताब्दीतः चतुर्दशशताब्दीमध्ये अस्य रचनाकाल ।

१५. कूर्मपुराणम् - पञ्चमशताब्दीतः एकादशशतकमध्ये अस्य रचनाकालः ।

१६. मत्स्यपुरारम् - तृतीयशतकचतुर्दशशतकयोर्मध्ये अस्य रचनाकालः ।

१७. गरुडपुराणम् - अष्टमशताब्दीतः दशमशताब्दीमध्ये अस्य रचनाकालः ।

१८. ब्रह्माण्डपुराणम् - चतुर्थशताब्दीतः एकादशशताब्दीमध्ये अस्य रचनाकालः ।

आर्.सी.हाजरामहोदयमतानुसारं ब्रह्मपुराणे वर्णितपुरुषोत्तम-क्षेत्रस्य माहात्म्यवर्णना नवमशताब्दीतः द्वादशशताब्दीमध्यवर्त्तिकाले जाता इति यतः मार्कण्डेयसरोमध्ये प्रतिष्ठितशिवमन्दिरलेखातो ज्ञायते यत् मन्दिरमिदं ८२०तमे ख्रीष्टवर्षे कुण्डलकेशरिणा निर्मितम् । अतएव इतः पूर्वमेव पुरुषोत्तममाहात्म्यं वर्णितमासीत् इति कथयितुं न शक्यते ।

पुरुषोत्तमक्षेत्रस्य प्रसिद्धिः [११४]प्रागेव आसीत् । हाजरामहोदयाः कथयन्ति यत् ब्रह्मपुराणस्य अष्टाविंशतितमाध्यायात् सप्ततितमाध्यायं

११४. The determination of the date of the composition of the chapters on Purusottam-Khetra Mahatmya is rather difficult. The could not have possible been writers earlier than the end of the ninth century A.D. Because there is mention of the Siva temple at the side of Markandeya lake. This temple was built in 820AD by Kundala Kesharin King of Orissa. Again, the expensive stone temple, which the mythical king Indradyumna is said to have built at Purusottamkhetra, may be identical with that built by Anant Varman Chodaganga (Saka 998-1069) one of the eastern Ganga kings of Orissa. He was a good patron of religious works and charities and under his orders was built the great temple of Jagannath at Puri.

यावत् भागस्य रचनाकालो नवमशतकात् द्वादशशतकयोर्मध्ये भवितुं [115]शक्यते ।

[116]हाजरामहाभागानां मतानुसारं स्कन्दपुराणस्य पुरुषोत्तमक्षेत्र-माहात्म्यभागः त्रयोदशशतकात् पूर्वं रचितः । नारदपुराणस्य रचना-कालः दशमशतकम् । परन्तु तस्य मतानुसारेण नारदीयपुराणस्य उत्तरभागस्य द्विपञ्चाशदध्यायात् एकषष्ट्यध्यायं यावत् यत्र पुरुषोत्तम-क्षेत्रस्य माहात्म्यं वर्णितविषयः सः ब्रह्मपुराणवर्णना समानः । अतएव नारदीयपुराणे वर्णितं पुरुषोत्तमक्षेत्रमाहात्म्यं तु ब्रह्मपुराणात् एव आगतम्[117] । पद्मपुराणस्य पातालखण्डस्य प्रथमाध्यायादष्टषष्टि-तमाध्यायं यावत् यत्र पुरुषोत्तमक्षेत्रविषयिणी चर्च्चा वर्त्तते, तस्य रचना षष्ठशताब्द्याः[118] अन्तिमभागात् परं जाता । अतएव पातालखण्डे पुरुषोत्तमक्षेत्रस्य वर्णना विस्तृता नदृश्यते यथा ब्रह्म-नारद-स्कन्दपुराणेषु वर्त्तते । अतएव आनुमानिकसमयनिर्द्धारणक्रमेण

---

x x x x

That is the chapters on Purusottamkshetra were incorporated into the present Brahma not later that the middle of the 12th century A.D.

- P.R.H.C.-R.C. Hazar, pp. 152-153.

११५. Chapter 28-70 most propably not earlier than the end of the 9th Century, certainly not later than the middle of the 12th century.

-P.R.H.C.-R.C.Hazra, pp. 155-156

११६. The Purusottam Kshetra Mahatmya contains chapter which must be dated earlier than 1300 A.D.

-Ibid, p.165

११७. These chapters are compartively late additions and generally derived from other sources. For instance Narada Puran Part-II 52-61 have many verses in common with Brahmapurana 28 and 45 ff.

-Ibid, p.132

११८. Chapter 1-68 were written later than the end of the sixth century A.D.

-Ibid, p.117

श्रीजगन्नाथविषयप्रतिपादकानां पुराणानां क्रमविभागः एवं भवितुमर्हति यथा- मत्स्यपुराणं तृतीयशतके, विष्णुपुराणं पञ्चमशताब्दीतः नवमशताब्दीमध्ये, कूर्मपुराणं पञ्चमशताब्दीतः एकादशशताब्दीमध्ये, पद्मपुराणस्य पातालखण्डः षष्ठशताब्द्यां, गरुडपुराणमग्निपुराणं च अष्टमदशमशतकयोर्मध्ये, नारदपुराणं नवमदशमशतकयोर्मध्ये, ब्रह्मपुराणं द्वादशशतके, स्कन्दपुराणं त्रयोदशशतके च रचितानि । अतएव इन्द्रद्युम्नसरः पुरुषोत्तमविमलादेवीनामप्रतिपादकं मत्स्यपुराणं प्राचीनतममिति कथयितुं युज्यते ।

उत्कलानां पौराणिकप्रसिद्धिः-

पुरुषोत्तमः श्रीजगन्नाथः उड्रदेशे उत्कलदेशे वा बहुप्राचीनकालात् उपासितोऽस्ति इति बहुत्र प्रतिपादितम् ।

भौगोलिकदृष्ट्या भारतवर्षे साम्प्रतं यस्य प्रदेशस्य पूर्वस्यां दिशि वङ्गोपसागरः, उत्तरदिशि बिहारपश्चिमवङ्गप्रदेशौ, पश्चिमदिग्भागे बिहारमध्यप्रदेशौ, दक्षिणदिशि आन्ध्रप्रदेशश्च वर्त्तन्ते स एव ओडिशाप्रदेशः प्राचीनकाले उत्कलसंज्ञया प्रथितः आसीदिति ऐतिहासिकानां सिद्धान्तः तन्त्रेषु श्रीजगन्नाथसंस्कृतिविषयस्यालोचनावसरे विमलाश्रीजगन्नाथावाधारीकृत्य उड्रोत्कलयोः सांस्कृतिकसंज्ञयोरैक्यमिति यद्यपि सिद्धान्तितं तथापि उड्रेति संज्ञा उत्कलसंज्ञातः अवश्यमर्वाचीना येन च ओडिशेति संज्ञा परवर्त्तिनि काले जाता इति निर्णेतुं शक्यते । एतदवसरे अस्य देशस्य कलिङ्गेत्यपरसंज्ञा जाता ।

कलिङ्गाः खीष्टीयपूर्वद्वितीयशतके प्रसिद्धतीर्थस्थानरूपेण परिचिताः आसन् इति [११९]महाभारतात् ज्ञायते । पाण्डवाः तीर्थाटनावसरे वैतरणीनद्यां स्नानतर्पणादिकं समाप्य यस्याः महावेद्याः दर्शनं कृतवन्त तत् श्रीजगन्नाथत्रेक्षमिति तर्कयितुं युज्यते ।

---

११९. "भ्रातृभिः सहितो वीरः कलिङ्गान् प्रति भारत ॥
एते कलिङ्गा कौन्तेय यत्र वैतरणी नदी ।
यत्रायजत धर्मोऽपि देवाचरणमेत्य वै ॥"

- महाभारतस्य वनपर्वणि - ११४/३-४ ।

कलिङ्गस्यावस्थितिर्विविधमतानुसारं कुत्रचित् [120]मध्यप्रदेशस्य भागलपुरतः आरभ्य पूर्वगङ्गां यावत् तथा दक्षिणतः गञ्जाममण्डलं यावत् कुत्रचिच्च [121]श्रीजगन्नाथपुरीतः कृष्णानदीं यावत् आसीदिति ज्ञायते । साम्प्रतिकश्रीजगन्नाथपुरी प्राचीतकाले कलिङ्गान्तर्गता आसीदिति निश्चितम् । किन्तु किम्बदन्त्यनुसारमुतथ्यसुदेष्णयोः[122] यौनसम्पर्कात् जातेषु पञ्चमपुत्रेषु कलिङ्गः अन्यतमः आसीत् यदधिकृतदेशस्य नाम कलिङ्ग इति । [123]स्थलविशेषे कलिङ्गदेश यद्यपि अपवित्रदेशत्वेन परिचितः तथापि [124]अन्यत्र तस्य महनीयता प्रकटिता। कालक्रमेण त्रिकलिङ्गमध्ये कलिङ्गस्यान्तर्भावो जात इति [125]प्रमुखैतिहासिकानां मतम् । त्रिकलिङ्गाधिपतित्वेन परवर्तिसमये

---

१२०. Pargiter : Ancient Indian Historical Tradition, p.158

१२१. "जगन्नाथात् पूर्वभागात् कृष्णातीरान्तगं शिवे ।
कलिङ्गदेशः सम्प्रोक्तो वाममार्गपरायणाः ॥"
- शक्तिसङ्गमतन्त्रे सप्तमपटले ।

१२२. "अङ्गो वङ्गः कलिङ्गश्च पुण्ड्रः सुह्यश्चते स्मृतः ।
तेषां देशः समाख्यातः स्वनाम्ना प्रथिता भूवि ॥
कलिङ्गविषयस्यैव कलिङ्गस्य च स स्मृतः ॥"
- महाभारते आदिपर्वणि- ९८/५१,५२ ।

१२३ (क) "किरातावर्वरासिद्धा वैदेहास्ताम्रलिपिका ।
श्चोड्र म्लेच्छाः ससैरिन्द्रा पार्वतीयाश्च सत्तमा ॥"
-पद्मपुराणे आदिखण्डे - ५/५२ ।

(ख) वायुपराणे- ७८/३३ ।

(ग) बौधायनधर्मसूत्रे- २/२/१६ ।

१२४- "कोशलाः काशयोऽङ्गाश्च कलिङ्गा मागधस्तथा ।
चेदयश्च महाभागा धर्मं जानन्ति शाश्वतम् ॥"
- महाभारते कर्णपर्वणि - ४५/१४/१५ ।

१२५. (क) J.B.O.R.S., Vol- XIV, 145
(ख) J.A.H.R.S., Vol-VI, part-1, p.25
(ग) Orissa in Making, pp. 172, 182, 194
(घ) History of North Eastern India , p.161
(ङ) I.H.Q., Vol-VIII, p.29

गङ्गवंशीयराजानः परिचिता आसन् । आलोचनावसरे त्रिकलिङ्गमध्ये यस्य उत्कलस्य नाम आगच्छति तस्य अतीव प्राचीनता दृश्यते । वैवस्वतमनोः दशपुत्रेषु इच्छानुरूपधारिणोः इलासुद्युम्नयोः यौनसम्पर्कात् उत्कप्रभृतीनां जन्म अभवत् । कालक्रमेण तत्तत्पुत्रशासितदेशानां नामानि उत्कलप्रभृतीनि जातानीति पौराणिकी[126]प्रसिद्धिः विद्यते । ब्रह्म-श्रीमद्भागवत-ब्रह्माण्ड-मत्स्य-वायुप्रभृतिषु पुराणेषु अपि उत्कलप्रभृतिभिः अधिकृताः देशाः उत्कलादयः आसन् इति [127]उपलभ्यते । एतद्व्यतिरेकेण [128]कपिलसंहितायां [129]बृहत्संहितायां च कोशलप्रभृतिभिः सह उत्कलस्य नामोल्लेखः प्राप्यते । स्कन्दपुराणे उत्कलखण्डः नाम्ना एकः

---

१२६. वायुपुराणे- ८५तमाध्याये ।

१२७. (क) "उत्कलश्च गयश्चैव विनताश्वश्च भो द्विजा ।
उत्कलस्योत्कलविप्रा विनताश्वश्च पश्चिमा ॥"
- ब्रह्मपुराणे - ७/१८ ।

(ख) "तस्योत्कलगयो राजन् विमलश्च सुतास्त्रयः ।
दक्षिणापथराजानौ बभुवु धर्मवत्सलाः ॥"
- श्रीमद्भागवतपुराणे- ९/१/४१ ।

(ग) "उत्कलश्च गयश्चैव विनतश्च तथैव च ।
उत्कलस्योत्कल राष्ट्रं विनतस्यापि पश्चिमम् ॥"
-ब्रह्माण्डपुराणे- २/७०/१८ ।

(घ) "उत्कलो वै गयस्तद्वद्धरिताश्वश्च वीर्यवान् ।
उत्कलस्योत्कला नाम गयस्य तु गया मता ॥"
"अजमीढोऽस्वहार्यश्च ह्युत्कलः कविरेव च ।"
- मत्स्यपुराणे - १२/१७, १४५/१०३ ।

(ङ) वायुपुराणे- ६९/२४० ।

१२८. "वर्षाणां भारतः श्रेष्ठः देशानामुत्कलः स्मृतः ।
उत्कलस्य समो देशो देशो नास्ति महीतले ॥"
- कपिलसंहितायाम् - १/१ ।

१२९. "उदयगिरि-उड्र-पौण्ड्रो सोत्कल काशीमेकला ।
स्वष्टाताम्रलिपिककोशलकवर्द्धमानश्च आग्नेयादिशिः कोशलकलिङ्गा ॥
- वृहत्संहितायाम् ।

स्वतन्त्रभागः कल्पितोऽस्ति यत्र उत्कलदेशस्य माहात्म्यवर्णनया साकं जगन्नाथ-क्षेत्रस्य प्रान्तदेशत्वेन परिचयो लभ्यते । किन्तु [130]ब्रह्मपुराणे पुरुषोत्तमवर्णनाप्रसङ्गे ओड्रोत्कलयोः ऐक्यमिति प्रतिपादितम् । न केवलमेतदपि च [131]पद्मपुराणे [132]महाभारते [133]वाल्मिकीयरामायणे च कलिङ्गोत्कलदेशस्य वर्णना समुपलभ्यते । अतः यः उड्र देशे

---

१३०. (क) "तत्रास्ते भारते वर्षे दक्षिणोदधिसंस्थिते ।
औड्रदेशे इति ख्यातः स्वर्गमोक्षप्रदायकः ॥
पुत्रदारधनैर्युक्ता दातारः सत्यवादिनः ।
निवसत्युत्कले पुण्ये यज्ञोत्सव विभूषिते ॥"

- ब्रह्मपुराणे - २८/१,७ ।

(ख) "समुद्रस्योत्तरतीरे तस्मिदेशे द्विजोत्तमा ।
आस्तेगुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ॥"

- तत्रैव - ४२/१३ ।

(ग) "आस्ते तत्र मुनिश्रेष्ठ ! विख्यातपुरुषोत्तमः ।
यावमुत्कलमर्यादा दिक्क्रमेण प्रकीर्त्तिता ॥"

-तत्रैव - ४२/३५ ।

(घ) "आस्ते यत्र स्वयं देवो मुक्तिदः पुरुषोत्तम ।
धन्यास्ते विबुधाप्रख्या ये वसन्त्युत्कले नराः ॥"

- तत्रैव - ४२/४४ ।

१३१. (क) "वोधा मन्द्रः कलिङ्गाश्च काशयोपरकाशयो ।"

- पद्मपुराणे आदिखण्डे - ६/३७ ।

(ख) "द्रोषकाश्च कलिङ्गाश्च किरातानां च जातयः ।"

- तत्रैव- ५/६४ ।

१३२. (क) "शूरसेनाः कलिङ्गाश्च बौधा मौकास्तथैव च ॥"

- महाभारते भीष्मपर्वणि - १०/३९ ।

(ख) "उत्तमोजा दशर्णाश्च मेकलाश्चोत्कलैः सह ।"

- तत्रैव - द्रोणपर्वणि - ४/८ ।

१३३. "मेखलानुत्कलाश्चैव दशार्ण नगराण्यपि ।
अवन्तीमभ्रवन्तीं च सर्वमेवानुपश्यत ॥"
"तथावङ्गान् कलिङ्गाश्च कौशिकाश्च समन्ततः ॥"

- रामायणे किष्किन्धाकाण्डे - ४०/१०-११ ।

कलिङ्गदेशो वा [१३४]इतिहासे परिचितोऽस्ति स देश एव वस्तुतः उत्कलदेशः श्रीजगन्नाथदेशः । स देशः गजपतिपुरुषोत्तमदेवतानुसारमपि [१३५]प्रसिद्धः । खीष्टीयनवमशतकात् एक स्वतन्त्रदेशरूपेण प्रसिद्धिं प्राप्य सोऽयं देशः डॉ० हरेकृष्णमहतावमहोदयानां [१३६]मतानुसारमधुना ओडिशाप्रदेशत्वेन परिचितः । अतः [१३७]पार्टिजरमहोदयैः उत्तरस्यां दिशि कपिशनदीत आरभ्य दक्षिणदिग्भागे कलिङ्ग (वैतरणीनदीं) यावत् उत्कलदेशस्य सीमा आसीदिति यन्मतमुपन्यस्तं तन्न रुचिरम् ।

काव्यसाहित्येऽपि उत्कलदेशनामोल्लेखो वर्त्तते । [१३८]नैषधीयचरिते महाकाव्ये दमयन्त्याः स्वयम्बरसमये उत्कलराज्ञां समावेशस्तेषां वर्णनं च सर्वं वर्त्तते । कालिदासोऽपि [१३९]रघुवंशे रघुदिग्विजये

---

१३४. (क) History of Orissa, Vol-I , R.D. Banerjee, p.76
(ख) O.H.R.J., Vol-I, pp.73-92

१३५. "ओड्रा उत्कलनामानो मागधाः कीटका मताः ॥"
- त्रिकाण्डशेषे - २/११ ।

१३६. It was during the Ganga rule all these distinct religions Odra, Utkal, Kalinga, Trikalinga and Kosala were brought under one authority. It was duting the rule of this dynasty that the oriya language was born, and it was from this time that there began to grow a new culture in Orissa with Jagannath as the centre when the capital of the Ganga dynasty was shifted from Kalinganagar to Cuttack, the neme of Utkal or Odradesa came into greater prominence and the name of Kalinga gradually disappeared. In course of time the name Odisha (Orissa) came into being fron this word Odradesha or Odadesha.
-History of Orissa, H.K.Mahtab, pp.15-16

१३७. Study of Markandeya purana : A.E.Pargiter, p.27.

१३८. "स्वयंवरोद्वाहमहे वृणिष्व हे महेन्द्रशैलस्य महेन्द्रमागतम् ।
कलिङ्गजानां स्वकुचद्वयश्रिया कलिङ्गजानां श्रुणु तत्र कुम्भयोः ॥"
- नैषधमहाकाव्ये- १२/२४ ।

१३९. "स तीर्त्वा कपिशां सैन्यैर्बद्ध द्विरद सेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखोययौ ॥"
-रघुवंशमहाकाव्ये - ४/३६ ।

उत्कलदेशस्य नामोल्लेखं कृतवान् । अतः कालिदासः श्रीहर्षप्रभृतिकवीनां समये उत्कलस्य ख्यातिः अवश्यमासीत् इति निश्चीयते । अतएव उत्कलदेशस्य प्रसिद्धिः सर्ववादिसम्मतः । तस्य नाम्नः सार्थकताऽपि उत्कलभ्रमणावसरे पाश्चात्यैः सम्यगनुभूता । उत्कृष्टकलानां भास्कर्याणां च प्रसारः उत्कलेषु एव वर्त्तते यत्र कोणार्कमन्दिर-लिङ्गराजमन्दिर-जगन्नाथमन्दिरप्रभृतीनि वैदेशिकानां मनांसि आह्लादयन्ति अकर्षयन्ति च ।

एषु मन्दिरेषु याः याः शिल्पकलाः दृश्यन्ते ताः सर्वा उत्कलीयानां पौराणिकत्वं, दार्शनिकत्वं, विलासित्वं, भक्तिप्रणवत्वं, वीरत्वं, सर्वधर्मसमन्वयत्वं च प्रमाणयन्ति । ईदृशी कलान्यत्र कुत्रापि नोपलभ्यते। उत्कलदेशस्य प्रसिद्धिः मुख्यतः पुरुषोत्तमश्रीजगन्नाथदेव-माधारीकृत्य एव । कवयो लेखकाश्च स्वस्वप्रतिपादितग्रन्थराजिषु एतत् प्रतिपादयन्ति इति अस्य सांस्कृतिकदेशस्य महद्वैशिष्ट्यं सुप्रसिद्धमेव।

उत्कलीयसंस्कृतौ श्रीजगन्नाथधर्मः-

वैदिककालादारभ्य इदानीं यावत् भारतवर्षस्य ख्यातिः समग्रे विश्वेऽस्मिन् प्रतिष्ठिता अस्ति । भारतवर्षं पुण्यस्थानमिति पुराणादिषु प्राप्यते । सप्तद्वीपेषु जम्बुद्वीपो वरिष्ठस्तत्र भारतवर्षं[१४०]श्रेष्ठम् । अस्मिन् भारते बहूनि तीर्थानि पुण्यक्षेत्राणि च सन्ति । तेषां पृथक् माहात्म्यं विद्यते । तत्रत्यपुरुषोत्तमक्षेत्रस्य सर्वतीर्थानामाकरभूतत्वेन[१४१] सर्वाधिकवैशिष्ट्यम् । श्रीजगन्नाथदेवमाधारीकृत्य पुरुषोत्तमक्षेत्रस्य

---

१४०. ''पुरुषैर्यज्ञपुरुषो जम्बुद्वीपे सदेज्यते ।
यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ॥
अत्रापि भारतश्रेष्ठं जम्बुद्वीपे महामुने ।
यतो हि कर्मभूरेषां ततोऽन्या भोगभूमयः ॥''
- विष्णुपुराणे - २/३/२१-२२ ।

१४१. (क) ''नानातीर्थसमायुक्तं कोटिब्रह्माण्डदुर्लभम् ।
गन्तुं समर्थास्ते सर्वे ये वै भक्ता जनार्दने ॥
यत् क्षेत्रस्पर्शतो विप्राः समुद्रतीर्थराट् स्मृतः ॥''
- सूतसंहितायां प्रथमोऽध्याये ।

प्राधान्यं सर्वदा [१४२]वरीवर्त्ति । तस्यैव पुरुषोत्तमक्षेत्रस्य अस्ति कश्चित् स्वतन्त्रधर्मः । स एव धर्मः श्रीजगन्नाथधर्मः, तत्रत्या च संस्कृतिः श्रीजगन्नाथसंस्कृतिः । तद्धेतोरुत्कलानामितिहास इति कथनेन श्रीजगन्नाथसंस्कृतिः कथ्यते । यद्यपि उत्कलेषु विभिन्नधर्माणां सम्प्रदायानां च प्रचारः वर्त्तते तथापि समयानुसारं तेषां सर्वेषामेव मुख्योपास्यदेवतात्वेन श्रीजगन्नाथः स्वीकृतः ।

श्रीजगन्नाथसंस्कृतिः आदिसंस्कृतिः शावरी संस्कृतिरिति केचन वदन्ति यतः श्रीजगन्नाथदेवः प्रथमतः शवरसम्प्रदायपूजित आसीत् । ततः परं खारवेलस्य शासनकाले जैनसंस्कृतौ सः देवः [१४३]अन्तर्भूक्तः । जैनधर्मपतनानन्तरं ख्रीष्टपूर्वतृतीयशतके अशोकमहाराजस्य शासनकाले बौद्धावतारत्वेन तस्य देवस्य परिगणनं जातम् । शूद्रमुनिशारलादासेन स्वकृतोत्कलभाषानिबद्धमहाभारते ग्रन्थे [१४४]आलोचितमेतत् । बौद्धकालात् परं ख्रीष्टीयसप्तमशतके उत्कलखण्डस्य सम्बलपुरप्रान्तस्य राज्ञः इन्द्रभूतेः शासनकाले श्रीजगन्नाथः तान्त्रिकदेवतात्वेन प्रख्यात आसीत् इति तत्कृत[१४५]'ज्ञानसिद्धि'ग्रन्थालोचनात् ज्ञायते । अष्टमनवमशतकयोर्मध्ये शङ्कराचार्यपादानामाविर्भावकाले ब्राह्मण्यदेवतात्वेन शैवदेवतात्वेन वा

(ख) "आकाशात् पतितं तोयं यथा गच्छति सागरम् ।
सर्वदेवनमस्कारः केशवं प्रति गच्छति ॥"

- पाण्डवगीतायाम् ।

१४२. "यावदुत्कलमर्यादा दिक्क्रमेण प्रकीर्त्तिता ।
यत्र तिष्ठति विश्वात्मा देशे स पुरुषोत्तमः ॥"

- ब्रह्माण्डपुराणे- ४२/३५ ।

१४३. O.H.R.J., 1953, Vol-II, p.24

१४४. "संसारजनङ्कु सेहु तारिवा निमन्ते ।
बउद्धरूपरे विजे अछि जगन्नाथे ॥" इति ।

-सारलादासकृत महाभारत ।

१४५. "प्रणिपत्य जगन्नाथं सर्वजिनवरार्च्चनम् ।
सर्वबुद्धमयसिद्धि व्यापिनो गगनोपमा ॥"

- ज्ञानसिद्धि- १/१ ।

स एव प्रसिद्ध इति तत्कृतिभ्यः[१४६] ज्ञायते । भौमकरप्रभृतीनां राज्ञां शासनकाले अस्य प्रसारः जातः । शैवोभूत्वा भुवनेश्वरे श्रीलिङ्गराजमन्दिरस्य निर्माणनिमित्तमायोजनं कृतवान् । शैवधर्मप्रसारानन्तरं शाक्तप्रभावो परिलक्षितो जात इति तत्र रुद्रयामलादीनि प्रमाणम् । ततः परं गाणपत्यप्रभावः महाराजस्य गणपतिभट्टस्य श्रीक्षेत्रगमनकाले सञ्जातः । कोणार्कमन्दिर-निर्माणानन्तरं सौरसम्प्रदायस्य प्रभावोऽभूत् । अतएव कालानुसारं श्रीजगन्नाथदेवः पञ्चसम्प्रदायान्तर्भुक्तः जात इति विचारो[१४७]युक्तियुक्तः । [१४८]पञ्चदेवोपासना पुरुषोत्तमक्षेत्रे एव दृश्यते । अत्र नास्ति काचित् विचिकित्सा । कालक्रमेण बहुधर्ममतसमन्वितः श्रीजगन्नाथः सार्वजनीनदेवतात्वेन प्रसिद्धो जातः ।

शावरसंस्कृतौ श्रीजगन्नाथः-

आदिमकालात् श्रीजगन्नाथः शवरपूजितदेवतात्वेन प्रसिद्धः इति बहुषु ग्रन्थेषु प्रतिपादित अस्ति । वेणीमाधवपाढीमहोदयाः जगन्नाथसंस्कृतिमालोचयन् जगन्नाथशब्दः न संस्कृतमूलकः, न वा पालिमूलकः, किन्तु [१४९]शावरमूलक इति प्रस्तुवन्ति । तदनुसारं

---

१४६. "निवर्त्या सद्वार्त्ता तिमिरततिमद्वैतमिहिर-
प्रभातैराचार्यैर्जगतिकृतकार्ये गुरुतरम् ।
प्रतिष्ठाप्य प्राच्यामधिजलधि गोवर्द्धनमठम् ।
जगन्नाथस्वामी नयनपथगामी च विहितः ॥"

- संक्षिप्तशङ्कराचार्यदिग्विजये - १९/५७ ।

१४७. ओडिआ साहित्यर इतिहास - मायाधरमानसिंह, - पृ०- ४२ ।

१४८. The worship of the "Panchadevata" among the Hindus is widely prevalent here at Purusottam Kshetra. Jagannath Himself, infact, is the Panchadevata, i.e. Narayana, Rudra, Ganesa, Surya and Durga. x x x x x Therefore, Jagannath's cult being the synthesis of gradual evolutions and assimilating all the strange elemants of different sects, sets forth a unique religions concept.

-The Land of Bisnu : Dr. G.N. Mohapatra, p.53

१४९. जगन्नाथ शब्दटि मध्य येपरि पालिमूल नुहेँ, सेहिपरि संस्कृत मूल नुहेँ ।

शावरभाषायां व्यवहृतः 'जगन्त' शब्दः संस्कृतभाषायां 'जगन्नाथः' इति रूपं स्वीकरोति । आलोचनामाध्यमेन इदमेव ज्ञायते यत् अस्माभिः देवता इति यः शब्दः संस्कृते व्यवह्रीयते शवरभाषायां स एव 'कितुङ्ग' इति । स एव कितुङ्ग शवरसंस्कृतौ दशविधरूपधारी । ततः दश अवताराः ते "जगन्त-तोड-तुमुन-भीम-रंरं-गर्सिद-रामन्-योजेपल-मत्त-तितिश्च" दश भ्रातरः एव प्रसिद्धाः[१५०] भवन्ति । थर्सनमहोदयानां युक्त्यनुसारं तथा डॉ० कान्हुचरणमिश्रमहोदयाना-मुद्धरणानुसारं तासां देवतानां नामसु स्थलविशेषे भिन्नता परिलक्ष्यते । यथा- भीमा-रामा-पेड-होडेपुल-रङ्गजुङ्ग-तुमेर्णा-जगन्त-मुट्ट-टीट-हति दशः[१५१]भ्रातरः । यथा उत्सवादिषु देवतानां चित्रफलकमूर्त्यादीनि स्थाप्यन्ते तथा ते शवराः तेषां देवानां चित्रफलकानि प्राचीरे स्थापयन्ति । भक्त्याधिक्यात् शवरैः 'जगन्तनाम्ना' एकः वृक्षः पूज्यते । यस्मिन् उद्याने जगन्तवृक्षाः प्रादुर्भवन्ति शवराः तस्मिन् उद्याने तेषां वृक्षाणां छेदनं न कदाचित् चिन्तयन्ति । शवराः तेषां प्रसिद्धदेवतां श्रद्धया 'जगावोई' इति आवाहयन्ति । जगावोईशब्दस्यार्थः 'देवता' । अधुनातनसभ्या उत्कलीया अपि श्रद्धया 'जगादेवता' 'जगाठाकुर'

वरं एहाकु शावरमूल कहिवारे अधिक युक्ति रहिछि ।"

- दारुदेवता - पृ० - ३२ ।

१५०. शवर वा सौर भाषारे 'कितुङ्ग' कहिले देवता, कितुङ्ग वोलि कौणसि निर्दिष्ट देवताङ्क नाहिँ । देवता शब्द येपरि साधारण अर्थसूचक 'कितुङ्ग' मध्य सेहिपरि साधारण अर्थवाची । कितुङ्गङ्कर दशटि रूप अछि बोलि शवरमाने कहन्ति, यथा- "जगन्त-तोड-तुमुन्-भीम-रंरं-गर्सिद-रामन्-येजेपल-मत्त-तित्ति । एमाने हेउअछन्ति दश भाई ।

१५१. (क) Thurston- Castes and Tribes in Southern India, Vol-IX,p. 335.

(ख) "The Sabaras also took into their pantheon some Brahminical gods and goddesses along with the Lord Jagannath. They worshipped their God undet the name of 'Kitunga' who are ten in number and regarded as brothers. There names are-Bhima-Rama-Hodeputu-Peda-Rungjung-Tumerna-Garsada-Jaganta-Mutta and Tenta."

-Cult of Jagannath by K.C. Mishra, p.18.

इति [१५२]संबोधयन्ति । काह्नुचरणमिश्रमहोदयैः स्वगवेषणाप्रबन्धे शवरसमाजे 'जगनाईलो' इति शब्दस्य व्यवहारः आसीदिति प्रस्तुयते । 'जगानाईलो' शब्दस्यार्थः दारुमूर्त्तिः । तद्दारुमूर्त्तिधारिदेवस्य शवरभाषायां नाम 'सोनम्' इति । अपि च तस्य प्रतिमा कितुङ्ग इति । सर्वेषु कितुङ्ग भ्रातृषु 'जगनाईलो' सर्वश्रेष्ठस्तथा सृष्टिकारी देवः[१५३] ।

प्रागैतिहासिकसमाजे अष्ट्रिक-द्राविड-आर्यश्चेति मानवानां प्रधानतः श्रेणीत्रयम् आसीत् । अष्ट्रिकसम्प्रदायः 'निषादः'इति प्रसिद्धः । तत्सम्प्रदाये वृक्षः देवतात्वेन पूज्यते । तत्सम्प्रदायजनानां विश्वासानुसारं जगत्यस्मिन् दृश्यमानप्रकृतेः सत्ता हि सत्यम् । वैदिकयुगेऽपि वृक्षादीनां स्तुतिः पूजा च आस्ताम् । रुद्रस्तुतौ 'नमो वृक्षेभ्यः' इति वृक्षं देवता-रूपेण परिकल्प्यार्च्चयन्ति अरण्यवासिनो निषादप्रभृतयः । [१५४]वायुपुराणे सृष्टिप्रकरणे यज्ञीयवृक्षरूपेण पूजितानां वृक्षाणां नामानि

---

१५२. जगन्त व्यतीत शवरमाने सेमानङ्कर प्रसिद्ध देवताङ्कु 'जगावोई' बोलि श्रद्धारे डाकिथान्ति । 'बोई' शब्दर अर्थ देवता । तेणु जगाबोई अर्थ जगा देवता अथवा जगा ठाकुर । ओडिआमाने मध्य जगन्नाथङ्कु 'जगा ठाकुर' वा 'जगा देवता' बोलि श्रद्धारे डाकिथान्ति ।

- जगन्नाथ चेतनार उद्भव ओ विकाश - डॉ० वासुदेव साहु- पृ०- ३ ।

१५३. The ancient name of Jagannath which is still in vogue in Sabara villages in Orissa is "Jaganailo" made of wood. The name of the deity in Sabar languages is "Sonam" and the images have the name of Kitung. Of all Kitungs, Jaganailo is the greatest and he is called the lord of all the lords and the lord of the universe, according to Sabar.

-Cult of Jagannath - p. 18

१५४. पलाशा खदिरा विल्वा प्लक्षाश्वत्थविकङ्कताः ।
एतद्धि मण्डलं सिर्द्धि यज्ञीयं द्विजसत्तमाः ॥

अपि च-

समानप्लक्षन्यग्रोधप्लक्षाश्वत्थविकङ्कताः ।
उदुम्बरास्तथाविल्वचन्दना यज्ञियाश्च ते ॥
सरलो देवदारुश्च शालश्च खदिरस्तथा ।
समिदर्थं प्रशस्ताः स्युरेते वृक्षा विशेषतः ॥

-वायुपुराणे प्रथमार्द्धे १२तमाध्याये ।

दृश्यन्ते ये वृक्षाः कल्पवट-वाञ्छावटप्रभृतयः कथ्यन्ते । यद्यपि समयानुसारं विनाशविशृङ्खलादि घटते तथापि वृक्षादयः अधिककाल-स्थायिनो भवन्ति । अतएव ते ईश्वरत्वेन [१५५]उपासिताः जाताः । न केवलं पुराणयुगे वैदिकयुगे स्मृतियुगेऽपि वृक्षोपासना कृताऽऽसीत् ।

सम्प्रति अष्ट्रेलियामहादेशस्य उत्तरप्रान्ते आदिमजनानां समाजे वृक्षपूजा 'तोटम्' (सङ्केतः)रूपेण प्रचलिता अस्ति । भारतवर्षे अष्ट्रिक्समाजे अश्वत्थवृक्षस्योपासना प्रथमतः प्रचलिता आसीत् । सिन्धुसभ्यतायां तथा महेञ्जोदारोसभ्यतायाः वृक्षपूजायाः प्रचलन-मासीत् इति ऐतिहासिकाः[१५६] प्रमाणम् ।

पाश्चात्यसमालोचकानां विलकिनस्महोदयानां मतानुसारं श्रीजगन्नाथः प्रथमतः आदिवासिगोष्ठीपूजितः देवः आसीत् । कालक्रमेण सः देवः हिन्दुधर्मे पूजितो भूत्वा विष्णोरवतारत्वेन कल्पितो जातः । ऐतिहासिकाः [१५७]गुरुदाससरकार-

१५५. अष्ट्रिक वा निषाद जातीय लोके दृश्यमान सत्ताकु हिं सत्यं बोलि ग्रहण करन्ति । किन्तु दृश्यमान सत्तारे मध्य विशृङ्खला, परिवर्त्तन, जन्म-यौवन-जरा, अहर्निशक्षय ओ मृत्यु लागि रहिछि । एहि विशृङ्खला मध्यरे आपाततः याहा याहा गोटिए आकार, गोटिए रूपकु बहुकाल धरि रखिपारे, ताहाकु अन्य परिवर्त्तनशील जिनिष अपेक्षा अधिक सत्य बोलि कहिवा वाञ्छनीय। एहि अपरिवर्त्तनीयता, चिरन्तानिकता, दीर्घजीवन ओ एकरूपतार लक्षण वृक्षमानङ्करे विशेषभावे परिलक्षित हुए । विशेष करि केतेक जातीय वृक्षरे येपरि निम कि अश्वत्थ वृक्षकु सत्य वा पुरुषभावे पूजा करिवार परम्परा एहि निषादमानङ्कठारु आरम्भ होइथिला ।

-'जगन्नाथ धर्म ओ संस्कृति' - डॉ० कृष्णचन्द्रमिश्रः

-कोणार्क- १९७७, पृ०- ५८।

१५६. The History and Culture of Indian People:

-R.C.Majumdar, Vol-1 ; pp.147-186

१५७. ये जाति अति प्राचीनकाल हइते एरूपे प्रसिद्धिलाभ करियाछे एवं एहादिगेर वंशधरगणेर वासभूमि विन्ध्यपर्वत हइते महानदी पर्यन्त विस्तृत, उत्कल प्रतिपत्तिलाभ हेतु सेइ शवरादिगेर कौन शाखार वा प्रशाखार वा संश्लिष्ट प्रतीकेर, ब्रह्मणगणकर्तृक जगन्नाथनामे अभिहित हइया देवतारूपे

१५८प्रभातमुखार्जि - १५९केदारनाथमहापात्र - १६०वंशीधरमहान्ति - १६१नवीनकुमारसाहु - १६२पण्डितनीलकण्ठदाश - १६३मनमोहनगाङ्गुली - प्रभृतयः जगन्नाथसंस्कृतौ शवरसंस्कृतेः प्रभावं स्वीकुर्वन्ति । जगन्नाथः 'मादला' इति कथ्यते । मादलाशब्दस्यार्थः हस्तपदविहीनदारुः । अतएव जगन्नाथ-बलभद्र-सुभद्रा चेति मूर्त्तयः हस्तपदविहीन-

---

स्वीकृत हतया असम्भवनये, एवं परवर्त्तिकाले बौद्धप्रभाव हेतु पुरुषोत्तमेर श्रीमन्दिरे बौद्ध उपासना पद्धतिर प्रवेशलाभ करात अस्वाभाविक बलिया मने हएना । समुद्रतटवर्त्ती पुरी अन्ततः तृतीयशतक हइते ये अन्यतम निखिलभारतीय तीर्थरूपे परिणत हइयाछिल ताहा पुराणग्रन्थेर प्रमाण हतेइ बुझायाय ।

- मन्दिरेर कथा - गुरुदाससरकार - पृ०- १९१ ।

१५८. Traditions are unanimous that the prototype of Jagannatha was worshipped by the Savaras. x x x x x The Sabara Origin of Jagannatha is probably th cause of his deformed shape.

-Vaishnavism in Orissa, p.17.

१५९. जगन्नाथङ्कु शवरदेवता कहिवार मध्य अनेक कारण अछि । पुरी अञ्चलरे पूर्वे शवरमाने वास करुथिले । सेमाने अरण्यमध्यरे निजर धर्मजीवन यापन करुथिले ।

-इन्द्रद्युम्नकिम्बदन्तीर ऐतिहासिकता- भञ्जप्रदीप-आश्विन- १३४२ साल ।

१६०. आमर जगन्नाथ आवाहमानकालरु शवरदेवताभावरे पूजित होइ आसुअछन्ति । जगन्नाथ धर्मर इतिहास प्रागैतिहासिक युगरे शवरसंस्कृतिरे निहित थिवा आम्भर पूर्ण विश्वास ।

- ओडिआ साहित्यर इतिहास - प्रथमभाग- पृ०- ५ ।

१६१. The very origin of Jagannatha proclaims him not less than the God of Brahmins than of low caste aboriginal races.

-History of Orissa, p. 8.

१६२. Hints on the significance and History of Jagannatha.

-Pt. Nilakantha Dash, p.11.

१६३. There is no doubt that the sanctity of the place (puri) is dated antiriour to the growth and rise of Buddhism. has brought an immence change in the details of worship and religious rites.

-Orissa and Her Ramains, p.399.

काष्ठखण्डात्मिकाः । समुद्रतीरे नौकासदृशक्षेत्रे पर्यां यूप इव महान् न्यग्रोधदारुः पूज्यते इति [१६४]स्कन्दपुराणे सूच्यते । मादलामूर्त्तिः सम्भवतः कालक्रमेण नीलमाधवरूपेण रूपान्तरीता इति विद्वद्भिः चिन्त्यते । इत्थं मूर्त्तिः दारुत्वेन स्वीकृता प्राप्यते [१६५]स्कन्दपुराणे । परवर्त्तिसमये शवरपूजित. शवरीनारायणः नीलमाधवः श्रीजगन्नाथरूपेण प्रसिद्धो जातः । सैव शवरीनारायणमूर्त्तिः निम्बवृक्षेण निर्मिता एकस्तम्भरूपिणी इति [१६६]पण्डितनीलकण्ठदासेन स्वीकृतम् ।

श्रीजगन्नाथधर्मपरिचये आदिवासिसंस्कृतिः प्रथमतोऽस्माकं पथप्रदर्शिका भवति । ऋग्वेदप्रतिपादनानुसारम् अपुरुषशब्दः आर्येतराणां जातीनां देवमूर्त्तिः भवति । यदि सः शवरस्य मूर्त्तिरूपत्वेन गृह्यते तर्हि इदमेव कथयितुं शक्यते यत् श्रीजगन्नाथचेतनायाः विकाशः ऋग्वेदरचनाकालात् प्रागभवत् । तत्र [१६७]केचन ऋग्वेदस्य कालः खीष्टपूर्वद्वादशत्रयोदशशताब्दी [१६८]केचन च खीष्टपूर्वपञ्चदशशताब्दी

१६४. "एकार्णवे महाघोरे नौरिवक्षेत्रमिक्ष्यते ।
तत्रायं यूपसदृशो न्यग्रोधस्तिष्ठति महान् ।
यं गृहीत्वा क्षेत्रमिदं न्यग्रोध ईशितुस्तनुः ॥"

-स्कन्दपुराणे उत्कलखण्डे- ३/९-१० ।

१६५. "माधवप्रतिमामेतां दारवीं शुभलक्षणम् ।
साक्षान्मुक्तिप्रदां भूप स्वयं स्थापितवानसि ॥"

-तत्रैव - २६/३४ ।

१६६. It appears that this replacement of the images for the ancient Nilamadhab was not all at once universally accepted even in Orissa. The SabariNarayana it has been said, was a pillar with a headmade of neemwood.

-Hints on the Significance and History of Jagannath- p.-II

१६७. (क) Maxmuhllers 1st edition of Rigveda, Vol-IV, Preface-pp. V-VII

(ख) We must thus rest content with the moderate estimate of the thirteenth century B.C. as the approzimate date for the begining of the Rigvedic period.

-Vedic Reader -Mcdonell, pp. XII

१६८. Hymns from the Rigveda - Peterson, Appendix-I

इति स्वीकुर्वन्ति । अतः श्रीजगन्नाथचेतनायाः विकाशः ततः प्राक् जातः । एतत्संस्कृत्यनुसारं साम्प्रतमपि शवरसमाजे जगन्नाथमूर्त्ति-चतुष्टयस्य रथत्रयस्य च निर्माणकारिणः शवराः 'कलापिठिआ' नाम्ना श्रीक्षेत्रस्य समीपे निवसन्ति इति विद्वांसः [१६९]प्रमाणम् ।

हरेकृष्णमहताबमहोदयाः उत्कलेषु विभिन्नधर्माणामितिहास-लेखनावसरे श्रीजगन्नाथसंस्कृतेः इतिहासविषये इत्थं विचारयन्ति यत् प्रथमतः श्रीजगन्नाथः शवरपूजितः आसीत् । अशोकमहाराजस्य शासनसमये शवराः बौद्धधर्मेण दीक्षिताः अभवन् । पूर्यां बौद्धस्तूपाः निर्मिताः अभवन् । त एव बौद्धस्तूपाः शवराणां कृते प्रधानपूजापीठाः अभवन् । प्रथमशताब्द्यामुत्कलेषु महायानमार्गप्रवर्त्तनेन केवलं बौद्धमूर्त्तिपूजा प्रचलिता आसीत् । परन्तु तदवसरे सरलप्राणाः शवराः त्रिरत्नं मूर्त्तित्रयं मत्वा [१७०]पूजितवन्तः ।

पुरा युगे यदा मूर्त्तिपूजा प्रारब्धा तदा प्रथमतः प्रस्तरमयिमूर्त्तिः पूजिता आसीत् । तदनन्तरं दारुमयी मूर्त्ति उपासिता । क्रालानुसारम् [१७१]अष्टविधाः मूर्त्तिपूजाः स्वीकृता इति दृश्यते । यद्भवतु काष्ठनिर्मित-दारुमूर्त्तिपूजने शवरसभ्यतायाः प्रभावो नितराम् अस्ति इति स्वीकार्यम् ।

जैनसंस्कृतौ श्रीजगन्नाथः-

जैनसंस्कृतौ श्रीजगन्नाथदेवस्य प्रभाव उत श्रीजगन्नाथ-संस्कृतौ जैनधर्मस्य प्रभावः प्राग् जात इति विषये महती शङ्का जायते । [१७२]पण्डितनीलकण्ठदाशमहोदयानां मतानुसारं तथा च

---

१६९. जगन्नाथमन्दिर ओ जगन्नाथतत्त्व - सूर्यनारायणदाश, - पृ०- ७७ ।

१७०. From the foregoing considerations we may conclude that during he reign of Ashok, the Savaras of Orissa were converted to Buddhism. A Buddhistic Stupa was constructed at Puri and the Symbol of Tri-Ratna was there.

-History of Orissa, p.-II; p. 521

१७१. शैली दारुमयी लौही लेख्या लेप्या च सैकती ।
मनोमयी मणिमयि प्रतिमाष्टविधा स्मृता ॥

- श्रीमद्भागवतपुराणे- ११/२७/१२ ।

१७२. जगन्नाथ कथाटि गोटिए जैन शब्द । एहा ऋषभनाथ सङ्गे समान ।

[173]अभिधान-राजेन्द्रानुसारं जगन्नाथशब्दः जैनशब्दात् रूपान्तरितः । यथा जैनधर्मस्य आदिप्रचारकः [174]ऋषभनाथः सूर्यनाथेन रूपान्तरितः तथा जैनात् जगन्नाथः इति कल्पयितुं शक्यते । तथा अयं हिन्दुधर्मे विष्णोरेकः अवतार इति [175]श्रीमद्भागवते वर्णितमस्ति । वासुदेवसाहुमहोदयाना-मुद्धरणानुसारं जगद्रूपनाथः पुरुषो श्रीजगन्नाथः जगत्यस्मिन् उपास्यः । तदनुरोधेन जैनाः स्वोपास्यादेवं नाथं इति सम्बोधयन्ति । अतएव श्रीजगन्नाथसंस्कृतौ जैनधर्मस्य प्रभावः स्वतः जात इति मर्मेण श्रीजगन्नाथ एव जैनधर्मस्य प्रतीक इति [176]विद्वद्भिः प्रतिपादितम् ।

जैनसंस्कृतौ आषाढमासस्य शुक्लद्वितीयातिथिः प्रथमतीर्थङ्करस्य ऋषभदेवस्य गर्भकल्याणकदिवसत्वेन विदिता । तस्मिन् दिवसे

ऋषभनाथ बोईले सूर्यनाथ वा जगतर जीवनरूपी पुरुष ।

- ओडिशारे जैनधर्म - ग्रन्थप्रवेश - पृ०- ७ ।

१७३. जगणाह- जगन्नाथ, पुं- जगतसकलचराचररूपस्य यथावस्थितस्वरूप-प्ररूपेण वितथप्ररूपणापायेभ्यः पालनाश्च नाथ स्वनाथो जगन्नाथः जिनेश्वरः ।

- अभिधानराजेन्द्रस्य चतुर्थभागे- पृ०- १३८५ ।

१७४. एमानङ्कर आदितीर्थङ्कर हेउछन्ति ऋषभदेव एवं द्वाविंशतीर्थङ्कर हेले नेमीनाथ वा अरिष्टनेमि ।

-ओडिशारे जैनधर्म - लक्ष्मीरायणसाहु - पृ०- १८ ।

१७५. (क) "अष्टमे मेरुदेव्यां तु नाभेर्जात उरुक्रमः ।
दर्शयन् वर्त्मधारिणां सर्वाश्रमनमस्कृतम् ॥"

- श्रीमद्भागतपुराणे- १/३/१३ ।

(ख) नाभेरसौ वृषभ आस सुदेवी सूनुर्यो वै चचार समदृग् जडयोगचर्याम् ।
यत् पारमहंस्यमृषयः पदमाननन्ति स्वस्थः प्रशान्तकारणः परिमुक्तसङ्गः ॥

-तत्रैव - २/७/१० ।

१७६. एहि धारक हेउअछन्ति मनीषी नीलकण्ठदाश । एहार पृष्ठपोषक भावे ऐतिहासिक केदारनाथमहापात्र, पण्डित वानाम्बर आचार्य, पण्डित विनायक मिश्र प्रमुख रहन्ति । एमानङ्कर मतरे जगन्नाथ हेउछन्ति जैनधर्मर प्रतीक ।

- दारुदेवता - पृ०- १९ ।

[177]ऋषभदेवस्य रथयात्राविधानं वर्त्तते । चैत्याकृतिविशिष्टरथोपरि तीर्थङ्करप्रतिमां स्थापयित्वा जैनाः तद्दिने नगरपरिक्रमां कुर्वन्ति । अतएव तदनुसरणेन आषाढस्य शुक्लद्वितीयातिथौ श्रीजगन्नाथदेवस्य रथयात्राऽनुष्ठीयते इति [178]विदुषां मतम् । रथयात्रायाः प्रागेव जैनसंस्कृतौ यथा अभिषेकस्नानादिविविधाः उत्सवाः परिपाल्यन्ते, तथा श्रीजगन्नाथसंस्कृतावपि भवन्ति । न केवलमेतत् अपि च ऋषभदेवस्य यथा 'कैवल्यवृक्षः' श्रीजगन्नाथदेवस्य अपि तथा कल्पवटः, उभयोरपि चक्रचिह्नं चेत्यादि पारम्परिकक्रमेण प्रसिद्धमिति । अधिकन्तु श्रीजगन्नाथक्षेत्रं कालक्रमेण [179]चक्रक्षेत्रमिति प्रसिद्धिं गतम् ।

जैनधर्मस्य सकलतत्त्वाधारकं मोक्षदायकं त्रिरत्नं सम्यक् दर्शनं, सम्यक् ज्ञानं, सम्यक् चरित्रं चेति । ऐतिहासिककेदारनाथमहापात्राः

---

१७७. चैत्ययात्रा कहिले रथयात्रा बुझाए । चैत्यनिर्मित रथ उपरे जीनङ्कर प्रतिमा स्थापन करि नगररे परिक्रमा करिवा एहिं उत्सवर विधि ।

- ओडिशारे जैनधर्म - पृ०- १२६ ।

१७८. (क) जैनमानङ्क मतरे आषाढ शुक्लद्वितीया प्रथमतीर्थङ्कर ऋषभदेवङ्कर गर्भकल्याणक दिवस अर्थात् एहि तिथिरे ऋषभदेव गर्भगत होइथिले । प्रति कल्याणक दिवसरे वा रथयात्रार विधान अछि । जगन्नाथ ऋषभङ्कर प्रतीक बोलि अनेके मने करन्ति । तेणु सेहि दिन जगन्नाथङ्कर रथयात्रा उत्सव अनुष्ठित हउथिवा अनुमित हुए ।

- तत्रैव - पृ०पृ०- १२६-१२७ ।

(ख) जैनमानङ्क मतरे आषाढ शुक्लद्वितीया तिथि हेउअछि प्रथमतीर्थङ्कर ऋषभदेवङ्कर गर्भकल्याण दिवस अर्थात् एहि दिवसरे ऋषभदेव गर्भगत होइथिले । तेणु एहि तिथिरे ऋषभदेवङ्कर रथयात्रार विधान अछि ।

- जगन्नाथ चेतनार उद्भव ओ विकाश - पृ०- १ ।

१७९. ऋषभङ्कर पूजा भारतर येउँठारे हुए चक्रक्षेत्ररूपे विदित । आबुपाहाड अञ्चलकु सेथिपाइँ चक्रक्षेत्र कुहायाए । एपरिकि केन्दुझर जिल्लार आनन्दपुर सब्डिविजनर येउँठि आगे ऋषभङ्कर पूजापीठ थिला ताकु कुहायाए चक्रक्षेत्र । पुरीकु चक्रक्षेत्ररूपे नामित करिवार वैष्णवधर्मप्रभाव परिसर याहा हेउना काहिँकि ताहा ये जैन ऋषभङ्कर पूजापीठ हेतु सेहि नामरे नामित एहा सर्वाग्रे स्वीकार्य ।

- ओडिशारे जैनधर्म - पृ०- १३ ।

श्रीजगन्नाथत्रिमूर्त्तितत्त्वेन साकं जैनधर्मस्य त्रिरत्नचिन्तनं तोलयन्ति । तेषां मते पुराणवर्णितगालमाधवेन्द्रद्युम्नप्रभृतीनां राज्ञां मन्दिर-निर्माणेतिवृत्तं खारवेलराजत्ववृत्तान्तस्य छायामात्रम् । किम्बदन्ती-वर्णिता नीलमाधवमूर्त्तिः प्रस्तरखोदिता जैनत्रिरत्नमूर्त्तिः । त्रिरत्नस्यानुकरणेन जगन्नाथादिमूर्त्तित्रयं हस्तपादशून्यं घटितम् । तत्र हस्तपादशून्यतायामलौकिकता परवर्त्तिसमये पौराणिकाख्यानमाध्यमेन वर्णिता । क्रमशः हिन्दुधर्मस्य पुनरुत्थानयुगे त्रिरत्नमूर्त्तिपरिवर्तनेन हस्तपदविहीनाः श्रीजगन्नाथः बलभद्रः सुभद्रा चेति तिस्रः काष्ठमूर्त्तयः स्थापिताः [१८०]अभवन् । जैनदर्शनानुसारं ज्ञानदर्शनचरित्राणि योगस्य प्रधानाङ्गानि कथ्यन्ते । पण्डितनीलकण्ठदाशमहोदयानां मते जैनधर्मः भारतीयधर्मदर्शनस्य [१८१]मूलप्रकाशः । उपनिषत्प्रभृति सकलदर्शनं जैनप्रभावान्वितं [१८२]परिलक्षितं भवति । अधिकन्तु प्राचीनसमृद्ध-सिन्धुसभ्यतायाः जनकाः ये द्राविडाः वा एसिरिआन् जनाः सेमेटिक्परिवारस्य जनाः वा आर्यमते ते असुरत्वेन प्रथिताः । वृक्षजीवादीनामुपासना तैः कृता आसीत् इति लक्षणसादृश्यात् ते द्राविडाः मूलतः जैना एव । जैनतीर्थङ्करः [१८३]महावीरः तोषलेषु तथा च कलिङ्गेषु जैनधर्मस्य प्रचारार्थमागतवान् । तस्मिन् समये कलिङ्गाः प्रसिद्धजैनपीठत्वेन परिचिताः [१८४]आसन् । खीष्टपूर्वषष्ठशताब्द्यामपि कलिङ्गराजः [१८५]करकण्डुः महावीरं जैनधर्मप्रचारार्थं कलिङ्गान्

१८०. इन्द्रद्युम्न किम्बदन्तीर ऐतिहासिकता - भञ्जप्रदीप - १३४२ साल ।

१८१. जैनधर्म हेउछि भारतर दार्शनिक धर्मर मूल । बौद्धधर्म बोलि याहाकु कुहन्ति ताहा एहि जैनधर्मर एक संस्कृति प्रकाश ।

-ओडिशा साहित्यर क्रमपरिणाम - नीलकण्ठग्रन्थावली-तृतीयखण्ड- पृ०- १७० ।

१८२. The Heart of Jainism : Mrs. Stevenson, p.50

१८३. J.B.O.R.S. Vol.VIII, p.246

१८४. उत्तराध्यायनसूत्रे- पृ० - २१ ।

१८५. Both the Jaina and the Buddhist literature mention a famous Jaina ruler of Kalinga named Karndu (Karakandu) who seems to be a disciple of Parsva. In the 6th century B.C. when Mahabir was preaching his reformed creed Jainism

निमन्त्रितवान् । प्रथमशताब्द्यां खारवेलस्य राजत्वे जैनधर्मस्य प्रचारप्रभावेन उत्कलेषु जैनधर्मः [१८६]परमस्थानमधिकृतवान् इति इतिहाससम्बलिततथ्यसकलम् । [१८७]वेणीमाधवपाढीमहोदयानां मतानुसारं जैनधर्मे कल्पवृक्षः शवरदेवतारूपेण बहुकालात् पूजितः आसीत् । तदनुमानानुसारं एकत्रावस्थानेन आदिवासिपूजितदारु-देवतायाः उपरि द्राविडजैनानां प्रभावः पतितः यद्द्वारा शवरसमाजे पुरुषोत्तमभावः प्रसिद्धिं प्राप्तवान् । फलतः दारुदेवपुरुषोत्तमः श्रीजगन्नाथ इति नाम्ना उभयगोष्ठ्याः उपास्यदेवतात्वेन पूजितोऽभवत् । पुरुषोत्तमस्य प्रसिद्धित्वेन कालक्रमेण तत् क्षेत्रं 'श्रीजगन्नाथपुरी'नाम्ना परिचितं जातम् । अपि च पुरुषेश इति नाम्ना प्रसिद्धिमगात् इति

---

continued to enjoy the patronage of the Kalinga monarchs who as known from the Jaina Haribhadriya Vrtti,was a friend of Mahabira's father and invited Mahavira with all cordiality to propogate his doctorine in that land.

- O.H.R.J., Vol-IV, No.384, p.79

१८६. (क) The image must have possessed all qualities. It must have been most attractive and life-like image. The evry lookour it must have brought the greatest and proudest down upon his (Kharvela) knees, and bow before it in reverence. That is why it was valued most and teken away by Nandaraja. Too on the otherhand could never forget their great loss for times to come. So that when they could assert their independence and found themselves strong enough under the able leadership of Kharvela, they attached Magadha and brought back their lovely and dear image.

-O.H.R.J., Vol.-II, 1953, p.24

(ख) ओडिआ साहित्यर इतिहास, भाग -१,

वंशीधरमहान्ति, पृ०- १३ ।

१८७. फलरे एकत्रावस्थानद्वारा आदिवासी शवरर दारुदेवताङ्क उपरे जैनद्राविडर क्रमप्रभाव पडि मूलदारु येपरि जैनधर्मीङ्कर निजर होइ पडिला, सेहिपरि दारु उपासक शवरगोष्ठीर मध्ये पुरुषोत्तमभाव प्रसिद्धि लाभ कला । एहि परिणामरे 'दारु' वा 'मादला' पुरुषोत्तम वा जगन्नाथ नामरे उभय गोष्ठिर उपास्य होइ पडिले ।

- दारुदेवता- पृ०- १५० ।

[१८८]पौराणिकतथ्यानुसारं तर्कयितुं शक्यते । पुनः पाढीमहोदयानां मतानुसारं जैनधर्मसङ्केतबद्धमङ्गलस्य परिवर्द्धितसङ्केतोपरि नन्दीपदस्य परिवर्द्धित चक्षुमुखविशिष्टसंङ्केतस्य संयोगेन श्रीजगन्नाथमूर्त्तेः कल्पना जाता । परन्तु एतन्मतस्य खण्डनं कृत्वा पण्डितकेदारनाथमहापात्रे उल्लिखितं यत् गृहीतं तदेव नन्दीपदमिति । अन्ये सर्वे महापात्रमहोदय-दर्शितबद्धमङ्गलनन्दीपदस्य सम्मिश्रणेन श्रीजगन्नाथमूर्त्ते [१८९]उद्भवं प्रतिपादयन्ति ।

अन्ये [१९०]पण्डिताः जानन्ति यत् जैनाः प्रथमतः मूर्त्तिपूजकाः आसन् । ते जैनधर्मस्य प्रचारकाणां तीर्थङ्कराणां कृते चैत्यं (मूर्त्तिं) निर्माय तेषां संरक्षणाय चैत्यालयं (मन्दिरं) निर्मितवन्तः । साकारोपासकाः जैनाः शवरपूजितदारुदेवतामध्ये स्वधर्मसङ्केतस्य साम्यं परिलक्ष्य स्वदेवतात्वेन तां स्वीकृतवन्तः । एकस्मिन् पक्षे सरलप्राकृतिकशवरसमाजे धर्मप्रचारस्य अभावः, अपरपक्षे तदा जैनधर्मस्य बहुलप्रचारः प्रभावश्च जाताः । ततः कलिङ्गेषु दारुदेवता जैनदेवतात्वेन प्रतिष्ठिता । अतएव स देवः प्रथमतः दारुदेवतात्वेन पूजितः कालक्रमेण जैनप्रभावेन पुरुषोत्तमनाम्ना प्रसिद्धिमगात् इति [१९१]विदुषां मतं विचारयोग्यम् ।

१८८. "पुरुषेशमिति ख्यातं वटराजसनातनम् ।"

-ब्रह्मपुराणे - ५२/१७ ।

१८९. But peculiary Pdt. K.N.Mohapatra, in his book sri Kharvala has identified the "Vaddha Mangala " of Dr. Padhi as Nandipada, and vice-versa. The scholars of Jainsim will corroborate the conclusion arrived at by Mahapatra.

-The Land of Visnu - Dr. G.N.Mohapatra, p. 68

१९०. Jains have emphasised this importance of Chaitya and Chaityalaya. Idol representing the Tirthankaras and the Temple for the idols as object of worship.

- Shraman Bhagaban Mahaveer - p-I, Vol-I, p.96

-Quoted in दारुदेवता - पृ०- १५० ।

१९१. शवर धर्मर कौणसि प्रकार प्रचार ओ प्रसार सुकाशे यत्न नथिवास्थले समान्तरालवर्त्ति धर्मर वलिष्ठ प्रचार शवरविश्वासरे क्रमागत दुर्बलता आणि देइथिव । एणु मनेहुए शवरर मूल दारु उपरे जैनप्रभाव दृढतर होइ पडिला ।

बौद्धसंस्कृतौ श्रीजगन्नाथः-

श्रीजगन्नाथसंस्कृतेः प्रभावो बौद्धसंस्कृतावपि परिलक्ष्यते । बुद्धदेवस्य जन्मतः खीष्टीयसप्तमशताब्दीं यावत् उत्कलेषु प्रचलितेषु विभिन्नेषु धर्मेषु बौद्धधर्मः स्वप्रभावं विस्तारितवान् । तत्र विशेषतः उत्कलीयवैष्णव-नाथ-शैव-शाक्तधर्मेषु बौद्धधर्मस्य अत्यन्तं प्रभावः परिलक्ष्यते । अतः श्रीजगन्नाथचेतनायाः विकाशे बौद्धधर्मस्य भूमिका गुरुत्वपूर्णा ।

खीष्टपूर्वचतुर्थशताब्दीतः उत्कलेषु बौद्धधर्मस्य प्रसिद्धिर्जाता । खीष्टपूर्व २६१ बर्षे अशोकमहाराजस्य कलिङ्गविजयानन्तरं उत्कलेषु बौद्धधर्मस्य बहुप्रचारोऽभवत् । यद्यपि खीष्टपूर्वप्रथमशताब्द्यां खारवेलः कलिङ्गेषु जैनधर्मस्य बहुलप्रचारं कृतवान् तथापि तदानीं तस्य बौद्धधर्मं प्रति विशेषसम्मानम् आसीत् । फलतः परवर्त्तिनि काले बौद्धजैनधर्मयोः सत्ता श्रीजगन्नाथधर्मे अनुभूता आसीदिति सम्बलपुरस्थराज्ञः इन्द्रभूतेः [१९२]'ज्ञानसिद्धि' ग्रन्थस्य मङ्गलाचरणात् प्रतीयते । परवर्त्तिनि काले प्रख्यातबौद्धदार्शनिकः नागार्ज्जुनः पश्चिमोत्कलेषु परिमलगिरिप्रभृतिस्थाने विहारादिकं प्रतिष्ठाप्य बौद्धधर्मप्रचारे प्रसिद्धिमलभत इति हुएन्सांमहोदयैः प्रतिपादितम् । न केवलमेतत् अपि च पुरीमण्डलान्तर्गत डेलाङ्गस्थाननिकटस्थ [१९३]भोरशैलोपरि बौद्धविहारं निर्मीय चतुर्थशतके आचार्यदिङ्नागः योगाचारसिद्धविज्ञानवादस्य प्रचारं कृतवान् । डॉ० काह्नुचरणमिश्र-महोदयैः[१९४] प्रतिपादितं यत् पञ्चमषष्ठशतकयोः उत्कलेषु बालेश्वर-

---

शेषरे दारुदेवता जैन उपासनार विषयरूपे गृहीत हबारु शवरर मौलिकता क्रमशः मलिन हेवारे लागिला । फलरे उपादान दारु हेले सुद्धा बाह्यरूपटि जैन पुरुषोत्तमरूपे लोकरे प्रसिद्धिलाभ कला ।

- दारुदेवता - पृ०- १५१ ।

१९२. "प्रणिपत्य जगन्नाथं सर्वजीनवरार्च्चितम् ।
सर्वबुद्धमयं सिद्धिः व्यापिनं गगनोपमम् ॥" - ज्ञानसिद्धिः - १/१ ।

१९३. भोरशैलः- पुरीमण्डले डेलाङ्गखण्डस्थ-विश्वनाथपर्वतः ।

१९४. About the 5th or 6th century A.D. the present districts of Balasore, Keonjhar happened to be the seats of the

केन्दुझर-पुरीमण्डलप्रभृतिषु महायानबौद्धाः अनेकान् बौद्धविहारान् निर्मीय तत्र शवरवत् देवदेवीपूजामकुर्वन्। तच्छलेन पुरीमण्डलान्तर्गत-वाणपुरे स्थापिता भगवतीमूर्त्तिः बौद्धतान्त्रिकमूर्त्तिरिति [१९५]हुएन्सां-महोदयानामभिमतम्। सम्प्रति उपलब्धात् एक [१९६]ताम्रफलकात् ज्ञायते यत् बालेश्वरमण्डलस्य राजा गोपचन्द्रः बौद्धविहारप्रतिष्ठातुं तत्र अवलोकितेश्वरस्य उपासनार्थं च किञ्चित् भूमिदानम् आर्यभिक्षुसंघाय कृतवान् इति । अष्टमनवमशतकद्वये उत्कलेषु बौद्धधर्मस्य पतनं जातम्। एतस्मिन् समये बौद्धपण्डिताः बौद्धधर्मं ब्राह्मण्यधर्मेण सह संयुज्य बौद्धधर्मस्य रूपान्तरं कृतवन्तः । फलतः साम्प्रतमुत्कलेषु प्रचलितवैष्णवधर्मे बौद्धधर्मस्य प्रवेशोऽस्ति इति [१९७]विद्वांसः आमनन्ति। तदुद्देश्येन [१९८]ऐतिहासिकैः उत्कलानां पञ्चसखायः प्रच्छन्नबौद्धत्वेन कल्पिताः इत्येतेभ्य निदर्शनेभ्योऽपि श्रीजगन्नाथसंस्कृतिः सूच्यते ।

श्रीजगन्नाथदेवे बुद्धत्वारोपयितुमपि प्रकृष्टमुदाहरणं प्राप्यते गोस्वामिश्रीजयदेवस्य [१९९]कृतिभ्यः । तच्छलेन श्रीजगन्नाथसंस्कृतौ नवकलेवरसमये दारुमूर्त्तिभ्यः स्थानान्तरितं ब्रह्म एव 'बुद्धदेवस्य दन्तः इति [२००]केचन स्वीकुर्वन्ति । तदाधाररूपेण या किम्बदन्ती श्रूयते तस्याः

Mahayanists who used to worship their Gods and goddesses in association with the Sabaras.

-The cult of Jagannatha- p-18.

१९५. New aspects of History of Orissa, Sambalpur University, p.65

१९६. O.H.R.J., Vol-V, p.53

१९७. Hunter is of opinion that he was and that Vaishnavism at Puri is but the successor of the older Buddhist creed.

-Vaishnavism in Orissa : by P. Mukherjee, p.15

१९८. Modern Buddhism in Orissa - Nagendranath Basu.

१९९. "निन्दसि यज्ञविधेरहह श्रुतिजातम्,
सदयहृदयदर्शितपशुघातम्
केशव धृतबुद्धशरीर जय जगदीश हरे ॥"

- गीतगोविन्दे दशावतारस्तोत्रे ।

२००. (क) Antiquities of Orissa, -Rajendralal Mitra, Vol-II, pp.105-106.

अपि उद्धरणं [२०१]स्थलविशेषे परिलक्ष्यते । किन्तु श्रीजगन्नाथदेवस्य नाभिब्रह्म श्रीकृष्णस्य शरीरावशेषः बुद्धदेवस्य दन्तो वेत्यस्मिन् विषये असम्मतानां [२०२]विदुषां मतं कथं वा नानुसरणीयम् ? अतः श्रीजगन्नाथ-देवस्य प्रतिष्ठापको राजा इन्द्रद्युम्नः बौद्धधर्मावलम्बी आसीत् इति विहारप्रदेशस्य मुङ्गेरमण्डले आविष्कृतबौद्धध्वंसावशेषादुपलब्धात् 'इन्द्रद्युम्नगड' इत्यभिधानात् ज्ञायते इति प्रतिपादकानां[२०३] मतं न तावत् साधु भवेत् । किन्तु जगन्नाथादित्रिमूर्त्तेः बौद्धधर्मत्रिरत्नसाधने डॉ० महतावमहोदयानामभिमतं[२०४] समीचीनं भवति । श्रीजगन्नाथ-

---

(ख) Dr. Rajendralal Mitra is of opinion that the image of Jagannatha contains the sacred tooth of Buddha and he quotes the story of Datha-vamsa in support of his statement.

-Vaishnavism in Orissa, p.16

२०१. J.A.S.B. Calcutta, 1837, Vol-VI p.858

२०२. When the stock is shaped by the carpenters, it is made over to the priests, one of whom is selected to take out of the original image a boz containing the bones of Krishna, which is then transferred to the new image. One account describes how this Brahmin veils his face lest he should be struck dead ingazing on relics of such sanctity once it is said , a Raja of Burdhawan paid the priest and enormous sim for permission to see the relics and died soonafter.Others say that the brahman who handles the relics is slain by his brother priests lost he should divulge their character or that he is always removed by the God from this world before the close of year. These tales in their present forms are obviously absurd. The rile of vaishnavism is utterly opposed to the preservation of relics of the dead. The tale infact, point a tradition from Buddhist time, when relics of the master were preserved in stupas all over the land.

-Things Indian- by Crook, Quoted in Puri Gazateers, p.109

२०३. विहारर मुङ्गेर जिल्लार 'उटेन्' नामक पाहाड अछि । सेठारे बहु भग्ना मन्दिर ओ भग्ना बौद्ध मूर्त्ति अछि । सेठारे लोकमाने से स्थानकु 'इन्द्रद्युम्नगड' कहन्ति । अनेके मने करन्ति ये, से स्थानरे इन्द्रद्युम्न नामरे जणे बौद्ध राजा थिले ।

- श्रीजगन्नाथ, डॉ० वंशीधर महान्ति - पृपृ०- २७-२८ ।

२०४. आशोकङ्क समयरे ओडिशारे शवरमाने बौद्ध धर्मरे दीक्षित होइथिले ।

संस्कृतौ स्नानयात्रारथयात्रादिकं यथा सम्पद्यते बौद्धसंस्कृतावपि इदानीं यावत् पृथिव्यामनेकत्र तथा परिलक्ष्यते । खीष्टीयपञ्चमशतके [२०५]फाहियान् स्वभ्रमणवृतान्तपुस्तिकायां खोटानेपरिपालितरथयात्राविषये उल्लिखितवान् । तत्र तदनुसारं बौद्धत्रिरत्नस्य रथयात्रासम्पर्कीयं वर्णनमस्ति । तत्र रथस्याग्रभागे राजा 'रथपरिष्करणं' (छेरापहंरा) करोति स्म । ऐतिहासिक[२०६]राजेन्द्रलालमिश्रमहोदयाः श्रीजगन्नाथसंस्कृतौ परिपालितानि यानि पर्वाणि तानि सर्वाणि बौद्धसंस्कृतितः आगतानीति कथयन्ति । श्रीजगन्नाथदेवस्य रथयात्रा बुद्धदेवस्य जन्मोत्सवः इति यत् मित्रमहोदयाः प्रतिपादयन्ति [२०७]हुण्टेप्रभृतयः प्राचीनैतिहासिकाः सः बौद्धदन्तोत्सवः इति स्वीकुर्वन्ति ।

[२०८]वैदिककाले [२०९]उपनिषत्काले च रथस्य व्यवहारोपलम्भात्

पुरीरे बौद्धस्तूप निर्मित होइथिला ओ सेथिरे बौद्ध त्रिरत्न चिह्न स्वाभाविकक्रमरे अङ्कित होइथिला । खीष्टपूर्व पञ्चम शताब्दीरे महायान पन्था प्रवर्त्तित होइ बुद्ध ओ बोधिसत्त्वमानङ्कर पूजा आरम्भ हेला, सेतेवेले सरलप्राणा शवरमाने स्तूपत्रिरत्नचिह्नटिकु पूजा कले ।

- ओडिशार इतिहास - डॉ० हरेकृष्ण महताव - पृ०- ४८५ ।

२०५. Travels of Fahian - Lagge.

२०६. Antiquities of Orissa, Vol-II, p.136 -R.L.Mitra

२०७. (क) The Indian Empire -Sir H.H.Hunte

(ख) Indian Architecture -Fergusson.

२०८. (क) न ते अदेवः प्रदिवो नि वासते यदेतशोभि पतरैरथर्यसि ।

- ऋग्वेदे १०/३७/३ ।

(ख) सप्तत्वा हरितो रथे वहन्ति देवसूर्यः । -तत्रैव - १/५०/८ ।

(ग) अयुक्त सप्तशुन्ध्युवः सुरीरथस्य नप्त्यः । -तत्रैव - १/५०/९ ।

(घ) हिरण्मयेन सविता रथेन । -तत्रैव - १/३५/२ ।

(ङ) रथं हिरण्यं प्रउगं वहन्त । -तत्रैव - १/३५/५ ।

(च) सूर्यमा धत्थो दिवि चित्र्यं रथम् । -तत्रैव - ५/६३/७ ।

(छ) समानं चिदः रथमातस्विवासा नानाहवेते स जनास इन्द्रः ।

- अथर्ववेदे - २०/३४/८ ।

(ज) तं पृच्छन्ति वज्रहस्तं रथेष्ठामिन्द्रम् । -तत्रैव - २०/३६/५ ।

तादृशमुपस्थापस्थापनं निःसङ्कोचं ग्रहणीयमिति कथयितुं न शक्यते । न केवलं तत् अपि च जातिधर्मवर्णनिर्विशेषेण श्रीजगन्नाथदेव-महाप्रसादस्य सेवनं महद्वैशिष्ट्यपूर्णमस्ति । तत् बौद्धसंस्कृति-प्रभावितमिति जानन्ति [२१०]विद्वांसः । उत्कलीयव्यासशारलादासकृत-महाभारतग्रन्थे श्रीजगन्नाथः बुद्धत्वेन वर्णितः [२११]बहुषु स्थलेषु । किन्तु श्रीजगन्नाथसंस्कृतौ [२१२]मूर्त्तिचतुष्टयस्य उपलम्भात् अपि च बौद्धत्रिरत्नस्य तया सह सम्पर्काभावात् श्रीजगन्नाथसंस्कृतिः बौद्धसंस्कृत्या प्रभावितः न कदाचित् भवेदिति [२१३]डॉ० गोपीनाथ-

---

(झ) थ सत्यासो हविरदो हविष्या इन्द्रेण देवैः सरथं तुरेण ।

- अथर्ववेदे - १८/३/४८ ।

२०९. आत्मानं रथिनं विद्धि शरीररथमेव च । -कठोपनिषदि- १/३/३ ।

२१०. जातिभेदो न कर्त्तव्यः प्रसादे परमात्मनः ।

-महानिर्वाणतन्त्रम्- ३/९२ ।

२११. (क) "देउल भितरे सिंहासने विजे होइ ।
बउद्धरूपरें प्रभु शङ्खचक्र वहि ॥"

-सारलादासकृत महाभारत ।

(ख) "से जगन्नाथ ये संसार उद्धारण ।
म्लेछजन उद्धारण से बउद्धरूपेण ॥"

-तत्रैव - आदिपर्व - पृ०- १०५ ।

२१२. स्कन्दपुराणम् (उत्कलखण्डः) - ५/३८, १९/१८, १४/४४ ।

२१३. The later view that Jagannatha cult has Buddhist origin seems absurd, because the number of images in the Jagannatha Temple is not three but four viz. Jagannatha, Balabhadra, Subhadra- Sudarsan as described in the Agni Purana, Padmapurana, Brahmapurana, Narada Purana, and Skanda Purana, The "Chaturdha murti" obviously has more affinity with the four mantras of Pranava. If at all the number of images is taken to be there, why should the trinity not represent Brahma, Vishnu, Maheswara or aspects like Satva, Rajah, Tamah and why should it be taken to present Buddha, Dharma and Sangha. The more coincidence that Triratna and Trimurti are both three in number, is not a sound basis for arriving at such a conclusion. x x x x x x All these arguments, when examined closely appeared to be

महापात्रमहोदयानां युक्तिः सुरुचिरैव । न केवलं तेषामपि च [२१४]प्रभातमुखार्जीमहोदयानामुत्कलीय [२१५]विदुषां च मतानि तादृशान्येव इत्यस्मात् श्रीजगन्नाथसंस्कृतिः न कदाचित् बौद्धसंस्कृत्या प्रभाविता इति निर्विवादः ।

तन्त्रशास्त्रेषु श्रीजगन्नाथः-

सर्वेषु शास्त्रेषु तन्त्रशास्त्रं परां प्रसिद्धिं धत्ते । तन्त्रस्य प्रभावः प्रथमतः बौद्धधर्मोपरि आसीदिति [२१६]तद्धर्मग्रन्थेभ्यः परिलक्ष्यते । तदनन्तरं ब्राह्मणधर्मे वैष्णवशाक्तादिसर्वासु शाखासु च तस्य प्रभावः नितरामुपलब्धो भवति । तत्र रुद्रयामलबृहन्नीलादीनि तन्त्रशास्त्राणि सर्वेषां पुरतो भान्ति । यद्यपि बहुसंस्कृतीनाम् एकत्र समावेशः तन्त्रमिति आख्यायते तथापि मातृशक्तिबीजरूपमर्थं प्रमुखतया इदं प्रस्तौति ।

---

rathervogue. In fact, the word Jagannatha has different cannotation in the Pali literature and it may not necessarily allude to the image of Purusottam Jagannatha at Puri.

-The Land of Visnu, p.64

२१४. Thus we reject the theory of Buddhist origin of the Puri Triad. Though we deny that Jagannatha was originally a Buddhist God, we cannot ignore the fact that the worship and later mythology of Jagannatha point our unmistakable Buddhist influence.

-Vaishnavism in orissa, p.18.

२१५. (क) पक्षान्तरे समालोचक पिटरसन् , ऐतिहासिक मनमोहनगाङ्गुली, अध्यापक प्रभातमुखार्जी, महामहोपाध्याय पण्डित श्रीसदाशिव मिश्र, पण्डित श्रीसूर्यनारायण दाश प्रमुख ऐतिहासिक प्रणालीरे मूलतः आध्यात्मिक चिन्ताधाराकु आश्रय करि जगन्नाथ बौद्धधर्मर देवता नुहन्ति, किन्तु सम्पूर्णभावे ब्राह्मण्यधर्मर देवता बोलि प्रमाणित करन्ति ।

- दारुदेवता - पृ०- १७ ।

(ख) Orissa and Her Remains -M.M.Ganguli, pp.406-407.

(ग) जगन्नाथ मन्दिर - म.म. पण्डित श्रीसदाशिवमिश्रः- पृ०- ३० ।

(घ) श्रीजगन्नाथ मन्दिर- पण्डित सूर्यनारायण दाशः- पृ०- ६/११ ।

(ङ) मन्दिरेर कथा - गुरुदाससरकार - पृ०- ८४ ।

२१६. ज्ञानसिद्धिः- १/१ ।

तदवच्छेदेन दक्षयज्ञे विनष्टायाः सत्याः शरीरं स्कन्धे वहता शिवेन तस्याः अंशविशेषाः यत्र यत्र निपातिताः तत्र तत्र तन्त्रपीठानि जातानि इति [217]कालिकापुराणदेवीभागतेभ्यः ज्ञायते । सर्वेषु तेषु तन्त्रपीठेषु [218]कालिकापुराणानुसारं चत्वारः मुख्याः भवन्ति यत्र ओड्र इत्यस्य अन्तर्भावोऽस्ति । [219]श्यामार्च्चनतरङ्गे ओड्रस्थाने उड्डीयानस्य उल्लेखः । [220]विमलाकल्पेऽपि तथा दृश्यते । यद्वा भवतु उड्डीयान ओड्र उड्र वा एकमेवदेशं व्यनक्ति इति नास्ति संशयः । तस्य च देशस्य नामान्तरमुत्कलै इति बहुप्रमाणानि लभ्यन्ते । तत्र उत्कलेषु श्रीक्षेत्रे इदानीं यावत् या देवी विमला क्षेत्राधिष्ठात्रीदेवतात्वेन प्रथिता भवति तस्याः देव्याः सम्पर्कः श्रीजगन्नाथसंस्कृतौ बहुप्राचीनकालात् समुपलभ्यते । तदुद्देश्येन श्रीजगन्नाथदेवस्य [221]भैरवत्वेन कल्पना सर्वजनविदितैव । न केवलं तत् अपि च विभिन्नेषु तन्त्रशास्त्रेषु श्रीक्षेत्रस्य [222]नीलपर्वतत्वेन वर्णना समुपलम्भात् एकत्र उभयोः पूजोपासनायाः श्रवणात् च श्रीजगन्नाथविमलयोः सांस्कृतिकक्षेत्रे अभिन्नाभिन्न-तान्त्रिकसम्पर्कः नूनमस्तीति ज्ञायते ।

---

२१७. (क) "ओड्रपीठ पश्चिमे तु तथैवोड्रश्वरी शिवाम् ।
कात्यायिनीं जगन्नाथमोड्रेश च प्रपूजयेत् ॥"
- कालिकापुराणे- ६४/४४ ।

(ख) "उत्कले नामि देशे च विमला पुरुषोत्तमे ।
विमला भैरवी यत्र जगन्नाथस्तु भैरवः ॥"

२१८. "ओड्राख्यं प्रथमं पीठं द्वितीयं जालशैलकम् ।
तृतीयं पूर्णपीठन्तु च कामरूपं चतुर्थकम् ॥"
- तत्रैव- ६४/४३ ।

२१९. "उड्डीयान् पूर्णगिरि जालन्धरस्तथैव च ।
कामरूपं इति ख्यातः कौलपीठचतुष्टयम् ॥"

२२०. "सृष्टिभूतामहाशक्तिर्मणिपुरनिवासिनी ।
विमला सा पराशक्तिरुड्डीयानपुरेश्वरी ॥"

२२१. "विमला सा महादेवी जगन्नाथस्तु भैरवः ॥"

२२२. "पीठानां परमं पीठं कामरूपं महाफलम् ।
श्रीनीलपर्वते चैव कलम्ब कुञ्जके तथा ॥"
- बृहन्नीलतन्त्रे ।

न केवलं श्रीक्षेत्रे अन्येषु एव तन्त्रपीठेषु अपि रक्षकत्वेन अधिकारित्वेन वा भैरवस्य प्रसिद्धिरस्ति । किन्तु सर्वत्र भैरवाः श्रीजगन्नाथत्वेन परिगण्यन्ते । वैष्णवतान्त्रिकसिद्धान्तानुसारं स्वयं श्रीजगन्नाथः अस्य जगतः आधारभूतः कृष्ण एव । तत्र सर्वं प्रतिष्ठितमिति [२२३]उड्डामरेश्वरमहातन्त्रं प्रस्तौति ।

श्रीजगन्नाथादिदेवानां स्वरूपाणि तन्त्रानुसारं मन्यमानाः शैवाः अपि अत्र अन्तर्भवितुमर्हन्ति । शिवपार्वतीसंवादादिमाध्यमेन शिवार्च्चनपद्धत्यादिशैवतन्त्रग्रन्थेषु प्रमुखतन्त्रदेवतात्वेन श्रीजगन्नाथस्य प्रमुखतन्त्रपीठत्वेन पुरुषोत्तमक्षेत्रस्य च उल्लेखः प्राप्यते । सम्प्रति श्रीजगन्नाथदेवस्य पूजापद्धतिः तन्त्रमतेन प्रायतः प्रचलति । अतएव श्रीजगन्नाथः सर्वधर्मसंस्कृतिसमन्वित सन् आवाहमानकालात् श्रीक्षेत्रे प्रपूजितो भवतीति निश्चयः ।

वैष्णवधर्मे श्रीजगन्नाथः-

श्रीजगन्नाथः ब्राह्मण्यधर्मस्य मुख्यदेवतात्वेन परिकल्पितो भूत्वा अन्तिमे वैष्णवधर्मे प्रभुत्वं प्राप्नोति । ऋग्वेदाथर्ववेदयोर्मध्ये पुरुषोत्तमचेतना, श्रीमद्भगवद्गीतायां वर्णितः पुरुषोत्तमयोगः, श्रीभद्भागवतादिपुराणेषु वर्णितः कृष्णवासुदेवधर्मः, माधवोपासना-प्रभृतयश्च कालक्रमेण वैष्णवधर्मस्य प्रसारे कारणानि भवन्ति । श्रीक्षेत्रे आगमनानन्तरं श्रीशङ्कराचार्यः स्वीयप्रतिभाबलेन बौद्धभिक्षुकान् पराजित्य पुनः ब्राह्मण्यधर्मस्य प्रतिष्ठां कृतवान् । तदारभ्य श्रीजगन्नाथसंस्कृतौ वैष्णवधर्मस्य प्राधान्यं प्रभावश्च जातौ इति ।

कृष्णः वासुदेवः श्रीजगन्नाथः-

विष्णोः वैदिकदेवतात्वेन परिकल्पनेऽपि वैष्णवधर्मस्य सूचना तत्र वेदेषु उपनिषत्सु ब्राह्मणसंहितासु च नोपलभ्यते । महाभारते वैष्णवधर्मस्य सम्प्रदायस्य वा यद्यपि स्वतन्त्रतया उल्लेखो नास्ति तथापि

---

२२३. "अनन्तानन्द कृष्णाय जगन्मङ्गलमूर्त्तये ।
उड्डीशेन समाकीर्णः योगच्छन्दसमाकुले ॥"
- उड्डामरेश्वरतन्त्रे ।

तत्र [224]शान्तिपर्वणि भागवतसात्वतैकान्तिकपञ्चरात्रनारायणीय-प्रभृतीनां वैष्णवसम्प्रदायानां नामानि प्राप्यन्ते । 'वासुदेवक' इति विष्णुभक्तसम्प्रदायस्य नामोल्लेखः खीष्टपूर्वचतुर्थपञ्चमशतकयोः पाणिनिकृतायाम् [225]अष्टाध्यायाम् उपलभ्यते । अतएव कृष्णवासुदेवं मुख्यदेवत्वेन गृहीत्वा खीष्टपूर्वचतुर्थपञ्चमशताब्दीतः भगवद्धर्म-प्रतिपादितपुराणानां तथा भागवतवासुदेवधर्मस्य सृष्टिरभूत् इत्यनुमीयते। किन्तु पुराणरचनातः प्राक् सर्वप्रथमं [226]तैत्तरीयाण्यके वासुदेवनामोस्योल्लेखो दृश्यते । खीष्टपूर्वतृतीयशतके घसुण्डि-शिलालेखे [227]उल्लिखितमस्ति यत् भागवतसङ्कर्षणवासुदेवानां एका पूजावेदी निर्मिता आसीत् । खीष्टपूर्वद्वितीयशतके उल्लिखित [228]'वेशनगर'शिलालेखात् एवं ज्ञायते यत् वासुदेवमन्दिरस्याग्रभागे ग्रीक्‌राजदूत 'हेलिएडोरा' एकं गरुडध्वजं निर्मितवान् । खीष्टपूर्वप्रथमशतके [229]'नानाघाट'शिलालेखे सङ्कर्षणवासुदेवयोः प्रशस्तिः वर्णिता आसीत् इति डॉ० वासुदेवसाहुमहाभागाः स्वग्रन्थे उद्धरणं कृतवन्तः । [230]श्रीमद्भगवद्गीतायां श्रीकृष्णः वासुदेवत्वेन प्रथितोऽस्ति । एतद्व्यतिरेकेण [231]तैत्तरीयसंहितायां [232]तैत्तरीयब्राह्मणे

२२४. "सुसूक्ष्मसत्वं संयुक्तं त्रिभिरक्षरैः ।
पुरुषः पुरुषं गच्छे निष्क्रियपञ्चविंशकम् ॥
परस्पराङ्गान्येनानि पञ्चराथं च कथ्यते ।
एष एकान्तिनां धर्मो नारायणपरात्मकः ॥"

- महाभारते शान्तिपर्वणि - ३३६/७५-७६ ।

२२५. वासुदेवर्ज्जुनभ्यां वून् ।

- अष्टाध्यायाम्- ४/३/९८ ।

२२६. 'नारायणाय विद्महे, वासुदेवाय धीमहि, तन्नो विष्णु प्रचोदयात् ।'

- तैत्तिरीयारण्यके दशमप्रपाठके ।

२२७. Epigraphica Indica. Vol-X, Inscription-6.

२२८. Ibid, Inscription-659.

२२९. जगन्नाथ चेतनार उद्भव ओ विकाश- पृ०- ५३ ।

२३०. 'वृष्णीनां वासुदेवोऽस्मि'—श्रीमद्भगवद्गीतायाम्- १०/३७ ।

२३१. तैत्तरीयसंहितायाम्- ३/११/९/३ ।

२३२. तैत्तरीयब्राह्मणे- ३/१०/९/१५ ।

[२३३]शतपथब्राह्मणे [२३४]जैमिनियोपनिषद्ब्राह्मणे च वासुदेवसम्पर्कीया सूचना प्राप्यते । [२३५]डॉ० वासुदेवसाहुमहोदयानामुद्धरणानुसारं पदातन्त्रे वासुदेवद्वयस्य नामोल्लेखो वर्त्तते । एकः सात्वतधर्मस्य प्रवर्त्तकः अन्यश्च सङ्कर्षणस्य भागवतधर्मस्य प्रवर्त्तकः कृष्णवासुदेवः । [२३६]ऐतिहासिकाः भण्डारकरमहोदयाः अत्र स्वमतप्रतिपादनच्छलेन यत् वासुदेवः कृष्णवासुदेवः इति नामद्वयं न तावत् एकस्यैव नाम । एकः यादवः सात्वतां वंशस्य वासुदेवः । अन्यस्तु पौराणिकदेवो वासुदेवस्य पुत्रः कृष्णवासुदेवः । परन्तु पाश्चात्यैतिहासिक-किथ्महोदयानां[२३७] मतेन कृष्णः वासुदेवश्च एकः अभिन्नश्च । [२३८]महाभारतानुसारं सात्वतधर्मस्य प्रवर्त्तकः कृष्णवासुदेवः सकलजगदाधारः । स एव सूर्यरूपेग पृथिव्यां किरणं विकिरति । यद्वा भवतु खीष्टपूर्वद्वितीयशतके वासुदेवस्य प्राधान्यं ब्राह्मण्यधर्मे आसीदिति [२३९]निश्चप्रचम् ।

उत्कलेषुं प्राचीनदीकूले प्रथमतः वैष्णवधर्मे वासुदेवोपासना

---

२३३. शतपथब्राह्मणे- ३/१/१/४ ।

२३४. जैमिनीयोपनिषद्ब्राह्मणे- १/६/१ ।

२३५. जगन्नाथ चेतनार उद्भव ओ विकाश- पृ०- ५३ ।

२३६. Archaeological Remains and Exavation at Nagari, pp. 130-133.

२३७. J.R.A.S., 1935 p.840, -Keith.

२३८. (क) "स लोकांस्तेजसा सर्वांस्वभासानिर्विभासयन् ।
आदित्याभिमुखोऽभ्येति गगना पारयिन्निव ॥
अनिर्देश्येन रूपेण द्वितीय इव भास्करः ॥"
- महाभारते शान्तिपर्वणि- २/३५०/९० ।

(ख) "वतुष्मतां वै स्पृहयामि सञ्जय द्रक्षन्ति ये वासुदेवसमीपे ।
विभ्राजमानं वपुषापरेण प्रकाशयन्तं प्रदिशोदिशश्च ॥"
- तत्रैव - उद्योगपर्वणि - ५/६९/१ ।

२३९. It may, therefore, be conculed that even in the time of the Upanishadas (6th century B.C.) Or in the times of Panini (5th century B.C.) There did exist in India Bhagavatism or Vasudeva worship, though, it made its way in Orissa in the 2nd century B.C., It gained popularity in Orissa only in the 5th century A.D.

-The Land of Vishnu, p.57.

परिलक्ष्यते । वासुदेवस्य प्रतीकत्वेन शङ्खचक्रगदापद्मानि गृहीतानि । तत्र शङ्खः समृद्धिसम्पदः, चक्रं विश्वैकताभावस्य, गदा शक्तेः, पद्मं पवित्रतयाः च प्रतीकानीति शास्त्रसिद्धम् । तत्र संगृहीताभ्यः तथा च उत्कलराज्यसंग्रहालये संरक्षिताभ्यः ताभ्यः मूर्त्तिभ्यः वासुदेवस्य अभयवरदमुद्रालक्ष्यते । कालक्रमेण तत्र प्राचीनद्युपत्यकायामुपासितो वासुदेवो माधवरूपेण उपासित भवति । ततः सैव वासुदेवोपासना कालक्रमेण माधवोपासनेति नाम्ना परिवर्त्तिता । यतो मा लक्ष्मीः, तस्याः धवो माधवो भगवान् वासुदेवः वर्णने तस्य नीलरूपत्वात् नीलमाधव इति नाम्ना ख्यातिं लेभे । नीलमाधवोपासना कालक्रमेण श्रीजगन्नाथोपासना इति प्रसिद्धिं गता ।

खीष्टजन्मपरं गुप्तसाम्राज्ये वासुदेवोपासना वासुदेवधर्मस्य प्रसारश्च अभूताम् । तदवसरे खीष्टीयपञ्चमशतके राजपृष्ठपोषकतां प्राप्य उत्कलेषु भागवतधर्मस्य (वासुदेवधर्मस्य) उत्तरोत्तरा उन्नतिः जाता । तत्समये सङ्कर्षणवासुदेवौ क्रमानुसारं बलराम[२४०]कृष्णवासुदेवत्वेन परिचितौ जातौ । तदवसरे [२४१]वराहमिहिरः स्वकृतौ बृहत्संहितायां बलदेवकृष्णयोर्मध्ये एकानंसा देव्याः स्थितिविषये आलोचनां कृतवान् । तदनुसारं बलदेवो बलभद्रत्वेन, कृष्णो जगन्नाथत्वेन एकानंसा सुभद्रात्वेन च वर्णिता इति [२४२]प्रभातमुखार्जीप्रभृतीनां मतं

---

२४०. When it took the form of Sankarsana Vasudeva (for Balaram and Jagannatha) in the Ananta Vasudeva worship. x x x x x This Concept also evidences that Vasudeva worshop was popular here in Puri and that it was prevalent anterior to Ananta Vasudeva worship. Later Ananta was attached to Vasudeva which in course of time led to the worshop of Balabhadra and Jagannatha.

-The Land of Vishnu, pp. 57-58

२४१. एकानंसा कार्या देवी बलदेवकृष्णयोर्मध्ये ।
कटिसंस्थितवामकरा सरोजमितरेण चोद्वहती ॥

- बृहत्संहितायाम्- ५८/३६ ।

२४२. (क) The story value, having been semihistorical works both of them, has been one of the tenchpins of the Hindu-ethialmoral vehicle and as far as, religious act is concerned,

युक्तियुक्तम् । परवर्त्तिनि काले सांख्यतत्त्वानुसारं प्रकृतिः बलभद्रः, पुरुषो जगन्नाथः, तयोर्मध्ये शक्तिरूपा सुभद्रा इति परिकल्पना जाता यत्र मूलं [२४३]स्कन्दपुराणमिति । वासुदेवोपासना कालक्रमेण परिवर्त्तिता भूत्वा बलभद्र-जगन्नाथ-सुभद्रा-सुदर्शनोपासनारूपेण परिणीता । अतः वासुदेवोपासनायाः प्रभावः श्रीजगन्नाथसंस्कृतेः उपरि नूनं पतति इति वक्तुं पार्यते ।

माधवपूजा-

वासुदेवोपासनायाः क्रमपरिणतिः माधवोपासना सप्तमशताब्दीतः उपलभ्यते । गुप्तशासकः माधवगुप्तः प्रथमतः माधवोपासनायाः प्रवर्त्तकः इति आदित्यसेनस्य [२४४]शिलालेखेभ्यः ज्ञायते । माधवगुप्तस्य राजत्वसमये तत्कालीनानां शैलोद्भवनृपतीनां समये चोत्कलेषु माधवपूजायाः प्रचलनं जातम् । सप्तशताब्द्यां कङ्गोदेषु (दक्षिणोत्कले) दक्षिणकोशलेषु च चक्रधरमाधवपूजायाः प्रसिद्धिरासीत् । बौद्धनगर-निकटस्थ-गन्धराडिग्रामे निर्मिता नीलमाधवमूर्त्तिः [२४५]प्रत्नतत्त्व-विभागानुसन्धानेन पुरीस्थश्रीजगन्नाथमन्दिरात् प्राचीनतरा ज्ञायते ।

Srikrishna who was the prime mover of the Mahabharata epic, is the oldest well established religious cult personage, of the Bhagavata mode refleced in the Sankarsana-Vasudeva-Cult, in prime and the Panchavira-Cult in extenson, including significantly for the first time, even the religious art, a female divine potential in the patheon, namely Subhadra, who as the embodiment of Ekanamsa had been subquently popular as an iconic imagery along with Samkarshana (Balarama) and Krishna Vasudeva; in the early historic times.

-Glimpses of Indian Culture : K.V.Sundara Rajan
Introduction, pp. XVIII-XVX

(ख) Evolution of the Puri Triad - P.K.Mukherjee.

२४३. "तस्य शक्तिस्वरूपेण भगिनी श्रीप्रकिर्त्तिता ।"

- स्कन्दपुराणे उत्कलखण्डे- १९/२१ ।

२४४. Carpus Inscriptions Indicarum, Vol-III, pp.205-206.

२४५. Prachi Valley (Orissa State Archaeology), pp.64-65.

[२४६]महानद्याः उभयपार्श्वे स्थितेषु गन्धराडि-कटिलोप्रभृतिस्थानविशेषु तथा प्राचीमहानद्योरुभयोर्मध्यवर्त्ति-निआलिग्रामे च माधवदेवस्य मन्दिराणि दृष्टिगोचरीभूतानि भवन्ति, यत्र च वासुदेवमूर्त्तीनामिव माधवमूर्त्तीनां हस्तेषु शङ्खचक्रगदापद्मानि शोभन्ते । एतस्मात् ज्ञायते यत् उत्कलेषु माधवपूजायाः प्रसारः बहुलतया आसीदिति। कालक्रमेण चतुर्भुजमाधवो द्विभुजकृष्णगोपीनाथभावेन समादृतः जातः । द्वादशशताब्द्यां [२४७]गीतगोविन्दकाव्यकर्त्ता जयदेवः कृष्णगोपीनाथत्वेन माधवस्य परिचयं दत्तवान् । न केवलं तदपि च माधववासुदेवयोः ऐक्यमपि तेन उपन्यस्तम् । तदवसरे जयदेवस्वामी जगन्नाथदेवं कृष्णरूपेण स्तौति । विष्णोरवतारत्वेन वराह-नृसिंहप्रभृतीनां परिगणनं जातम् । तत्तद्देवानामाराधनानुसारेण वैष्णवधर्मस्योपक्रमो जातः । तदनुसारेण तन्मूर्त्तीनां स्नानपूजनादिकं सर्वैरनुभूतम् । नृसिंहोपासनानिमित्तं बहुत्र नृसिंहमन्दिराणां निर्माणं जातम् । तदवसरे श्रीजगन्नाथक्षेत्रे प्रथमतो नृसिंहनाथस्य पूजा प्रचलिता जातेति [२४८]स्कन्दपुराणं प्रस्तौति । राजा इन्द्रद्युम्नः यज्ञनृसिंहं पूजयित्वा श्रीजगन्नाथादिविग्रहाणां स्थापनं कृतवान् इति तस्मात् ज्ञायते । श्रीजगन्नाथदेवस्य वेशकरणसमये तत्र विभिन्ना देवानां रूपमारोप्यते । पञ्चभिः देवैः सह श्रीजगन्नाथदेवस्य नित्यं सम्बन्धोऽस्तीति अत्र नास्ति काचित् विप्रतिपत्तिः । मन्दिरमध्ये श्रीजगन्नाथदेवस्यावरणदेवरूपेण पञ्चदेवानां संस्थापनं दृश्यते । तत्र गणपति-विमला-लक्ष्मी-सूर्य-नारायणेशानेश्वरप्रभृतयः मुख्यस्थानमधिकुर्वन्ति । अन्याः उपदेवताः अपि तत्र स्थापिताः सत्यः यथाकालं यथारीति पूज्यन्ते इति श्रीजगन्नाथसंस्कृतौ महद्वैशिष्ट्यमेतद्विद्वद्भिः ज्ञातमेव ।

---

२४६. "क्रमशः पावनं क्षेत्रं यावत् चित्रोत्पलानदी ।"
-स्कन्दपुराणे उत्कलखण्डे- १२/७६ ।

२४७. 'राधामाधवयोर्जयति यमुना कूलेरहः केलयः ।'
-गीतगोविन्दस्य मङ्गलाचरणम् ।

२४८. "अस्य मूलात् प्रतीच्यां हि नृसिंहस्योत्तरे नृपः ।
अतिष्ठन्माधवो यत्र चतुमूर्त्तिधरो विभुः ॥"
-स्कन्दपुराणे उत्कलखण्डे - १५/२४ ।

द्वितीयपरिच्छेदः

श्रीजगन्नाथसंस्कृतेः संक्षिप्तेतिहासः-

श्रीजगन्नाथसंस्कृतौ शावर-बौद्ध-जैन-ब्राह्मण्यसंस्कृतीनां कालक्रमेण अन्तर्भावानन्तरं सर्वधर्मसंस्कृतिसमन्वितदेवः श्रीजगन्नाथः सनातनधर्मे इष्टदेवत्वेन प्रसिद्धः[२४९] जातः। साम्प्रतिककाले श्रीजगन्नाथसंस्कृतौ विद्यमानानां जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनदेवानां सम्मिश्रणस्य हेतुप्रदर्शनच्छलेन [२५०]ऐतिहासिकाः कथयन्ति यत् कलिङ्गोत्कल-कोशलादिदेशेषु बलभद्रादीनामुपासना पूर्वकालात् प्रचलिता आसीत्। किन्तु एतेषां सर्वेषां देशानां एकत्रमिश्रणं यदा जातं तदारभ्य एकस्मिन्नेव परिवेशे मूर्त्तिचतुष्टयस्याविर्भावः तथा चतुर्द्धामूर्त्तिकल्पनं जातम्। तत्र भौमकरवंशीयानां राजत्वसमये कोशलेषु वैष्णवधर्मस्य विकाशेन सह अपरेषां शैवादिधर्माणां विलयो जातः। न केवलमेतत् अपि च तदवसरे उत्कलेषु अधुनातने ओडिशाप्रदेशे वा भौमकरवंशस्य प्रादुर्भावः जातः यद्द्वारा कलिङ्गोड्रप्रदेशयोः कोशलेन सह मिश्रणात् तत्रत्याराध्यदेवतानामपि मिश्रणं जातम्। फलतः तत्रत्यतोषलानां

---

२४९. "यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्धः इति प्रमाणपटवः कर्त्तेति नैयायिकाः।
अर्हन्नित्यथ जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः॥"

२५०. It is not improvable that after the downfall of Sailodbhava when the countries of Kangod and Tosali were ruled by the Bhoumakaras, the Gods Purushottam and Balabhadra and the goddess Stambheswari might have been worshipped as the Rastra devatas in the newly formed Kingdom. This seems to have been one of the main factors in the evolution of the image type of Purusottam Jagannatha which comprised three separate icons of Jagannatha, Balabhadra and Subhadra.

-The Cult of Jagannatha, p.15.

नामान्तरेण उत्कलेषु देवतात्रयस्य आराधनं जातमिति [२५१]विदुषां मतम् । किन्तु नवमशताब्द्याः प्रारम्भे जगन्नाथबलभद्रयोः प्रख्यातिः आसीदिति [२५२]गवेषकाणां स्पष्टं मतम् । ततः परं चोडगङ्गदेवस्य शासनसमये श्रीजगन्नाथसंस्कृतेर्विकाशो जातः । तदानीं कोशलानां राष्ट्रदेव्याः स्तम्भेश्वर्याः सुभद्रारूपेण परिगणनं जातम् । पूर्वपूजितकाष्ठस्तम्भस्य सुदर्शनरूपेण उपासना जाता । अनेन भावेन मूर्त्तिचतुष्टयस्य कल्पना विहिता ।

ख्रीष्टपूर्वपञ्चमशतके नन्दवंशस्य राजत्वसमये उत्कलेषु ब्राह्मण्यधर्मस्य अभ्युत्थानमन्येषां धर्माणां न्यूनत्वं च आस्ताम् । अस्मिन्नेव समये श्रीजगन्नाथः ब्राह्मण्यधर्मस्य देवता आसीत् । परन्तु ख्रीष्टपूर्वतृतीयशतके अशोकस्य कलिङ्गयुद्धानन्तरं उत्कलेषु बौद्धधर्मस्य प्राधान्यमासीत् यद्द्वारा श्रीमन्दिरे बौद्धधर्मस्य प्रभावः परिलक्षितः । ख्रीष्टपूर्वद्वितीयशतके खारवेलस्य राजत्वसमये श्रीजगन्नाथमन्दिरे जैनधर्मस्य बहुलप्रभावः पतितः । अस्य राजत्वसमये उत्कलेषु 'गजलक्ष्मी' पूजायाः प्रचलनमासीत् यद्द्वारा सिद्ध्यति यत् उत्कलेषु लक्ष्मीनारायणपूजायाः प्रसार आसीत् । चतुर्थशतके गुप्तवंशीयानां राज्ञां शासनकाले भागवतधर्मस्य प्रचारः जातः यद्द्वारा वैष्णवधर्मस्य तथा च ब्राह्मण्यधर्मस्य प्राधान्यं जातम् । बौद्धजैनधर्माणां विलयश्च जातः । षष्ठशतके राजा शशाङ्कः शासितवान् । सः ब्राह्मण्यधर्मस्य शैवधर्मस्य च समर्थकः आसीत् । तदनन्तरमुत्कलेषु

---

२५१. (क) ओडिशार इतिहास - हरेकृष्ण महताव ।
(ख) History of Orissa-Part I-R.D. Banarjee.
(ग) History of Orissa-N.K. Sahu.
(घ) Cult of Jagannatha-Dr.K.C. Mishra.
(ङ) History of Orissa-K.C. Panigrahi.

२५२. It is clear indication that they changed their religion within a century of their rule, i.e. in the begining of the nineth century A.D. Before this, the popularity of Purussottam and Balabhadra is known from epigraphical sources, namely the Neulpur Grant of Subhankara I, where the names occour.

-The cult of Jagannatha, p-22.

शैलोद्भववंशीयाः राजानः शासितवन्तः ये ब्राह्मण्यधर्मस्य तथा च शैवधर्मस्य समर्थकाः प्रचारकाश्चासन् । अस्मिन्समये उत्कलेषु शैवब्राह्मण्यधर्मयोः स्रोतोद्वयं प्रवाहितम् । शैलोद्भवात् पूर्वं माठरवंशस्य वशिष्ठवंशस्य च राजानः शासकरूपेण प्रसिद्धाः ये खलु शैववैष्णवधर्मयोः [२५३]समर्थकाः आसन् । पूर्वतः प्रचलित[२५४]लक्ष्मी-नारायणपूजायाः प्रसारः एतेषां शासनकाले एव अभूत् यस्य च परवर्त्तिपरिणामः माधवपूजा एवेति कथयितुं शक्यते ।

अनन्तरं सप्तमशतके भौमकरवंशीयाः तोषलीराज्यं शासितवन्तः यस्य राजधानी आसीत् [२५५]गुह्येश्वरपाटकम् यत् अधुनातनयाजपुर-नगरस्य निकटवर्त्ति आसीत् । त एव भौमवंशीयाः प्रथमतः शैवधर्मस्योपासकाः भूत्वा अन्तिमे वैष्णवधर्मं प्रति आकृष्टाः सन्तः वैष्णवधर्मं गृहीतवन्तः ।

सोमवंशीयराजा महाशिवगुप्तः द्वितीययययातिः अवसरेऽस्मिन् भौमराजत्वं दुर्वलं मत्वा युद्धेन विजित्य तोषलीमधिकृतवान् । ययातिः कर्णाट-लाट-गुर्जर-काञ्चि-कलिङ्गोत्कलराज्यानि अधिकृत्य महापराक्रमशाली राजा आसीत् । एतेषां राज्यानामधिकारानन्तरं द्वितीयययातिः स्थलविशेषे वैष्णवप्रधानमन्दिराणां स्थापनं कृतवान् । तत्र महाशिवगुप्तः ययातिः मादलापाञ्जिवर्णित । सः जीर्णजगन्नाथ-मन्दिरस्य निर्माणकर्त्ता ययातिकेशरी इति नास्ति संशयलेशः । तदवसरे याजनग्रे यज्ञानां सम्पादनार्थं भारतवर्षस्य उत्तरभागात् याज्ञिकब्राह्मणान् आनीय स्वराज्ये स्थापितवान् । यत्र बौद्धानां विहारः आसीत् तत्र विष्णुमन्दिरं कृत्वा तन्मन्दिरे पूजनार्थं तत्र ब्राह्मणवसर्तिं स्थापितवान् ।

---

२५३. Epigraphica Indica, Vol-XXX, pp.112-113

२५४. Cult of Jagannatha,p-5

२५५. The new kingdom started its existance since 736 A.D. which as will be shown later was the initial year of the Bhouma Era recorded in their inscriptions, and fixed their Capital Guhadeva Pataka or Guheswarpataka mentioned in all their copperplate grants.
-History of Orissa. - K.C. Panigrahi, p.68.

जगन्नाथमन्दिरनिर्माणसम्बन्धे तथ्यमेकं [256]मादलापाञ्जिग्रन्थे उपन्यस्तं वर्त्तते यत् ययातेः राजसिंहासनारोहणस्य १४७ संवत्सरेभ्यः प्राक् 'रक्तवाहु'नामकः यवनराजा दिल्लीतः पुरुषोत्तमक्षेत्रं प्रति आक्रमणं कृतवान् । तदा भयभीताः सन्तः भक्तजनाः जगन्नाथदेवप्रतिमां सोनपुरं नीत्वा गुप्तभावेन तत्र स्थापितवन्तः । ततः १४६ संवत्सरानन्तरं तस्य जगन्नाथदेवस्य मूर्त्तिः ययातिमहाराजेन पुनः श्रीक्षेत्रे तन्निर्मिते ३८ हस्तपरिमितोच्चताविशिष्टे मन्दिरे प्रतिष्ठापिता । अतएव एतादृशेन कर्मणा राजा ययातिः [257]'द्वितीयः इन्द्रद्युम्नः' इति ऐतिहासिकीं प्रसिद्धिं गतः । पुनः स्वेष्टदेवस्य महेश्वरस्योपासनार्थं भुवनेश्वरे लिङ्गराजमन्दिरस्य निर्माणकार्यस्य प्रारम्भं कृतवान् । डॉ० काह्नुचरणमिश्रसम्पादिते [258]'ओड्रदेशराजवंशावली'नामके ग्रन्थे तथा च [259]'राजभोग इतिहास' इत्याख्यग्रन्थे ययातिना पुरीस्थश्रीजगन्नाथ-मन्दिरस्य तथा च भुवनेश्वरस्थलिङ्गराजमन्दिरस्य निर्माणं कृतमिति उल्लेखोऽस्ति । कालडिण्डीलेखे वर्णितमस्ति यत् पूर्वचालूक्य-वंशीयराजा प्रथमराजराजः यः १२२२-२३ खीष्टाब्दमध्ये सिंहसनारोहणं कृतवान् तस्य [260]शिलालेखे उल्लिखितं वर्त्तते-

---

२५६. एहि महाराजाङ्क द्वितीयअङ्के डिलिरु रक्तबाहु आसिवा वारताकु परमेश्वरङ्कु सुनुपुर गोपालि घेनिगले ।

-मादलापाञ्जि - पृ०- ४ ।

२५७. श्रीपुरुषोत्तमे शङ्खनाभिमण्डले हा३८थ करि पटल गोटाए तोलि प्रतिष्ठा करि परमेशरङ्कु विजे कराइले । ए महाराजाङ्क अं३के ककडा दि २५ने सिंहासने विजे कराइले । एहि अनुकूले भुवनेशर देउलकु शुभ देले ।

- तत्रैव - पृ०- ६ ।

२५८. "ताहापरे राजा अठतिरिश हातरे मन्दिर निर्माण करि, ताकु प्रतिष्ठा करि तहिँरे श्रीमूर्त्तिङ्कु स्थापन कले । एहा परे श्रीविमलादेवीङ्कर मन्दिर तिआरिले। अनन्तर श्रीभुवनेश्वरक्षेत्ररे श्रीलिङ्गराज मन्दिर पाइँ शुभ देले ।"

- ओड्रदेश राजवंशावली - पृ०- ४७ ।

२५९. राजभोग इतिहास - पृ०पृ०- ७१-७२ ।

२६०. (क) Epigraphica Indica, Vol.XXIXpp.63-64.

(ख) Indian Antiquity, vol-XIX, p.98.

श्रीधाम्नः पुरुषोत्तमस्य महतो नारायणस्य प्रभो-
र्नाभि पङ्केरुहोद्भवजगतः स्रष्टा स्वयम्भूः स्मृतः ॥ इति ।

१०७४ खीष्टाब्दे गङ्गवंशस्य पराक्रमशाली राजा चोडगङ्गदेवः सोमवंशीयं राजानं पराजित्य कलिङ्गाधिकारं कृतवान् । शिवभक्तः सः प्रथमतया 'परममाहेश्वरः' इत्युपाधिना विभूषितो जातः । अतएव चोडगङ्गदेवस्य वंशधराः प्रथमतः शिवभक्ताः आसन् । परन्तु उत्कलविजयानन्तरं वैष्णवधर्मं प्रति ते आकृष्टाः सन्तः शैवधर्मेण साकं वैष्णवधर्ममपि गृहीतवन्तः । प्रथमतः तेषां राजधानी मुखलिङ्गाख्य-स्थाने अथवा कलिङ्गनगरे आसीत् । यदा चोडगङ्गदेवः उत्कलान् विजितवान् तदा सः स्वराज्यस्य राजधानीं कटकनगरे स्थापितवान् । चोडगङ्गदेवः उत्कलीयान् तथा वङ्गीयान् राज्ञः पराजित्य ततः धनरत्नानि संगृह्य तानि श्रीजगन्नाथमन्दिरपरिसरे एकस्मिन् कूपे गोपनभावेन स्थापयामास । यदा स कूपः रत्नैः पूर्णतां गतः तदा सः श्रीमन्दिरस्य निर्माणकार्यं प्रारब्धवान् । तद्दिनात् तस्यैव कूपस्य नाम 'सुवर्णकूपः' (सुनाकुअँ) इति किम्बदन्तीप्रसिद्धिः[२६१] । मादलापाञ्जि-प्रतिपादनानुसारम् अनङ्गभीमदेवेन सम्पादितः असौ कूपः । ययाति-महाराजनिर्मितश्रीमन्दिरस्य जीर्णोद्धारः चोडगङ्गदेवेन कृतः ।

श्रीजगन्नाथमन्दिरस्य निर्माणे उद्देश्यद्वयं चोडगङ्गदेवेन साधितम् । तत्तु राजनैतिकम् उद्देश्यम्, धार्मिकम् उद्देश्यं चेति । इष्टदेवस्य जगन्नाथदेवस्य मन्दिरनिर्माणद्वारा प्रान्तीयजनैः समादृतो भूत्वा उत्कलेषु राजनैतिकस्थितिं सुदृढां सुरुचिरां च कृतवान् राजा चोडगङ्गदेवः । तदवसरे देवपूजननिमित्तं भारतवर्षस्य उत्तरदिग्भागतः ब्राह्मणान् आनीय तेषां वसतिनिमित्तं [२६२]सुव्यवस्थां कृतवान् । ततः आरभ्य श्रीजगन्नाथसंस्कृतेः पुरुषोत्तमधाम्नः वा प्राधान्यं जातमिति संस्कृतसाहित्ये बहुत्र प्रमाणं समुपलभ्यते । चाडगङ्गदेवः १११२

---

२६१. बडदेउल उत्तरपाशरे कूप कले । एथि उत्तारु स्नाहानपूर्णमी दिनकु सुनाकुअं कले । -मादलापाञ्जि - पृ०- ३३ ।

२६२. Epigraphica Indica, vol-XXIX,pp44-48 (Garteswar Temple inscription- Cholagangadeva).

खीष्टाब्दतः ११४२ खीष्टाब्दमध्ये श्रीजगन्नाथमन्दिरस्य निर्माणं कृतवान्। फलतः [२६३]गङ्गवंशस्य प्रशस्तौ चोडगङ्गदेवस्य प्रशंसा समाधिका सुरुचिरा च जाता इति । तदा उत्तरभागे चोलचालुक्य-प्रभृतिप्रदेशेषु श्रीवैष्णव-सम्प्रदायस्य प्रचारकेन रामानुजाचार्येण विशिष्टाद्वैतवादस्य प्रचारः कृतः । चोलचालुक्यप्रभृतिप्रदेशानां राजवंशीयैः साकं चोडगङ्गदेवस्य सुसम्पर्कः आसीत् । अतएव उत्तरभागे प्रचलित[२६४]श्रीवैष्णवधर्मस्य ग्रहणं चोडगङ्गदेवेन तथा च तस्य पारिषदवर्गेण कृतमिति ज्ञायते । तदवसरे तान्त्रिकपद्धत्याः ब्राह्मणरीत्या च मूर्त्तिपूजाविधानं प्रचलितं जातम् । स्वगुणप्रकटनेन चोडगङ्गदेवः विहलदेशीयबौद्धराजभिः साकं सुसम्पर्कं स्थापितवान्। इत्थमपि सिंहलदेशेन सह सुसम्पर्कबृद्धिनिमित्तं स्वपुत्रं [२६५]कामार्णवं तत्र सः प्रेषितवान् ।

---

२६३. (क) After this Chodaganga seems to have devoted his time, wealth and energy towards construction of the great temple of Jagannatha at puri which fact finds mention in a verse in his grandsons(Rajarajas) Dosgoba Copperplate inscription of 1198 A.D.-

"पादौ तस्य धरान्तरीक्षमखिलं नाभिश्च सर्वा दिशः
श्रोत्रे नेत्रयुगं रवीन्दुयुगलं मूर्द्धापि च द्यौरसौ ।
प्रासादं पुरुषोत्तमस्य नृपतिः को नामकर्त्तुं क्षमः
तस्येत्यादि नृपैरुपेक्षितमयं चक्रेऽथ गङ्गेश्वरः ॥"

History of Gangas, P-II, verse-27, p.6

(ख) O.H.R.J. vol-III,P.13

(ग) J.A.S.B. ,vol-LXV,1896,part-II,p.229

२६४. Inscription of Orissa, vol-III,P-I,P.56

२६५. (क) Inscription of Orissa, vol-II,S.N. Rajguru.p.15

(ख) Chodaganga as a monarch and a patron of religion, saved Utkal from hetorogenous and conflicting theories relating to the worship of this God,Purussottam, who happened to be an object of contest between the Sramanas and the Brahmanas. He fully realised that for his country a fresh flanger became imminent in the form of a muslim invasion from the north eastern region. x x x x x x x His son Kamarnava, is said to have visited Ceylon. The friendship of the Ganga Kings of orissa with the Buddist kings of

चोडगङ्गदेवात् परं १०६४ शकाब्दे ११४२ खीष्टाब्दे वा कामार्णवः सर्वलोकैकनाथजगन्नाथदेवस्य मन्दिरे उत्कलीययुवराजरूपेण अभिषिक्तः जातः इति गङ्गवंशशिलालेखात् ज्ञायते इति [२६६]मिश्रमहोदयैः प्रतिपादितम् । यदि स सर्वलोकैकनाथः पुरुषोत्तमजगन्नाथः भवेत् तर्हि ११४२ खीष्टाब्दे जगन्नाथादिमूर्त्तित्रयस्य स्थापनं चोडगङ्गकृतमन्दिरे जातमिति अनुमातुं शक्यते । अनङ्गभीमदेवस्य प्रधानपृष्ठपोषकत्वेन पुनः श्रीजगन्नाथसंस्कृतेः प्राधान्यं विस्तारितम् । [२६७]मादलापाञ्जिमध्ये उल्लिखितमस्ति यत् श्रीजगन्नाथमन्दिरस्य निर्माता अनङ्गभीमदेवः एव । परन्तु केचन ऐतिहासिकाः

Ceylon was possible because of some religious understanding between the Buddhists and Hindus.

- The Cult of Jagannatha, pp. 40-51

२६६. (क) Chodaganga's son Kamarnava, was anoited as 'Yuvaraja' during the lifetime of his father in saka 1064 at the temple of Sarvalokeakanatha,i.e. Jagannatha.

-The cult of jagannatha,p.41

(ख) Chodaganga ruled for 70 years, saka-999(1077 A.D.) to saka1069(1147 A.D.). He was succeeded by his son Kamarnavadeva whose coronation took place at Purusottam(Puri) during the lifetime of his father in saka 1064 (1142 A.D.) according to the following verse-

"वेदर्त्तुर्व्योमचन्द्रप्रमितशकसमाः प्राप्तकाले दिनेशे
चापस्थेन्यगृहौघे बलवतीरिपुषु प्रक्षयं प्राप्तवत्सु ।
अस्मिन् मुर्द्धाभिषिक्ते नृपवरतनये सर्वलौकेकनाथे
श्रीमत्कामार्णवेशे जगदभवदिदं तत्तदानन्दपूर्णम् ॥"

-O.H.R.J., vol-III, P-I,verse-35,pp.59-60.

२६७. (क) १५अङ्के फगुण शुक्ल दशमी तत्काल एकादशी गुरुवारवेल १४ दण्ड करि प्रमेश्वरङ्क सम्पूर्ण वृषलग्ने अभिजितमुहुर्त्ते तोलाइ देउल प्रतिष्ठा विजे कराइ भोगमदफुल भिआइले ।

-मादलापाञ्जि -पृ०- ३१ ।

(ख) एहि प्रतिष्ठाकर्म वैशाखशुक्लपञ्चमी गुरुवार दिन होइथिला । एहि दिन बडदेउल भितरे जगदीश्वरङ्कर श्रीमूर्त्तिस्थापन करायाइ थिला एवं भैरवप्रतिमा मध्य स्थापन करिथिले । एहि समयरे शकाब्द ११९९ ।

-तत्रैव -पृ०- ५३ ।

मतं पोषयन्ति यत् अनीयंकभीमः अस्य मन्दिरस्य निर्माता । अपरे अनीयंकभीमदेवानङ्गभीमदेवयोर्मध्ये नास्ति प्रभेदः, नामद्वयम् एकस्यैव व्यक्तिविशेषस्य इति प्रतिपादयन्ति । परन्तु ऐतिहासिकमतानुसारं तयोः शासनकालः भिन्न एव ।

श्रीराजेन्द्रलालमित्रमहोदयाः श्रीमन्दिरस्य निर्माणम् अनङ्गभीमदेवेन (तृतीयेन) कृतमिति प्रतिपाद्य ११११ शकाब्दे श्रीमन्दिरस्य निर्माणमभूत् इति कथयन्ति । एतत्प्रसङ्गे ते [२६८]श्लोकमिममुद्धरणरूपेण प्रतिपादयन्ति यत् -

शकाब्दे रन्ध्रशुभ्रांशुरूपनक्षत्रनायके ।
प्रासादं कारयामासानङ्गभीमेन धीमता । इति ॥

अष्टादशशताब्द्यां वासुदेवरथेन लिखिते गङ्गवंशानुचरितमिति नामके [२६९]चम्पूकाव्ये एतद्विषये भिन्नं वर्णनं समुपलभ्यते, यथा-

अङ्कक्षौणिशशाङ्केन्दुसम्मिते शकवत्सरे ।
अनङ्गभीमदेवेन प्रासादः श्रीपतेः कृतः ॥ इति ।

इतिहासगवेषकैः [२७०]सत्यनारायणराजगुरुमहोदयैः कथ्यते यत् नागरीताम्रलेखे तृतीयस्य अनङ्गभीमदेवस्य राजत्वं १२३० खीष्टाब्दे आसीदिति लिखितमस्ति येन च स्वराजत्वसमये वाराणसीकटके अधुनातनकटकनगरे एकं जगन्नाथमन्दिरं निर्मितम् । परन्तु

---

२६८. रन्ध्रः- ९, शुभ्रांशु- १, रूपः-१, नक्षत्रनायकः- १, 'अङ्कानां वामतो गतिः' इति न्यायेन ११११ शकाब्दः अर्थात् ११९७ खीष्टाब्दः इति ।

O.H.R.J. Vol-V, No-1, p.62

२६९. अङ्कः- ९, क्षौणि- १, शशाङ्क- १, शकवत्सरः- १, आर्थात् ११११ शकाब्दः अथवा ११९७ खीष्टाब्दः इति ।

-गङ्गवंशानुचरिते - पृ० ८/३२ ।

२७०. Accroding to Nagari Copper plate grant of Aniyankabhima-III of 1230 A.D. a temple of Jagannatha was built at Varanási Katak (the modern Cuttack) by the King. Perhaps the compiler of Madalapanji confused that with the great temple at Puri and that story was subsequently taken into popular view.

-O.H.R.J., Vol-V, No.-1, p.62

मादलापाञ्जिकारः भ्रमवशतः वाराणसीकटकस्थाने पुरीस्थ-श्रीजगन्नाथमन्दिरस्य नामोल्लेखं कृतवान् इति । स देवप्रतिमः राजा अनङ्गभीमदेवः जगन्नाथदेवस्य प्रतिनिधिः इत्यत्र [२७१]पातालेश्वरमन्दिर-शिलालेखः एव प्रमाणम् । चोडगङ्गदेवनिर्मितमन्दिरस्य असम्पूर्णस्य अंशस्य समाप्तिः अनङ्गभीमेन कृता तथा च श्रीमन्दिरे पूजायाः साधुतानिमित्तं 'छतिशानियोगः' इति व्यवस्था कृता । सोऽनङ्गभीमदेवः (तृतीयः) परमवैष्णव-परममाहेश्वर-दुर्गापुत्र-श्रीपुरुषोत्तमपुत्र-रुद्रपुत्रप्रभृतिभिः [२७२]उपाधिभिः अलंकृतः आसीत् इति पूर्वगोदावरी-मण्डलान्तर्गतद्राक्षारामशिलालेखात् प्रमाणं मिलति ।

अनङ्गभीमदेवस्य कन्या हैहयवंशस्य राज्ञः परमाद्रिदेवस्य पत्नी चन्द्रिका मुसलमान (यवन) जातीयानाम् आक्रमणेन परमाद्रिदेवस्य मरणानन्तरं भुवनेश्वरे 'अनन्तवासुदेवमन्दिरं' निर्मितवती । तत्र सा वासुदेवं कृष्णं तथा देवीं सुभद्रां स्थापितवती इति एतद्विषये तत्र [२७३]शिलालेखात् तथा च ऐतिहासिकसिद्धान्तात् ज्ञायते ।

---

२७१. O.H.R.J. Vol-V, Nos. 1 & 2, pp. 66-67.

२७२. Like Chodaganga, he also used the title of "Parama-vaishnava" and "Parammaheswara". Further he used the title "Parambhattaraka", as well as three other titles, viz. "Durgaputra", "Shri Purusottamputra" and "Radhaputra". x x x x x It is not possible to explain the ex-pression made in a stone inscription of Dhrakhyarama in Godavari where the above new titles of Anangabhima-III have been used.

-South Indian Inscription, Vol-IV, 1329, page.467

२७३. "तस्माद् भूपतिभूचन्द्राच्चन्द्रिकाजनि सुन्दरी ।
चन्द्रानन्दामृतासारैः स्नपयन्ति जगज्जनः ॥
हैहेयवंशावतंसः परमर्द्दी सहजसारतारे यः ।
तारापतिमितिशेते पतिरस्याः समरपारीणः ॥
पादात् शिरोवधि जगत् कमनीयरूपं
मूर्त्तस्थः केशवमसौ शुभकर्मभाजम् ।
सच्चक्रसंगतिमतिप्रसरप्रसादं
प्रासादयेतमसमं स्वमिव व्यधत्तः ॥

कालक्रमेण यवनानां वारम्बारम् आक्रमणेन श्रीजगन्नाथक्षेत्रे बहूनि मन्दिराणि विनष्टानि इति [२७४]मादलापाञ्जितः उपलभ्यते । यवनानामाक्रमणेन श्रीजगन्नाथमन्दिरं क्षतिग्रस्तं जातं यत्र च मन्दिरसेवकाः तदवसरे मूर्त्तित्रयस्य स्थानान्तरं कृतवन्तः इत्यपि मादलापाञ्जितः ज्ञायते ।

अनन्तरं १४५२ ख्रीष्टाब्दे कपिलेश्वरदेवः उत्कलेषु सूर्यवंशस्य राजत्वेन सिंहासने अधिष्ठितः । अनेन ब्राह्मण्यधर्मस्य पृष्ठपोषकता कृता तथा च गौडकर्णाटप्रभृतिदेशान् विजित्य सुप्रसिद्धोपाधिः प्राप्ता इति गोपीनाथपुरमन्दिरशिलालेखात् ज्ञायते इति [२७५]विद्वांसः प्रमाणम् । तत्र सन्निहितोपाधिः इत्थं यथा-

कर्णाटोज्झासिंहकलवरविजयीमालवध्वंसलीलाः ।
जंघातो गौडमर्दिभ्रमरवरनृपोध्वस्तदिलिन्द्रगर्वः ॥

कपिलेश्वरदेवः कपिलेन्द्रदेवनाम्ना ख्यातः आसीत् । कपिलेश्वरदेवस्यानन्तरं पुरुषोत्तमदेवः सिंहासनारोहणं कृत्वा काञ्चिनगरीमधिकृत्य काञ्चिकन्यां पद्मावतीमुदवहत् । तदवसरे सः काञ्चिस्थभण्डगणेशमूर्त्तिमानीय[२७६] श्रीमन्दिरे स्थापितवान् इति

मुकुटाद्यैरलंकारैः शक्त्या भक्त्या मुदान्विता ।
बलकृष्णसुभद्रां च श्रेयसेऽसावभूषयत् ॥

-Ananta Vasudeva Temple Inscription -verses 5,7,22,23 quoted in Bhubaneswara Shilalipi.

-by Paramanada Acharya, p.450.

२७४. मादलापाञ्जि -पृ० पृ०- ५२-५५ ।

२७५. J.A.S.B., 1900 Vol-LXIX, pp.178-188.

२७६. यथा देवी लक्ष्मीः नृसिंहदेवस्याङ्के सर्वदा आसीनेति दृश्यते तथा तस्य गणेशदेवस्य अंङ्के पुष्टिदेव्याः उपवेशनं दृश्यते । तस्य गणेशस्य शुण्डः पुष्टिदेव्याः योनिद्वारं स्पृशतीति कारणं प्रदर्श्य केनचित् सः गणेशः भण्ड इति तर्कयितुमिष्यते किन्तु तन्न यथार्थं भवेत् यतः कामनामूलकत्वात् देवदेवीनां कल्पना बहुत्र दृश्यते । अतः काञ्चीनरपतिना प्रतिष्ठितेयं युगलमूर्त्तिः गणेशमूर्त्तिः वा अभीष्टदायिका इति कृत्वा सर्वसिद्धिदायकोऽयं गणेशः देवः इति अवधार्यम् ।

एतद्विषये[२७७]मादलापाञ्जिग्रन्थे सविस्तृतं विवरणं लिपिबद्धं वर्त्तते । पुरुषोत्तमदेवः १४६७ खीष्टाब्दात् १५०४ खाष्टाब्दं यावत् शासितवान् । पुरुषोत्तमदेवः पञ्चदेवोपासकः आसीत् । सः 'रुद्रपुत्रः' नाम्ना प्रसिद्धः आसीत् ।

पुरुषोत्तमदेवस्यानन्तरं तस्य पुत्रः प्रतापरुद्रदेवः १५०४ खीष्टाब्दे राजसिंहासनमारुह्य वैष्णवधर्मस्य प्राधान्यं समाजे प्रतिष्ठापितवान् । तस्य राजत्वसमये १५०९ खीष्टाब्दे वैष्णवधर्मस्य प्रचारकः आचार्यः चैतन्यः स्वशिष्यैः साकं पुरीमागतवान् । तदवसरे राजा प्रतापरुद्रदेवः चैतन्यस्य शिष्यत्वं गृहीत्वा साम्राज्यपरिचालनं यथोचितं न कृतवान् । यद्यपि नैष्ठिकब्राह्मणाः एतादृशधर्मस्य विरोधं कृतवन्तः तथापि तदानीमेव जगन्नाथाच्युतयशोवन्तबलरामानन्ताः पञ्च सखायः वैष्णवधर्मस्य प्राधान्यविस्तारच्छलेन भक्तिमूलकग्रन्थान् रचितवन्तः । युद्धयात्रां परित्यज्य राजा प्रतापरुद्रः केवलं हरिनामसंकीर्त्तनं कृत्वा कालयापनं कृतवान् । जयदेवविरचितगीतगोविन्दस्य पठनं श्रीमन्दिरे प्रतिदिनं प्रचलनं जातम् । अतः निम्बार्क-रामानुज-बल्लभाचार्य-चैतन्यप्रभृतयः वैष्णवाः राधाकृष्णसम्प्रदायस्य वैष्णवसंस्कृतेः वा प्रचारं श्रीक्षेत्रे बहुलतया कृतवन्तः ।

जगन्नाथदासः संस्कृतभागवतस्योत्कलभाषानुवादं कृत्वा तदानीं वैष्णवधर्मं प्रचारितवान् । अधुनाऽपि उत्कलीयाः स्वगृहेषु जगन्नाथदासकृतं भागवतं प्रतिदिनं भक्तिभावेन पठन्ति । षोडशशताब्द्यां प्रतापरुद्रदेवस्य प्रधानसेनापतिना कविडिण्डिम-जीवदेवाचार्येण लिखितं भक्तिभागवतमहाकाव्यम् अत्यन्तमादृतं सञ्जातमिति । तदवसरे कविकर्णपूरेण विरचिते चैतन्यचन्द्रोदय-मित्याख्ये एकस्मिन् नाटके प्रस्तावनायां श्रीजगन्नाथदेवस्य गुण्डिचायात्रामहोदधिप्रसङ्गप्रभृति वर्णितं इति[२७८]उपलभ्यते ।

---

२७७. मादलापाञ्जि - पृ०पृ०- ५२-५३ ।

२७८. सूत्रधारः- अलमतिप्रसङ्गेन भो-भो अद्याहं रत्नाकरवेलाकन्दलितदलित कज्वलोज्ज्वलामहानीलमणिकन्दलस्य नीलगिरिदरीदृश्यमानं घनदलमाल-तमालतरुकडम्बस्य गभीरतरकोटरमहावट वटनिकटप्रकटप्रमोदमातङ्गस्य

प्रतापरुद्रदेवस्य परवर्त्तिपराक्रमशाली राजा आसीत् मुकुन्ददेवः, यस्य शासनकालः आसीत् १५५९ खीष्टाब्दात् १५६८ खीष्टाब्दमध्ये उत्कलेषु । शासकरूपेण जगन्नाथसंस्कृतेः पृष्ठपोषकत्वेन च सः प्रख्यातः आसीत् यस्य राजत्वे [२७९]'कलापाहाड'नामकः यवनः जगन्नाथमन्दिरस्य ध्वंसकरणेच्छया सह जगन्नाथसंस्कृतेः लोपसाधनार्थं बहुवारम् आक्रमणं कृतवान् । ततः सुरक्षानिमित्तं राजा मुकुन्ददेवः

भगवतः श्रीपुरुषोत्तमस्य गुण्डिचायात्रायां सकलं दिग्विदिग्विहारीहारीनिकर मुखरमुखरममाण जयध्वनिध्वनित जगदण्डभाण्डकुहरे प्रमोदमातङ्गस्य विभक्तभक्तजनजनित भगवत्कीर्त्तन-कुतुहलहलहलास्वानस्वानन्दित-दिग्बन्धुनिकरे सविमर्दमर्दलसाहचर्यलम्पटपटहमहापणपणव स्वनस्वनल्प-ढक्कारक्कारः गभीरभेरीभाङ्कृतिदुन्दुभि-दुङ्कारकारेणान्यशब्दाग्रह-निरवधिवधिर[illegible]ाणभगवत् श्रीकृष्णचैतन्य-तन्मयामान् तिरोभाव-भावितमान सारुषापरुषादृशावशादतशात् वैमुख्येन हेतुना तथाविधोपि परमानन्दे मानं देयमपि न कुर्वताऽवताऽविनिमृताभिलाषेण राजपतिना प्रतापरुद्रेणाऽदिष्टोऽस्मि ।

-चैतन्यचन्द्रोदये- पृ० १-२ ।

२७९. (क) कलापाहाड एकःहिन्दूसैनिकः आसीत् । स यवनकन्या सह विवाहं कृत्वा हिन्दुसमाजे आगन्तुं चेष्टितवान् । परन्तु श्रीमन्दिरस्थ-मुक्तिमण्डपपण्डितसभा तं 'विधर्मी' इति आख्यां दत्वा हिन्दुसमाजे न गृहीतवान् । अतएव तस्य मनसि हिंसा जाता । प्रतिशोधपरायणः सः जीवद्दशामध्ये हिन्दुमन्दिराणां ध्वंससाधनं कर्त्तुं शपथं नीतवान् ।

(ख) कलापाहाड पश्चिमआडु कंसवासादेइ कटक आसि बेढिले । ए बहुत युझ कले ।

- मादलापाञ्जि- पृ०- ६० ।

(ग) Kalapahada, the General of Sulaman Karani on his conquest of the country flung of image in-to fire and burnt it and afterwards cast it into the sea.

-Ain-e-Akabari, P-II, Abul Fazal, p.128.

(घ) Kalapahada, started and extensive campign for a large scale destruction of the Temples and deities of the Hindus. It is also said that he removed the images from the Jagannatha Temple and put them into the fire.

-The Cult of Jagannatha, p.60.

श्रीमन्दिरात् श्रीजगन्नाथादिमूर्त्तित्रयं बहिरानीय अधुतन जगत्सिंहपुरकटकमण्डलान्तर्गतकुजङ्गदुर्गे संरक्षितवान् ।

मुकुन्ददेवस्यानन्तरं भोजराजस्य प्रतिष्ठाता रामचन्द्रदेवः सिंहासनमारूह्य श्रीमन्दिरस्य सर्वविधामुन्नतिं साधितवान् । तस्य राजत्वस्य नवमवर्षे कुजङ्गदुर्गात् श्रीजगन्नाथादिमूर्त्तित्रयमानीय पुनः श्रीमन्दिरे [२८०]प्रतिष्ठापितवान् यस्मात् सः 'दुती इन्द्रद्युम्नः' 'द्वितीयइन्द्रद्युम्नः' 'अभिनवइन्द्रद्युम्नः' वेति [२८१]उपाधिना प्रसिद्धो

---

२८०. १ अङ्के राजा कुजङ्गगडरु दारु अणाइले । खुरुधा कटके वनयागकरि सुमुरति कराइले । ११ अङ्के दि १८न श्रावणशुक्लनवमी दिन श्रीपुरुषोत्तमबडदेउले रत्नसिंहासने विजे कराइले ।

- माद्लापाञ्जि - पृ०- ६२ ।

२८१. (क) समस्त संन्यासी ब्रह्मचारीमाने ब्राह्मणमाने श्रीरामचन्द्र महाराजाङ्कु 'दुती इन्द्रद्युम्न' बोलि शाढी देले ।

- तत्रैव - पृ०- ६३ ।

(ख) एहि रामचन्द्र 'द्वितीय इन्द्रद्युम्न' अवतार बोलि सेमाने स्वीकार करिथिले ।

- ओड्रदेशराजवंशावली - पृ०- ६१ ।

(ग) सुत्रधार............. कमलानिर्विशेषचरणकमलस्य कमलमुख कमलातुलमाध्वकमधुव्रतस्य नीलशैलशिरोमणेः भगवतः श्रीपुरुषोत्तमस्य केनापि कारणैनावसररसप्रयुक्तहृदयस्य सांप्रतमभिनवइन्द्रद्युम्ने राजपतौ श्रीरामचन्द्रस्य चरणकमलरोलम्बरामचन्द्रदेव कोटिजन्मार्जितः सुकृतप्रभावव तिकृपावशतः प्रकटितदारुमयमधुरमूर्तेः पुण्डरीकाक्षस्य गुण्डिचोत्सवोऽयं तदनन्तरसस्थं भगवन्तमनादिमध्यन्तमनन्तमालोक्यजन्म सफलयामि ।

- श्रीकृष्णभक्तिवात्सल्यचरिते - पृ०- १ ।

(घ) समस्त ब्राह्मणसामन्त भट्टसामन्तमाने आशिर्वाद करि 'नवीन इन्द्रद्युम्न' बोलि शिररे दुर्वाक्षतदेइ चारिगोटि शासन मागिले । वीररामचन्द्रदेव बोलि महाप्रभुङ्क प्रसाद आणि शिररे बान्धिले ।

- चकडापोथि- पृ०- ७ ।

(ङ) दारुब्रह्मप्रवलसुकृतान्निर्गतौपाधिलब्धा
विष्णोराज्ञामपि मम तनुमञ्जसीन्मीलयेति ।

जातः । ऐतिहासिकानां [२८२]केदारनाथमहापात्रमहोदयानां दृष्ट्या १५७५ खीष्टाब्दे जुलाईमासस्य सप्तदशतारिकायां एतदशुभकार्यं सम्पन्नं जातमिति ।

रामचन्द्रदेवस्यानन्तरं पुरुषोत्तमदेव-गङ्गाधरदेव-बलभद्रदेव-मुकुन्ददेव-दिव्यसिंहदेव-हरेकृष्णदेव-गोपीनाथदेवप्रभृतयः राजानः उत्कलराज्यं शासितवन्तः । अनन्तरं पराक्रमशाली वीरकिशोरदेवः उत्कलराजसिंहासने अधिष्ठितः सन् जगन्नाथमन्दिरस्योन्नतये भोगमण्डपस्य स्नानमण्डपस्य च निर्माणं कृत्वा रत्नवेद्याः संस्कारं कृतवान् इति [२८३]मादलापाञ्जि सूचयति ।

वीरकिशोरदेवस्य शासनकाले उत्कलराज्यं वस्तुतः मरहट्टा-शासनाधीनमासीत् । मरहट्टाराजनः श्रीजगन्नाथदेवस्य उपासकाः आसीत् । तदवसरे ते जगन्नाथमन्दिरस्य चतुर्पार्श्वे प्राचीरं निर्मिय कोणार्क-मन्दिरात् [२८४]अरुणस्तम्भमानीय श्रीमन्दिरस्य सिंहद्वारे स्थापितवन्तः ।

इन्द्रद्युम्नो नव इति यशः प्रापयेऽस्यातिदिव्यां
नव्यां भव्यां......... नीलशैले निवेश्य ।

- वसन्तोत्सवमहाकाव्ये ।

(च) अभिनव इन्द्रद्युम्न अवतार
युगे युगे रहिले ए किरति विस्तार
रामचन्द्र नरपति दुर्लभ कीर्त्ति ए
चान्दभणे इहपरलोके गति ए ॥

- चान्दकवि प्राचीनगद्य- पद्यादर्श - पृ०- ११२ ।

२८२. खुरुधार इतिहास - केदारनाथ महापात्र - पृ०- १३ ।

२८३. ए राजा वीरकिशोरपुर शासनकाले ए राजाङ्क ठाकुरमाने बडदेउल भीतरे निर्माल्यमण्डप जीर्णहोइथिलाकु कनकमण्डप तोलाइले । दोलयात्रामण्डप जीर्णहोइथिलाकु दोलमण्डप कले । स्नानयात्राकु विजे पहण्डपथर बसाइले । ए उत्तारु खटशेयघर, शयनघर, फुलवटा योगडाघर नूआकरि कले ।

-मादलापाञ्जि- पृ०- ७९-८० ।

२८४. (क) .... कोणार्कक्षेत्ररु मुगुनिपथरखम्ब आणि सिंहद्वार एक चकडारे रखाइले ।

-मादलापाञ्जि- पृ०- ८१ ।

वीरकिशोरदेवस्य शासनानन्तरं न तादृशः कश्चन पराक्रमी राजा जगन्नाथसंस्कृतिरक्षणार्थं प्रसिद्धः आसीदिति दृश्यते । मरहट्टशासनानन्तरं १८०३ खीष्टाब्दात् आरभ्य उत्कलसाम्राज्यं व्रिटिशशासनाधीनं जातम् । तेषां शासनकाले जगन्नाथसंस्कृतेः सुरक्षानिमित्तं निरपेक्षभावेन विविधाः चेष्टाः तैः कृताः । भारतवर्षस्य स्वाधीनानन्तरं श्रीजगन्नाथसंस्कृतेः सुरक्षया सह विकाशनिमित्तं श्रीजगन्नाथमन्दिरस्य सुपरिचालनानिमित्तं च भारतसर्वकारैः स्वतन्त्रविधिव्यवस्था कृतेति सर्वैःविद्वद्भिः ज्ञातैव।

वैदिकलौकिकसाहित्ययोः श्रीजगन्नाथः-

संसारोऽयं वृक्षोस्वरूपोऽत्यन्तं विचित्रमयः । यथा सूक्ष्माकृतिविशिष्टात् बीजात् स्थूलाकृतिविशिष्टवृक्षस्योत्पत्तिः पुनः तस्मादेववृक्षात् तथा बीजस्य उत्पत्तिः चकार पंक्तिरिव गम्यमाना भवति तथा विशालसंसारस्यास्य मूलभूतबीजात् सूक्ष्माकृतिविशिष्टात् ब्रह्मणः एव संसारस्यास्य सृष्टिः भवति । ततो लयः, ब्रह्मणि एतत्सर्वमारोपितमित्यनुरोधेन तद्वृक्षाणां समाहारेण यस्य महद्धनस्य परिकल्पनं भवति, तत्र व्यष्टिसमष्टिविषये [२८५]ऋग्वेदे एव साधुरूपेण प्रतिपादितम् । संसारस्यास्य वृक्षरूपं [२८६]ऋग्वेद[२८७]कठोपनिषच्छवेता-[२८८]श्वरोपनिष

(ख) ओडिशार इतिहास - पण्डित कृपासिन्धुदाश - पृ०- २८४-२८५।

२८५. "किं स्विदवन क उ वृक्ष आस
यतोद्यावा पृथिवी तिष्टचक्षुः ।
मनस्विनो मनसा पृच्छतेदु तद्
यदध्यतिष्ठद् भुवनानि धारयन् ॥"
- ऋग्वेदे - १०/८१/४ ।

२८६. "द्वासुपर्णा सयुजासखाया समानं वृक्षं परिणस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वति अनश्नन्योऽभिचाकशीति ॥"
- तत्रैव - १/१६४/२० ।

२८७. "ऊर्ध्वमूलोऽर्वाकशाख एषोऽश्वत्थः सनातनः ।
तदेवशुक्रं तद्ब्रह्म तदेवामृतमुच्यते
तस्मिंलोकाः श्रिता सर्वेतदुनात्मेति कश्चन एतद्वैतत् ॥"
- कठोपनिषदि- २/५/१ ।

[289]नारायणोपनिषत्प्रभृतयः [290]श्रीमद्भगवद्गीता-[291]श्रीमद्भगवत-महापुराणादीनि च प्रकृष्टप्रमाणपुरसरं प्रतिपादयन्ति ।

अतएव संसारवृक्षस्य उत्पत्तिहेतो ब्रह्मबीजमेव कारणाम् । तस्मादेव सूीमब्रह्मणः विशालब्रह्माण्डस्य परिप्रकाशः । तस्मिन् च संसारवृक्षे वीवात्मपरमात्मनो विराजितौ । परन्तु जीवात्मा तत्र मायामयसंसारे लिप्तोऽस्ति । परमात्मा च अव्यक्तनिर्लिप्तत्वेन संसारे [292]बद्धमुक्तो भवति । तस्मात् निष्कर्षरूपेण भक्तिमुक्तिज्ञानफलदायक-कल्पतरुः ब्रह्मदारुः दारुब्रह्म वा श्रीजगन्नाथरूपेण नित्यपूज्यो वन्दनीय कीर्त्तनीयः [293]समुपास्यश्च । अतएव सृष्ट्यादौ पुरुषोत्तमश्रीजगन्नाथः

---

२८८. "द्वासुपर्णा सयुजा सखाय समानं वृक्षं परिणस्वजाते ।
तयोरन्यः पिप्पलं स्वद्वत्यनश्नन्नन्योऽभिचाकशीति ॥"
- श्वेताश्वतरोपनिषदि- ४/६ ।

२८९. "वृक्षं इव स्तव्यो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेणं सर्वम् ।"
- नारायणोपनिषदि- २ ।

२९०. "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।
छन्दांसि यस्य पर्णानि यस्तं वेव स वेदवित् ॥
अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषय प्रवाला ।
अधश्चमूलान्यनुसंततानि कर्मानुवन्धीनि मनुष्यलोके ॥"
-श्रीमद्भगवद्गीतायाम् - १५/१-२ ।

२९१. "सुपर्णावेतौ सदृशौ सखायौ यदृच्छयैतौ कृतनीडौ च वृक्षे ।
एकस्तयोः खादति पिप्पलान्नमन्येनिरन्नोऽपि बलेन भूयान् ॥"
- श्रीमद्भागवतपुराणे - ११/११/६ ।

२९२. "विद्याविद्ये मम तनु विद्धयुद्धव शरीरिणाम् ।
मोक्षवन्धकरी आद्ये मयया मे विनिर्मिते ॥
एकस्यैव ममाशंस्य जीवस्यैव महामते ।
वन्धोऽस्याविधयानादिर्विद्यया च तथेतर ॥"
- तत्रैव - ११/११/३-४ ।

२९३. "यस्याग्रे पत्रमेकं विलसतिनितरां पत्रयुग्मेन चित्रम् ।
यच्छाया लोकमात्रात् त्रिभुवनजनतां वाधते न त्रितापी ॥
अंघ्रि यस्याश्रयन्ते सकलसुमनसो नास्तिमूलं न चाग्रम् ।
नीलाद्रौ कोऽपि कल्पद्रुम इहतनुतां धीरं ते वाञ्छितानि ॥"

समग्रे विश्वेऽस्मिन् अनासक्तत्वेन वर्त्तमानः यस्य वशीभूताः [२९४]ब्रह्मादयः भवन्ति । ततः श्रीक्षेत्रे स एव व्यक्तकारेण विराजितः । तस्य ब्रह्माण्डवृक्षस्य शाखात्वेन परिचीयते । भक्तिमुक्तिश्च फलद्वयं यद्यपि तत्र सततं विराजितमस्ति तथापि साधारणजनाः तद्द्रष्टुं न पारयन्ति । केवलं स्थितधियः ज्ञानिनः तत्त्वदर्शिनः साधकाः च अवाङ्मानसगोचरं इन्द्रियातीतं दिव्यरूपं [२९५]तंद्द्रष्टुं भवन्ति ।

[२९६]परवर्त्तिसाहित्येऽपि एतद्विषये उत्कृष्टा वर्णना समुपलभ्यते । [२९७]ब्रह्मपुराणस्य मङ्गलाचरणे जगतः सृष्टिकर्त्ता नित्यानन्दमयः परमात्मा पुरुषोत्तम इति स्तुत्यानुकूल्येन पुरुषोत्तमस्य श्रीजगन्नाथदेवस्य उपन्यासः कृतः । [२९८]स्कन्दपुराणे च जगति दृश्यमानं सर्वं खलु ब्रह्म, नान्यदिति

२९४. "नस्योतगाव इव यस्य वशीभवन्ति
ब्रह्मादयस्तनुभृतो मिथुरर्धमानाः ।
कालस्य ते प्रकृतिपुरुषयोः परस्य
शं नस्तनोतु चरणः पुरुषोत्तमस्य ॥"
- श्रीमद्भागवतपुराणे- ११/६/१४ ।

२९५. "तद्विष्णोः परमं पदं सदा पायन्ति सूरयः ।
दिवीव चक्षुराततम् ॥" - ऋग्वेदे- १/२२/२० ।

२९६. "सबु रूपे ए उपमा उत्तम सम्भवे ।
विराजित भूजशाखा अधरपल्लवे ॥
भक्तिमुक्तिफलल अछि न देखन्ति केहि ।
स्वभावरे ब्रह्मदारु व्यस्तपदे रहि ॥"
-कोटिब्रह्माण्डसुन्दरी - उपेन्द्रभञ्जकृता ।

२९७. "यस्मात् सर्वमिदं प्रपञ्चरचितं मायाजगज्जायते
यस्मिंस्तिष्ठति याति चान्तसमयेकल्पानुकल्पे पुनः ।
यं ध्यात्वा मुनयः प्रपञ्चरहितं विन्दन्ति मोक्षं ध्रुवं
तं वन्दे पुरुषोत्तमाख्यममलं नित्यं विभुनिश्चलम् ॥"
- ब्रह्मपुराणे - १/१ ।

२९८. "जगच्चेदं जगन्नाथो नान्यश्चापि च कारणम्
अहं च न ततो भिन्नमतोऽसौ न पृथक् स्थितः ॥
हानं बहिरूपाधीनां प्रेमोत्कर्षेण भावनम्
दुर्लभा भक्तिरोषाहि मुक्तयेऽद्वैतसंशिता ॥"
- स्कन्दपुराणे उत्कलखण्डे - १०/८६/८८ ।

[299]वेदान्ततत्त्वानुरूपं श्रीजगन्नाथतत्त्वं समुपन्यस्तमस्ति । तदुद्देश्येन [300]श्रीशङ्कराचार्येण भक्तिगद्‌गद्‌चित्तेन सर्वक्षेमेश्वरात् श्रीजगन्नाथदेवात् केवलं तस्य दर्शनलाभार्थं स्तुतिः कृतेति सर्वजनप्रसिद्धिः ।

महाभारस्य अनुशासनपर्वणि पितामहेन भीष्मेन युधिष्ठिरं प्रति [301]श्रीविष्णुसहस्रनामस्तोत्रस्य कथनावसरे भगवतः यद्रूपं प्रकाशितं ततः किञ्चित् वैशिष्ट्ययुक्तं प्रकाशनं [302]श्वेताश्वतरोपनिषदि तथा च [303]श्रीमद्भगवद्गीतायां समुपलभ्यते । अपि भगवान् क्षराक्षराभ्यां पृथग्भूत्वा अविनश्वरत्वेन [304]पुरुषोत्तम इति आख्यातः सर्वेषु हृदयेषु

---

२९९. "सर्वं खल्विदं ब्रह्म ।" - छान्दोग्योपनिषदि - १४/१ ।

३००. "न याचे वै राज्यं न च कनकमाणिक्यविभवं
न याचेऽहं रम्यां सकलजनकाम्यां वरवधूम् ।
सदा काले काले प्रमथपतिना गीतचरितो
जगन्नाथस्वामी नयनपथगामी भवतु मे ॥"
- शङ्कराचार्यग्रन्थावल्यां जगन्नाथाष्टके - ७ ।

३०१. "यतः सर्वाणि भूतानि भवन्त्यादि युगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नाम सहस्रं मे श्रुणु पापभयापहम् ॥"
- श्रीविष्णुसहस्रनामस्तोत्रे - ११-१२ ।

३०२. "सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियं विवर्जितम् ।
सर्वस्य प्रभूमीशानं सर्वस्य शरण्यं बृहत् ॥"
- श्वेताश्वतरोपनिषदि - ३/१६-१७ ।

३०३. "सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥
सर्वेन्द्रियगुणाभासं सर्वेन्द्रियं विवर्जितम् ।
असक्तं गुणभृच्चैव निर्गुणं गुणभोक्तृ च ॥"
-श्रीमद्भगवद्गीतायाम् - १३/१३-१४ ।

३०४. (क) "सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनञ्च ।
वेदैश्च सर्वैरहमेववेद्य वेदान्तकृदवेदविदेव चाहम् ॥

विद्यमानः सर्वदैव इति तत्रैव प्रतिपादितम् । यथा च जीवविशेषः नरः स्वशरीरे जीर्णवस्त्राणि विहाय अन्यानि नूतनवस्त्राणि [३०५]परिधत्ते तथैव श्रीजगन्नाथसंस्कृतौ नवकलेवरोत्सवः अत्यन्तं वैशिष्ट्यपूर्णः । जीवेषु सर्वेषु एतच्छिक्षादानाय देवदेवश्रीजगन्नाथस्य अनयैव सहस्कृत्या जीवेऽपि ब्रह्म आरोपितम् । ब्रह्मणः सम्मिश्रणेन तत् रूपं [३०६]शरीरमिति अपि च जीवेभ्यः तस्य निर्गमनात् जीवस्य पञ्चत्वप्राप्तिरिति प्रसिद्धम् । अतएव जीवेषु दृश्यमानाः चेतनाशक्तिः ब्रह्म एव, यस्य च विनाशः न कदाचित् सम्भवति इति [३०७]श्रीमद्भगवद्गीतायामपि अभिव्यक्तम् । यद्यपि 'नायमात्मा [३०८]प्रवचनेन लभ्यः' इत्यादि बहुप्रसिद्धं तथापि

यस्मात्क्षरमतीतोऽहमक्षरादपि चात्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरषोत्तमः ॥''
- श्रीमद्भगवद्गीतायाम् - १५/१५-१८ ।

(ख) ''अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च
योगयोगविदां नेतां प्रधानपुरुषेश्वरः
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥''
- श्रीविष्णुसहस्रनामस्तोत्रे - १५-१६ ।

३०५. ''वासांसि जीर्णानि यथा विहाय
नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णा-
न्यन्यानि संयाति नवानि देहि ॥''
- श्रीमद्भगवद्गीतायाम्- २/२२ ।

३०६. ''यन्मूर्त्यवयवाः सूक्ष्मास्तस्येमान्याश्रयन्ति षट् ।
तस्माच्छरीरमित्याहुस्तस्य मूर्त्तिं मनीषिणः ॥'' - मनुस्मृतौ - १/१७ ।

३०७. ''नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
न चैनं क्लदयन्त्यापो न शोषयति मारुतः ॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
सनत्य सर्वगतस्थाणुरचलोऽयं सनातनः ॥''
- श्रीमद्भगवद्गीतायाम्- २/२३-२४ ।

३०८. ''नायमात्माप्रवचनेन लभ्यो न मेद्यया न बहुना श्रुते ।
यमेवैष वृणुते तेन लभ्यस्तस्यैव आत्मा विवृणुते तनुं स्वाम् ॥''
- माण्डुक्योपनिषदि तृतीयमुण्डके द्वितीयखण्डे-३ ।

जीवात्मनां परमात्मनि निमिलनं इति [१०९]कवि प्रौढोक्तिः । अतएव जीवात्मनां सर्वेषां समष्टिरूपेण पुरुषोत्तमः वासुदेवः स भगवान् इति [११०]प्रसिद्धम् । पुनः संसारेऽस्मिन् जीवानां सृष्टिस्थितिलयानां कारणं यत्र तत्र भगवत्त्वं स्थलविशेषेऽपि [१११]आरोपितम् । अतः सर्वभूतात्मके तस्मिन्नेव जगन्नाथे [११२]मित्रामित्रभिन्नाभिन्नभावो वा कुतो भवेत् यस्य च सविधे आचण्डालब्राह्मणाः आप्रजामहाराजाः वा सर्वे समानाः[११३] भवन्ति । अतः तस्य नैवेद्ये महाप्रसादस्य भावना यस्य सेवनेन भक्ष्याभक्ष्यस्पर्शास्पर्शविचारो[११४] नास्ति इति । स एव सर्वप्रसिद्धः

---

१०९. ''मिशियाए यथा प्रभाती तारा रवि किरणे ।
मिशियाए यथा जीवात्मा विश्व आत्मा चरणे ॥''
- चन्द्रभागा- राधानाथ राय ग्रन्थावली- पृ०- ५५ ।

११०. ''ऐश्वर्यस्य समग्रस्य धर्मस्य यशसः श्रियः ।
ज्ञानवैराग्ययोश्चैव षण्णां भगवतीरणा ॥
वसन्ति तत्र भूतानि भूतात्मान्यखिलात्मनि ।
स च भूतेषु शेषेषु वकारार्थस्ततोऽव्ययः ॥
एषमेव महान्च्छब्दो मैत्रेय भगवानिति ।
परब्रह्मभूतस्य वासुदेवस्य नान्यगः ॥''
- विष्णुपुराणे-६/५/७४-७५ ।

१११. ''उत्पत्तिं प्रलयश्चैव भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ॥'' -तत्रैव- ५/६/७८ ।

११२. ''सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्र कथा कुतः ॥''
- तत्रैव - १/१९/३७ ।

११३. ''राजा चतुर्विधा वर्णा अन्ये च पृथग्जना ।
दीना महान्तश्च तदा समानस्तत्र भान्ति वै ॥
दरिद्रकृपणो वापि गृहस्थ प्रभूरेव वा ।
स्वदेश्या परदेश्या वा सर्वे तत्र समा मताः ॥
-स्कन्दपुराणे उत्कलखण्डे- ३३/४९ ।

११४. (क) नेवेद्यं जगदीशस्य अन्नपानादिकं च तत् ।
भक्ष्याभक्ष्यविचारस्तु नास्ति तद्ग्रहणे द्विजः ॥''
- तत्रैव - ३८/८ ।

श्रीजगन्नाथः सर्वेषाम् उपास्यदेवत्वेन सकलेऽस्मिन् भारतवर्षे [३१५]तीर्थसप्तके पुरीमध्यास्ते यस्य क्षेत्रस्य नामान्तरं श्रीपुरुषोत्तमक्षेत्रमिति प्रसिद्धम् । तस्यैव श्रीक्षेत्रस्य नामान्तरमपि नीलाचलमिति प्रसिद्धम् । तत्रैव नीलाचले भारतवर्षस्य धर्महृदयपद्मम् आरोप्य [३१६]उत्कलमणिपण्डितगोपबन्धुदासैः श्रीजगन्नाथदेवस्य उपस्थितौ

(ख) जगन्नाथस्य नैवेद्यं महापातकनाशनम् ।
भक्षणात्फलमाप्नोति कपिला कोटि दानकम् ॥

- ब्रह्मवैवर्त्तपुराणे ।

(ग) जगन्नाथस्य नैवेद्यं भक्त्या च पितृदेवताः ।
सन्तर्प्य यः स्वयं भूङ्क्ते सोऽश्वमेध सुफलं लभेत् ॥

- भविष्यपुराणे ।

(घ) जगन्नाथस्य नैवेद्यं नास्ति संस्पृष्टदूषणम् ।
सकृद्भक्षणमात्रेण पापेभ्यो मुच्यते पुमान् ॥

- विष्णुपुराणे ।

(ङ) कुक्कुरस्य मुखात् भ्रष्टं ममान्नं यदि जायते ।
ब्रह्माद्यैरपि तद्भक्ष्यं भाग्यतो यदि लभ्यते ॥ - ब्रह्मपुराणे ।

स्कन्दपुराणे उत्कलखण्डे- ३८/१७ अपि एवं पाठः लभ्यते ।

(च) शुष्कं पर्य्युषितं वाऽपि नीतं वा दूरदेशतः ।
दुर्जनेनापि संस्पृष्टं सर्वस्यैवाघनाशनम् ॥

- वायुपुराणे, - तत्रैव - ३८/१६ ।

३१५. अयोध्या मथुरामाया काशी काञ्चि अवन्तीका ।
पुरीद्वारावती चैव सप्तैता मोक्षदायकाः ॥

-ब्रह्माण्डपुराणे- ४/४० ।

३१६. एहि से उत्कल पुण्यदेवस्थली ।
होइछन्ति ठुल यहिँ तीर्थावली ॥
ता मध्ये विराजे पुण्य नीलाचल ।
भारतर धर्म हृद शतदल ॥
एवे नीलाचले विजे जगन्नाथ ।
X X X X
विशेषे उत्कले नाहिँ प्रयोजन ।
उत्कलर नेता निजे नारायण ॥

-बन्दीर आत्मकथा - पृ०पृ०- ८-९ ।

उत्कलेषु अपरस्य परिपालकस्य नेतुः वा आवश्यकता नास्तीति प्रतिपादितम् । उत्कलगजपतिश्रीपुरुषोत्तमदेवस्य काञ्चीनगरी-विजयावसरे महाप्रभुश्रीजगन्नाथस्य [३१७]नेतृत्व न तावत् किम्बदन्ती वस्तुगत्या उत्कलानामितिहासः[३१८] इत्येतत् प्रकृष्टं प्रमाणम् । अतएव अवतारिणः भगवतः श्रीकृष्णस्य इव श्रीजगन्नाथस्य अनन्यसाधारण-महत्त्वं ज्योतिर्विद्भिः महामहोपाध्यायैः [३१९]सामन्त-चन्द्रशेखरैः प्रतिपादितम् ।

स एव पुरुषोत्तमः श्रीजगन्नाथः जातिधर्मनिर्विशेषेण सर्वेषां कृते धर्मार्थकाममोक्षाणाम् अनन्यसाधारणदातृत्वेन [३२०]प्रसिद्धः । पुनः तस्मिन्नेव सर्वगुणाभासः अस्तीति [३२१]उपनिषद्वाक्यं प्रमाणम् । अतएव

---

३१७. दश अङ्करे राजा शुणिले काञ्चिनगरे पद्मिनी...... तर्हिंकि राजा मध्यस्थ पठिआइ.......... न कला । राजा शुणि कोपकरि तुम्भे आम्भ पाईं थरे छामुरे जणाइब । सेहि दिन रात्रिरे महास्वार बहुत काकुस्थ होइ महाप्रभुङ्क श्रीछामुरे जणाइले । .... आम्भे कलावारुं धलावारुं चढ़ि आगे विजे कलु ।....... - मादलापाञ्जि - पृ०- ५० ।

३१८. (क) ओडिशार इतिहास- महताव ।
(ख) ओडिशार इतिहास-डॉ० नवीनकुमार साहु ।
(ग) ओडिशार इतिहास- डॉ० वंशीधर महान्ति ।

३१९. या लीला गोकुलान्तेर्मधुपुररचिता याः कृता द्वारवत्याम्
क्षित्यां नित्यावतारैः प्रतियुगमुचिताः सूचिताः प्राङ् मुनीन्द्रैः ।
तास्ता विस्तारयन् यो वसति शितिशिरौ वेद वेद्योऽवतारी
नित्यधाम्नि स्वनाम्नि स्फुरतुमुररिपुः सोऽयमन्तः सदा नः ॥
- सिद्धान्तदर्पणे - २३/४२ ।

३२०. से कम्बुकटक राजा नाम जगन्नाथ ।
चारिवर्णे चउवर्ग देवाकु समर्थ ॥
- कोटिब्रह्माण्डसुन्दरी ।

३२१. (क) अपाणिपादो जवनो ग्रहिता पश्यत्यचक्षु स श्रुणोत्यकर्णः ।
स वेति वेद्यं न च तस्यास्ति वेत्ता तमाहुरग्र्यं पुरुषं महान्तम् ॥
- श्वेताश्वतरोपनिषदि- ३/१९ ।
(ख) कैवल्योपनिषदि द्वितीयखण्डे- २ ।

जगति यत् किञ्चित् दृश्यमानं भवति तत् सर्वं परमेश्वरस्य रूपमिति [३२२]युक्तियुक्तम् । तदेव परंब्रह्म इति [३२३]मुण्डकोपनिषदि प्रमाणमुपन्यस्तम् । तस्यैव पूर्णब्रह्मणः विषये यथा यावत् पर्यन्तं वा भवतु नाम किन्तु अखण्डत्वेन अनिशं [३२४]तदस्तीति नास्ति काचित् विचिकित्सा इति स्वतः प्रमाणं परतः प्रमाणं श्रीजगन्नाथदेवो विजयते ।

श्रीपुरुषोत्तमतत्त्वम्-

श्रीपुरुषोत्तमजगन्नाथमाधारीकृत्य एतद्यावत् प्रतिपादितेषु स्थलविशेषेषु पुरुषोत्तमतत्त्वस्य आलोचनं नितरां परिलक्ष्यते । स्मार्त्तभट्टाचार्येत्युपाध्यलंकुर्वाणैः वङ्गीय स्मृतिनिबन्धकारैः रघुनन्दनैः स्वकृताष्टाविंशतितत्त्वेषु श्रीपुरुषोत्तमतत्त्वमिति अन्यतमं तत्त्वं सन्निवेशितम् ।

दारुब्रह्मरूपेण साम्प्रतं विद्यमानानां जगन्नाथबलभद्रसुभद्रादि-देवतानां तत्त्वानुसन्धानेन इदमेव प्रतिभाति यत् दारुशब्दस्य दारुमूर्त्तेर्वा प्रकल्पनं वेदकाले जातमिति परिलक्ष्यते । तत्र प्रथमतः [३२५]ऋग्वेदे

---

३२२. (क) ईशावास्यमिदं सर्वं यत्किञ्चित् च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जिथा मा गृधः कस्यस्विद्धनम् ॥
-ईशावास्योपनिषदि - १/१ ।
(ख) आत्मावास्यमिदं विश्वं यत् किञ्चिज्जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम् ॥
- श्रीमद्भागवतपुराणे- ८/१/१० ।

३२३. ब्रह्मवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणश्चोत्तरेण ।
अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥
- मुण्डकोपनिषदि - २/११ ।

३२४. पूर्णमिदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥
- ईशावास्योपनिषदि ।

३२५. अदो यद्दारुप्लवते सिन्धोः पारे अपरुषम् ।
तदारभस्व दुर्हणो तेन गच्छ परस्तरम् ॥
- ऋग्वेदे- १०/१२/१५५/३, पृ०- ८४१ ।

दारुशब्दस्य प्रयोगः उपलभ्यते । [326]काणेमहोदयानां मतानुसारं ऋग्वेदस्य दारुशब्दयुक्तमन्त्रस्य यः अर्थः [327]सायणाचार्येण कृतः सः न समीचीनः, यतः सायणाचार्यस्य समये दारुब्रह्मशब्दस्य प्रचलनम् उत्कलेषु आसीत् । ततः प्रागपि दारुब्रह्म पुरुषोत्तमः वैदिकज्ञानिभिः अपि गृहीतः आसीत् । पुरुषोत्तमतत्त्वे [328]रघुनन्दनभट्टाचार्याः तस्यैव

---

३२६. Raghunandan in his Purushottam Tattva quotes a verse (which as printed is corrupt) from the Rgveds that from the context appears to be addressed to some evil spirit with a wicked looking chin)or that are difficult to be killed) I have recourse to that far off wood in the sea, that has no connection with human beings and go to distant lands with it. Then he states that the Atharveda has a similar verse. Probably following Sayana's interpretation, Raghunandan connects this Rgveda verse with Purusottama, the image of which is made of wood.

-The History of Dharmasastra, P.V.Kane, Vol-III, pp. 693-694

३२७. अदः विप्रकृष्टदेशे वर्त्तमानं अपरुषं निर्मात्रा पुरुषेण रहितं यद्दरुं दारुमयं पुरुषोत्तमाख्यं देवताशरीरं सिन्धोः पारे समुद्रतीरे प्लवते जलस्योपरि वर्त्तते तत् दारु हे दुर्हणो ! दुःखेन हननीयं केनापि हुताशक्य हे स्तोतः आरभस्व, आलम्बस्व उपास्य इत्यर्थः तेन दारुमयेन देवनोपास्यमानेन परस्तरं अतिशयेन तरणीयमुत्कृष्टं वैष्णवलोकं गच्छ ।

अपराह हे दुर्हणो दुःखेन हननीये दुष्टहनुयुक्ते वा हे अलक्ष्मि सिन्धोः पारे समुद्रतीरप्रान्तेऽपरुषं पुरुषेर्जनैवियुक्तमदोऽस्मतो दूरदेशे वर्त्तमान यद्दारु नौः प्लवते तद्दारु आरभस्व परिगृहाण । गृहीत्वा च तेन दारुणा परस्तरमतिशयेन तरणीयं ब्रह्मणस्पतिना प्रेरिता सती द्विपान्तरं गच्छ ।

- ऋग्वेदे- १०/१२/१५५/३, सायणभाष्ये- पृ०- ८४१ ।

३२८. "आदौ यद्दारु प्लवते सिन्धोः पारे अपुरुषम् ।
तदा लभस्व दुर्दुनो तेन याहि परं स्थलम् ॥"

अस्य व्याख्या सांख्यायनभाष्ये आदौ विप्रकृष्टे देशे वर्त्तमानं यद्दारुं दारुमयं पुरुषोत्तमाख्यदेवताशरीरं प्लवते जगस्योपरि वर्त्तते अपुरुषं निमातृरहितत्वेन अपुरुषं तत् आलभस्व दुर्दुनो हे होतः तेन दारुमयेन देवेन उपास्यमानेन परं स्थलं वैष्णवं लोकं गच्छेत्यर्थः । अथर्ववेदेऽपि-
"आदौ यद्दारुप्लवते सिन्धोर्मध्ये अपुरुषम् ।
तदा लभस्व दुर्दुनो तेन याहि परं स्थलम् ॥"

- श्रीपुरुषोत्तमतत्त्वे- पृ०पृ०- १-२ ।

मन्त्रस्य उद्धरणं कृतवन्तः । वस्तुतः पुरुषोत्तमः कः एतद्विषये प्रथमतः पर्यालोचनीयम् । दारोः अपुरुषत्वं सूचयन् यद्यपि 'अदो यद्दारु प्लवते' इति मन्त्रः प्रसिद्धः तथापि सः एव पुरुषः उत्तमश्च । स एव पुरुषः तावत् [329]सांख्यशास्त्रोक्तपुरुषेण सह समानः । किन्तु निराकारत्वेनाऽपि साकारः इति प्रसिद्धम् [330]उपनिषद्वचनानुसारम् । वैदिककार्याणां समये या खलु वृक्षोपासना दारूपासना वा प्रचलिता आसीत् सैव उपनिषद्युगे पुरुषः जगतोऽस्य कर्त्तेति भावनावशात् पुरुषोपासनायां रूपान्तरिता जाता । अतएव उपनिषत्सु वर्णितपुरुषः अधुना पुरुषोत्तमः इति [331]विदुषां मतम् ।

वाल्मीकीयरामायणे[332] इक्ष्वाकुकुलदेवत्वेन पुरुषोत्तम-श्रीजगन्नाथदेवस्य उल्लेखोऽस्ति । न केवलं तत् अपि च तत्र श्रीजगन्नाथदेवस्य उपासनानिमित्तं [333]श्रीरामचन्द्रेण विभीषणः उपदिष्टः इति परिलक्ष्यते । तदानुकूल्येन इदानीं यावत् श्रीमन्दिरे विभीषणवन्दापना इति एको विधिः प्रचलति । अपि च तस्य कृते

---

३२९. "न प्रकृतिर्न विकृतिः पुरुषः ।" -सांख्यकारिकायाम्- ३ ।

३३०. (क) कैवल्योपनिषदि द्वितीयखण्डे मन्त्रः-२ ।
(ख) श्वेताश्वतरोपनिषदि - ३/१९ ।

३३१. This description of Purusa serves as the basis of the peculiar form of Purusottama and his associates.
-The Cult of Jagannatha, p.73

३३२. "आराधय जगन्नाथं इीवाकुकुलदैवतम् ।
आराधनीयमनिशं देवैरपि सवासवैः ॥"
- रामायणे उत्तरकाण्डे- १०८/२८ ।

३३३. "स्वादुदस्योत्तरे तीरे भोजनानि त्रयोदशा ।
जातरूपशीलो नाम सुमहान् कनकप्रभाः ॥
सहशीर्षं देवमनन्तं नीलवाससम् ।
त्रिशिरः काञ्चनः केतुस्थल तस्य महात्मनः ॥
स्थापितः पर्वतस्याग्रे विराजिते सा वैदिका ।
पूर्वस्यां दिशिनिर्माणं कृतं तत् त्रिदशेश्वरौ ॥
- रामायणे किष्किन्ध्याकाण्डे- ४०/४१, ६०, ६१ ।

बलिव्यवस्था वर्त्तते । श्रीमन्दिरस्य निर्मातुः इन्द्रद्युम्नस्य विषयेऽपि च श्रीमन्दिरस्य रत्नवेदीसम्बन्धे [334]महाभारते अलोचना समुपलभ्यते । सहस्रयज्ञकरणानन्तरं श्रीजगन्नाथदेवस्य दारुविग्रहस्य प्रतिष्ठापनात् अत्रैव [335]अन्तर्वेदित्वमिति श्रीमन्दिरस्य संज्ञा संगच्छते । [336]श्रीमद्भगवद्गीतायां अपि साक्षाद्रूपेण पुरुष एव विलक्षणगुणसम्पन्नः तथा च पुरुषोत्तमस्य इति प्रथितो भवति । अतएव महाभारते अनुशासनपर्वणि [337]श्रीविष्णुसहस्रनामवर्णनाप्रसङ्गे यः खलु पुरुषोत्तमः स एव जगन्नाथ इति भीष्मः युधिष्ठिरम् उपदिशति ।

यद्वा भवतु पुरुषोत्तम जगन्नाथः एकचिन्ताधाधारेण एकस्या एव चेतनायाः प्रतीकत्वेन श्रीक्षेत्रे पूजितः अस्ति इति निश्चप्रचम् ।

---

३३४. (क) सैषा प्रकाशते राजन् वेदी संस्थानलक्षणा ।
आरुध्यात्र महाराज वीर्यवान् वै भविष्यति ॥
सैषा सागरमासाद्य राजन् वेदी समाश्रिता ।
एतामारुह्य भद्रं ते त्वमेकस्तरसागरम् ॥
-महाभारते वनपर्वणि- ११४/२२-२३ ।

(ख) इयं देवीः परो अन्तः अयं यज्ञो भूवनस्य नाभिः पृथिव्याः प्रधानवत्याः भूम्याः परो अन्तपरमन्त परज्यवसं इयं वेदीः न हि वेद्यातिरिक्त भूमिरस्ति ।
- तैत्तरीयसंहितायाम्- भा०-२- ६/४/३ ।

३३५. श्रीमन्दिरे जगन्नाथबलभद्रसुभद्रा सुदर्शन अधिष्ठितानां रत्नसिंहासनस्य नाम अन्तर्वेदी ।

३३६. "तस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितपुरुषोत्तमः ॥"
- श्रीमद्भगवद्गीतायाम् - १५/१८ ।

३३७. जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
तस्य लोकप्रधानस्य जगन्नाथस्य भूपतेः ।
अव्ययपुरुषसाक्षी क्षेत्रज्ञोऽक्षर एव च ॥
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः ॥
-विष्णुसहस्रनामस्तोत्रे- ४/१२/१५-१६ ।

विश्वेऽस्मिन् 'सह नौ भुनक्तु' इत्यादिदिशा [338]शान्तिमुक्तिसाम्यादीनां परिपूरकत्वेन स एव अवभासते नितराम् । स एव भूया स च सार्वभौमः । सैव वेदान्तनिर्घोषित 'नेति नेति' सैव 'अपाणिपादो जवन ग्रहिता' असीमः अव्याप्तत्वात् सर्वत्र परिव्याप्तः परमसत्तायाः तथा च चरमसत्तायाः अनन्तविन्दुत्वेन वर्त्तते । कदाचित् निर्गुणत्वेन कदाचित् च सगुणत्वेन विराजते बहुरूपत्वात् । शैवमते शिवत्वेन, वैष्णवमते विष्णुत्वेन, गाणपत्यमते गणपतित्वेन, वेदान्तिमते ब्रह्मत्वेन, बौद्धानां मते बुद्धत्वेन स एव [339]प्रसिद्धः । अतः अभियुक्तैः[340] भक्तानां कल्पवृक्ष इति सिद्धान्तितम् ।

पुरुषशब्दः वेदवेदान्तेषु अपि प्रतिपादित अस्ति । ईश्वरवाचकः

---

३३८. ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहे । तेजस्विनावधितमस्तु । मा विद्विषावहै ।

- कठोपनिषदि - शान्तिपाठः ।

३३९. (क) यं शैवाः समुपासते शिव इति ब्रह्मेति वेदान्तिनो
बौद्धा बुद्ध इति प्रमाणपटवः कर्त्तेति नैयायिकाः ।
सोऽर्हन्नित्य जैनशासनरताः कर्मेति मीमांसकाः
सोऽयं नो विदधातु वाञ्छितफलं त्रैलोक्यनाथो हरिः ॥

(ख) ध्येयं वदन्ति शिवमेव हि केचिदन्ये
शक्तिं गणेशमपरे तु दिवाकरं वै ।
रूपैस्तु तैरपि विभासि यतस्त्वमेव
तस्मात्त्वमेव शरणं मम दीनबन्धो ॥

-दीनबन्ध्वष्टके स्तोत्ररत्नाकरे ।

३४०. यो दारुब्रह्ममूर्त्तिः प्रणवतनुवरः सर्ववेदान्तसारो ।
भक्तानां कल्पवृक्षो भवजलतरणी सर्वतत्त्वानुतत्त्वम् ॥
सिद्धानां योगमूर्त्तिः हरिहरनुमितः श्रीपतिर्वैष्णवानाम् ।
शैवानां भैरवोऽयं सततसुविदितः शाक्ततत्त्वे च शक्तिः ॥
बौद्धानां बुद्धमूर्त्तिः ऋषभमुनिवरो जैनसिद्धान्तासारे
सोऽयं नीलाद्रिनाथः भवभयहरणः माधव पातु नित्यम् ॥

- उत्कलप्रसङ्गे रथयात्राविशेषाङ्के- १९८१, पृ०- ४८ ।

वैदिकः शब्दः पुरुषः [341]पुरुषसूक्ते [342]श्रीमद्भागवते [343]स्कन्दपुराणे [344]नारायणोपनिषदि स्वराट् इति पदस्य ज्ञापकः । पुनः [345]नारायणोपनिषदि विराटपुरुषस्य कृष्णपिङ्गलत्वेन द्वैतभावः प्रकाश्यते। पुनरपि पुरुषत्वेन स्वीकृत प्राणिमात्रस्य सत्तामात्र-मनुत्तमावस्थायां शतपथब्राह्मणानुसारं पुरुषोत्तम इति संज्ञां भते । अतएव गाम्भीर्यगुणरूपेण षोडशकलानामेकीकरणं तस्मिन्नेव पुरुषोत्तमे सङ्गतमिति । तस्यैव पुरुषोत्तमस्य नित्यपूर्णत्वात् उपनिषदेव 'ॐ पूर्णमदः पूर्णमिदम्'[346] इति प्रस्तौति। अतएव निखिलविश्वनिर्माण-निमित्तं पुरुषस्य पूर्णताप्राप्तिः तता च आत्मोत्सर्गः पुरुषोत्तमस्य लक्षणम्। [347]ब्रह्मपुराणे पुरुषोत्तमविषये सुस्पष्टं वर्णनमस्ति ।

---

३४१. सहस्रशीर्षापुरुषः सहस्राक्षसहस्रपात् ।
स भूमिं सर्वतस्पृष्ट्वा त्यतिष्ठदशाङ्गुलम् ॥
पुरष एवेदं यच्चभुतं यच्च भाव्यम् ।
ततो विराडजायत विराजो अधिपुरुष ॥
- शुक्लयजुर्वेदीयपुरुषसूक्ते- १-२, ५ ।

३४२. (क) जन्माथस्य यतोन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् ।
- श्रीमद्भागवतपुराणे- १/१/१ ।
(ख) वैराज पुरुषो यो ह सौ भगवान् धारणाश्रयः ।
- श्रीमद्भागवतपुराणे- २/१/१५ ।

३४३. स्वराट् सम्राड् जगन्नाथ विराडसि जगत्पते ।
- स्कन्दपुराणे उत्कलखण्डे - २४/१६ ।

३४४. स ब्रह्मा स शक्तिः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ।
- नारायणोपनिषदि- १३/२ ।

३४५. ऋतं सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।
ऊर्द्धरेतं विरुपाक्षं विश्वरूपाय वै नमो नमः ॥ -तत्रैव - १३/२३ ।

३४६. ईशावास्योपनिषदि शान्तिमन्त्रे ।

३४७. (क) उत्तमः पुरुषो यस्मास्तस्मात्स पुरुषोत्तमः ।
-ब्रह्मपुराणे - ४५/५२ ।
(ख) पुरुषस्त्वं जगद्व्यापी पुरुषादपि चोत्तमः । - तत्रैव - ५५/२५ ।
(ग) प्रकृतेः स परो यस्मात् पुरुषादपि चोत्तमः ।
तस्माद्वेदे पुराणे च लोकेऽस्मिन् पुरुषोत्तमः ॥ -तत्रैव - १७७/२२।

[348]पद्मपुराणे पुरुषत्तमरामचन्द्रयोर्मध्ये तथा च महालक्ष्मीसीतयोर्मध्ये अभिन्नता वर्णिता इति अत्यन्तं गहनमेव पुरुषोत्तमतत्त्वम् ।

मूर्त्तिकल्पनम्-

श्रीक्षेत्रे अधुनातनश्रीजगन्नाथमन्दिरस्य रत्नसिंहासने जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनेति चतसृणां दारुमूर्त्तीनामवस्थितिः तत्र भवद्भिः समागतैः सर्वैः भक्तजनैश्च परिलक्ष्यते । परमेश्वरत्वेन कल्पितशक्तेः ऐक्यकल्पनस्थले चतुर्द्धामूर्त्तिकल्पनं कथं कुतो वा जातमिति तत्र विदुषां मनसि संशयो भवेत् । पुनस्तत्र मूर्त्तिषु चतसृषु नैकः एव वर्ण वर्त्तते । प्रत्यूत जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनानां यथाक्रमं कृष्णश्वेतपीतलोहितवर्णाः[349] दृश्यन्ते । भौतिकविज्ञानिनां प्रतिपादनानुसारं संसारेऽस्मिन् सकलशक्तेः आधारत्वेन यः सूर्यः विद्यमानः तस्य किरणेषु एव वर्णसप्तकस्य मिश्रणमस्ति । तत्र वर्णसप्तकस्य एकत्र सम्मिश्रणात् श्वेतवर्णः परिलक्ष्यते । सर्वतोभावेन वर्णराहित्यं तथाकथिते कृष्णवर्णे एव अस्ति । अतः श्वेतकृष्णवर्णद्वयं यथार्थरूपेण वर्णसंज्ञां न प्राप्नोति । किन्तु एतद्रूपद्वयं पूर्वतोऽस्ति एव प्रागैतिहासिकविज्ञानानुसारं[350] संसारस्यास्य सृष्टेः पूर्वं सर्वत्र अन्धकारः व्याप्तः आसीत्, यस्य स्वरूपमेव कृष्ण एव । ततः परमंशुमान् सूर्यः प्रकाशितो जातः यस्य च अंशुशरीरे पूर्वमिव वर्णसप्तकं प्रकाशितं जातम् । तस्यैव वर्णसप्तकस्य मिश्रणस्य स्वरूपं श्वेतमेव । अतोऽत्र श्वेतकृष्णस्वरूपद्वये क्रमानुसारं बलभद्रजगन्नाथयोः अन्तर्भावः तथा

३४८. योऽसौ नीलाद्रिवासी तु स रामः पुरुषोत्तमः ।
सीता साक्षान्महालक्ष्मीः सर्वकारणकारणम् ॥
- पद्मपुराणे पातालखण्डे - २२/५७ ।

३४९. "नीलाभ्रश्यामलं विष्णुं शङ्खेन्दुधवलं बलम् ।
रक्तं सुदर्शनं चक्रं सुभद्रां कुङ्कुमारुणाम् ॥"
- स्कन्दपुराणे उत्कलखण्डे- १९/२१ ।

३५०. (क) ऋतं च सत्यं चाभीद्धात् तपसोऽध्यजायत ।
ततो रात्र्यजायत ततो समुद्र अर्णवः ॥
- ऋग्वेदसंहितायाम् - १०/१९०/१ ।

(ख) आसीदिदं तमोभूतम् । - मनुस्मृतौ- १/५ ।

च श्वेतकृष्णयोः वैषम्यमिश्रणात् लोहितपीतयोः अनुरूपतया सुदर्शनसुभद्रयोः परिप्रकाशः वर्त्तते । न केवलमेतदपि च अन्धकारात् सर्वेषां सृष्टिः यथा तथा कृष्णजगन्नाथात् सर्वेषां बलभद्र-सुभद्रा-सुदर्शनानां परिप्रकाशः जातः इति बहुत्र पूर्वप्रतिपादितं तथ्यं युक्तियुक्तं मन्यते । एवम्भूतप्रतिपादनेन सह स्थलविशेषे कालचक्रस्य भावनायाः उद्धारः एवं क्रियते यथा-

"कृष्णाकृष्णो जगन्नाथः घस्रः शुभ्रो बलान्तकः ।
सायं सुभद्रा हरिद्रा कालचक्रः सुदर्शनः ॥"

अतः रात्रितः यथा सर्वेषां सृष्टिः, रात्रौ च यथा सर्वेषां विलीनता तथैव महाकालादेव सर्वेषामुद्भवः, तथा च तस्मिन्नेव सर्वेषां निमिलनमिति [३५१]योगवाशिष्ठरामायणे शुक्रोपाख्याने दृष्टिगोचरीभूतं भवति । करुणावरुणालयः श्रीजगन्नाथदेवः स एव महाकालः नान्य इति मन्यते ।

परमेश्वरस्य चतुर्द्धारूपकल्पनाप्रसङ्गे विदुषां सम्मुखे प्रथमतः आयाति [३५२]स्कन्दपुराणम् । तत्र पृथिव्यां रूपप्रकाशनावस्थायां निराकारेण स्वयं रूपचतुष्कं गृहीतमिति वर्णितमस्ति ।

३५१. योगवाशिष्ठरामायणे शुक्रोपाख्याने ।

३५२. (क) चतुर्विधजगद्धाम विश्वमूर्त्ते नमोऽस्तुते ।
- स्कन्दपुराणे उत्कलखण्डे- ५/३८ ।

(ख) तदेवायं जगन्नाथश्चतुर्द्धा संव्यवस्थितः ।
क्षितौ यदावतरति चतुरूपः प्रकाश्यते ॥ - तत्रैव - ५/७३ ।

(ग) दिव्यदारुवपुर्भूयश्चतुर्द्धावतरिष्यति । - तत्रैव -१४/४४ ।

(घ) अतिष्ठन् माधवो यत्र चतुमूर्त्तिधरो विभुः । - तत्रैव - १५/२४ ।

(ङ) चतस्रो मूर्त्तयस्तस्य त्वयानुग्रहबुद्धयः । - तत्रैव - १४/३७
परन्तु सम्प्रति उपलब्धपुराणे 'चतस्रो' स्थाने 'तिस्रोऽपि' पाठः वर्त्तते ।
- वङ्गवासीसंस्करणे- पृ० ११० ।

(च) एवं तु मूर्त्तयेस्तेन चतस्रो वै प्रकाशिता ।
- स्कन्दपुराणे उत्कलखण्डे- १९/१८ ।

(छ) रामं कृष्णं सुभद्रां च वासुदेवं सुदर्शनम् ।
- तत्रैव - १९/३७ ।

[३५३]मुकुन्दविलास-महाकाव्यस्य मङ्गलाचरणे कविना रघुनाथतीर्थेणाऽपि विधिविष्णुशङ्करप्रभृतिरूपेण महाप्रभोः श्रीजगन्नाथस्य मूर्त्तिचतुष्टय-कल्पना कृता । न केवलमेतदपि च [३५४]शून्यसंहितायां ऐश्वर्यमाधुर्यसहकारेण तन्मूर्त्तिचतुष्टयकल्पनं कृतमस्ति । [३५५]कोटिब्रह्माण्डसुन्दरीकाव्ये उत्कलकविसम्राट् उपेन्द्रभञ्जः चतुर्द्धामूर्त्तिकल्पने 'चारिवर्णे (चतुर्वर्ण)' इति यत् प्रतिपादयति [३५६]वासुदेवसाहुमहोदयेन तच्छब्दद्वयस्य यादृश अर्थः प्रकाश्यते सः युक्तियुक्तः न मन्यते । साङ्केतिकचतुर्वर्णविशिष्टानां चतुर्णां देवानां शक्तेरेकत्र समावेशेन वर्गचतुष्टयस्य सिद्धिः भवतीति अर्थः सुरुचिरः अन्यथा श्रीजगन्नाथदेवं विना अन्येषां मूर्त्तिकल्पनायां दोषः स्यात् ।

---

३५३. ये द्वैधा प्रकृतिः पुमान्निति मतः स्त्रीपुंसदेहाश्रितो
यस्त्रेधा विधिविष्णुशङ्करवपुर्द्धारो दरीदृश्यते ।
श्रीमन्नीलगिरौ च दारुतनुधृक् योऽसौ चतुर्द्धा स्थितो
राधाकृष्णतनुधरो विजयते वृन्दावने स प्रभुः ॥

- मुकुन्दविलासमहाकाव्ये- १/१ ।

३५४. जगन्नाथ बलभद्र सुभद्रा सुदर्शन ।
महामन्त्र मन्त्रराजरूप दारुब्रह्म ॥
ऐश्वर्य माधुर्य घेनि सिंहासनपरे ।
विजय करिणछन्ति चतुर्द्धा रूपरे ॥

-शून्यसंहिता- अच्युतानन्ददासकृता ।

३५५. से कम्बुकटक राजा नाम जगन्नाथ ।
चारिवर्णे चउवर्ग देवाकु समर्थ ॥ - कोटिब्रह्माण्डसुन्दरी ।

३५६. जगन्नाथ, बलभद्र ओ सुभद्रा एमाने पृथिवीर तिनिवर्णर मनुष्य भितरे साम्य ओ मैत्री प्रतिष्ठा पाइँ तिनोटि रूप ।..... चतुर्द्धामूर्त्ति भितरे मध्य एहि मिलनर चिन्ताधारा रहिछि । पृथिवीरे वास्तवतः कृष्ण, श्वेत, पीत, लोहित एहि चारिवर्णर जाति वास करन्ति । कवि उपेन्द्रभञ्जङ्कर जगन्नाथप्रशस्ति मध्यरे थिवा ' से कम्बुकटक राजा' पदरे एहि चारि वर्णकु लक्ष्य करायाइथिवा अनुमान करायाइपारे । समग्र विश्ववासीङ्कु स्थूलतः चारिश्रेणिरे विभक्त करायाइपारे एवं एहि चारि जातिर मानवसंस्कृतिर समन्वित रूप जगन्नाथङ्क संस्कृतिरे लक्षणीय ।

- जगन्नाथसंस्कृतिर उद्भव ओ विकाश - पृ०- ७१ ।

वर्णविद्वेषस्य कुपरिणामेन पृथिव्याः ध्वंसः यथा न भवतु तदुद्देश्येन वर्णचतुष्टयविशिष्टस्य देवमूर्त्तिचतुष्टयस्य एकत्र समावेशकल्पना जातेति श्रीजगन्नाथसंस्कृतेः आदर्शप्रतिपादनार्थमिच्छद्भिः[३५७]प्राबन्धिकैः यद्वा उपन्यस्तं तत्तु कथंचित् प्रकारेण ग्रहणीयमिति ।

वैष्णवानां मतानुसारेण अनिरुद्धवासुदेवसङ्कर्षणप्रद्युम्नेति मूर्त्तिचतुष्टयस्य कल्पना तत्रैव श्रीजगन्नाथे भवति । तान्त्रिकानां मते शक्तिचतुष्टयस्य समाहारः जगन्नाथादिमूर्त्तिचतुष्टये परिलक्षितो भवति । केचन मूर्त्तिचतुष्टयमोंकाररूपमामनन्ति । अकारः उकारः मकारः विन्दुः इत्येषां समष्टिरूपं कल्पनान्तर्गतं भवति । एषां तत्त्वम् अकारो वासुदेवः, उकारो बलभद्रः, मकारः सुभद्रा, विन्दुस्वरूपः सुदर्शनः इति । जगन्नाथः बलभद्रः सुभद्रा सुदर्शनश्च चत्वारो वेदा इति परिकल्पना [३५८]स्कन्दपुराणात् स्पष्टं ज्ञायते । तत्र श्रीजगन्नाथस्थाने नृसिंहस्य नामोल्लेखः कृतः । एतद्विषयेऽपि उत्कलीयकविः बलरामदासः स्वरचितगुप्तगीतायां[३५९] उल्लेखं कृतवान् । न केवलमेतदपि च अनेकेषामुत्कलीयकवीनां ग्रन्थेषु बलभद्र-जगन्नाथ-सुभद्रा-सुदर्शनाः यथाक्रमेण श्रवणं नयनम् अधरं नासिका चेति शुक्लपीतहरिल्लोहित-वर्णचतुष्टयत्वेन वर्णिताः । कलियुगेऽस्मिन् "हरेराम कृष्ण हरे"[३६०] इति नाम मूर्त्तिचतुष्टयरूपेण प्रख्यातिं गतमिति ।

श्रीमन्दिरे मूर्त्तिचतुष्टयस्य विद्यमानत्वेऽपि तात्त्विकैः भक्तैः जगन्नाथ-बलभद्र-सुभद्रामूर्त्तित्रयं मुख्यं मत्वा स्वस्वभावनया पूज्यते ।

---

३५७. जगन्नाथसंस्कृति - नीलमाधवपति - नीलशैलमुखपत्रे -पृ०- १३ ।

३५८. ऋग्वेदरूपी हलधृक् सामवेदो नृकेसरी ।
यजुर्मूर्त्तिस्त्वियं भद्रा चक्रमाथर्वणं स्मृतम् ॥
- स्कन्दपुराणे उत्कलखण्डे - २८/४४-४५ ।

३५९. बलभद्र ये साम होइ । ऋक् ये सुभद्रा बोलाइ ॥
यजुर्वेदे श्रीजगन्नाथ । अथर्व सुदर्शन पार्थ ॥
- गुप्तगीतायां सप्तमाध्याये ।

३६०. हरे च बलभद्रस्तु सुभद्रा राम कथ्यते ।
कृष्ण नाम जगन्नाथः हरे सुदर्शन अपि ॥
- जगन्नाथचरितामृते नवमाध्याये - पृ०- १३३ ।

तेषां भावधारया सुदर्शनस्तु अर्द्धमात्रा, निराकारब्रह्मत्वेन ज्योतिर्ब्रह्मत्वेन प्रकाशितः । ज्योतिर्ब्रह्म निराकारब्रह्म एव महाशून्ये विराजते । निराकारब्रह्म तु ब्रह्माण्डस्यात्मा । अतएव सुदर्शनः ब्रह्माण्डस्यात्मत्वेन विद्यते । आत्मनः स्वतन्त्ररूपमाकारं वा [३६१]नास्ति ।

त्रिगुणात्मके जगति चतुर्द्धामूर्त्तिकल्पनं कथं सम्भवेत् ? इत्यपि प्रश्नः जागर्त्ति । तत्त्वविदः सृष्टिस्थितिलयार्थं सत्त्वरजस्तमांसि स्वीकुर्वन्ति । केचनात्मनः सगुणत्वं निर्गुणत्वं वा निर्दिशन्ति । केचन पुनः 'अजामेकां लोहितशुक्लकृष्णां' इति [३६२]वचनमाधारीकृत्य मूर्त्तित्रयस्य कृष्णशुक्ललोहितप्रभृतिवर्णान् कल्पयन्ति । मूर्त्तित्रयस्य स्थितिविषये [३६३]ब्रह्मपुराणे [३६४]नारदपुराणे [३६५]गरुड़पुराणे, [३६६]अग्निपुराणादिषु

३६१. प्रेमभक्तिगीता पञ्चमाध्याय- पृ०- ३७ ।

३६२. श्वेताश्वतरोपनिषदि - ४/६ ।

३६३. प्रथमशुक्लवर्णाभं शारन्देन्दुसमप्रभम् ।
नीलाम्बरधरं चोग्रं बलं बलमदोद्धतम् ॥
द्वितीयं पुण्डरीकाक्षं नीलजीमुतसन्निभम् ।
पीतवाससमत्युग्रं शुभं श्रीवत्सलक्षणम् ॥
तृतीयां स्वर्णवर्णाभां पद्मपत्रायतेक्षणाम् ॥
-ब्रह्मपुराणे- ५०/४९-५३ ।

३६४. नमस्ते हलधृक् राम नमस्ते मुसलायुध ।
प्रलम्बारे नमस्तेऽस्तु त्राहि मां कृष्णपूर्वज ॥
- नारदपुराणे उत्तरभागे- ४४/३३-३४ ।
जय कृष्ण जगन्नाथ जय सर्वाघनाशन ।
जय नीलाम्बुदश्याम जय सर्वसुखप्रद ॥ - तत्रैव- ५५/४४-४५ ।
नमस्ते सर्वज्ञे देवी नमस्ते शुभसांख्येदे ।
त्राहि मां पद्मपत्राक्षि कात्यायनि नमोऽस्तु ते । -तत्रैव - ५५/६७ ।

३६५. बलभद्रं येऽर्च्चयन्ति सुभद्रां बलभद्रकम् ।
ज्ञानं प्राप्य श्रियं पुत्रान् व्रजन्ति पुरुषोत्तमम् ॥
- गरुड़पुराणे - ८६/१८ ।

३६६. सुभद्रां बलभद्रं च प्रपूज्य पुरुषोत्तमम् ।
सर्वकामसमायुक्तः कुलमुद्धृत्य नाकभाक् ॥
- अग्निपुराणे - ११६/१९ ।

च उल्लेखः वर्त्तते । उत्कलीयकवि सारलादासः[३६७] मूर्त्तित्रयं हरिहरब्रह्मत्वेन वर्णयति । [३६८]'श्रीजगन्नाथचरितामृते' कवि दिवाकरदासः मूर्त्तित्रयं त्रिवीजात्मकम् अर्थात् श्रीं-बलभद्रः, ह्रीं-सुभद्रा, क्लीं-जगन्नाथः इति प्रतिपादयति । अशोककुमारमजुमदारेण प्रथमान्तर्जातिकसंस्कृतसम्मेलने पठिते 'जगन्नाथः, अस्य वैज्ञानिकविश्लेषणं च' इति प्रबन्धे प्रतिपादितं यत् सगुणदृष्ट्या आत्मनः भेदत्रयेण पुरीस्थश्रीमन्दिरे [३६९]मूर्त्तित्रयस्य समावेशः जातः इति । मूर्त्तित्रयस्य समावेशे विभिन्नमतवादाः विदुषां पुरतः प्रतिपाद्यन्ते ।

१. ***इतिहासवादः*** - उत्कलप्रदेशः उत्कल (उड्र)कलिङ्ग-कोशलेति नामानुसारेण त्रिधा विभक्तः आसीत् । तत्रत्य शासकाः स्व स्व राज्यरक्षणाय राष्ट्रदेवताः प्रतिष्ठापितवन्तः । तदानीन्तनेषु कलिङ्गेषु राष्ट्रदेवता आसीत् गोकर्णेश्वरः, उत्कलदेशस्य (उड्रदेशस्य) राष्ट्रदेवता आसीत् पुरुषोत्तमजगन्नाथः, कोशलदेशस्य राष्ट्रदेवता आसीत् देवी स्तम्भेश्वरी । एतासामेकत्रीकरणेन कालक्रमेण जगन्नाथबलभद्रसुभद्रेति प्रसिद्धं मूर्त्तित्रयं पुरीस्थश्रीमन्दिरे पूजितं जातम् ।

---

३६७. रामकृष्णसुभद्रा ये ए तिनि प्रतिमा ।
श्रीपुरुषोत्तमे विजे हली हरि ब्रह्मा ॥ - सारलादासकृत महाभारते ।

३६८. श्रीं बीजरूपः शेषश्च सुभद्रा ह्रीं स्वरूपिणी ।
क्लींरूपश्च जगन्नाथस्त्रितत्त्वमत्र गोपितम् ॥
-श्रीजगन्नाथचरितामृते चतुर्थाध्याये - पृ०- ६२ ।

३६९. Our three images represent these three phrases of the soul. अ,उ,म. Our Jagannatha, the preserver, is blue in colours because he stands for the dormant soul, devoid of Jnan of the outside world. Subhadra is yellow when blue is fully drunk. Inorder to emphaxize that God does not create by hand but by will power (Iccha). Subhadra, the creater has not symbolic hands even she is a female, because it is the mother who begets of body, Balabhadra is fully white because at this stage the soul has attained full conciousness eleminating all atachment towards begining of the Mahakala.
-Jagannatha its Scientific Exposition-Dr. A.K. Majumdar, quoted from proceedings of the First International Sanskrit Confernce-1981, p.117

२. *जैनमतवादः* – जैनमतवादानुसारं केवलीभावः सम्यक्त्रयेण लभ्यते । अतएव ते जैनाः सम्यक्ज्ञानं, सम्यक्चरितं, सम्यक्दर्शनम् इति सम्यक्त्रयमाधारीकृत्य केवलीभावः मोक्षप्राप्तिः भवतीति जानन्ति। श्रीमन्दिरे प्रतिष्ठितं मूर्त्तित्रयं जैनानां सम्यक्त्रयमिति ते स्वीकुर्वन्ति । पुनश्च तैः पुरुषोत्तम-पुरुष-शलाकाभावत्रयं स्वीक्रियते यस्य स्वरूपं यथाक्रमं जगन्नाथः, बलभद्रः, सुभद्रा चेति ।

३. *बौद्धमतवादः* – जगन्नाथः बलभद्रः सुभद्रा चेति बौद्धधर्मस्य त्रिरत्नम् । तानि बुद्धः, धर्मः, संघश्चेति बौद्धाः जानन्ति ।

४. *शैवमतवादः* – शैवमतवादिनः जगन्नाथ-बलभद्र-सुभद्रेति मूर्त्तित्रयं शैवधर्मस्य यथाक्रमं शिवः, विन्दुः, शक्तिः अथवा पशुः पाशश्चेति कल्पयन्ति ।

५. *वैष्णवमतवादः* – वैष्णवमतवादिनः जगन्नाथादिमूर्त्तित्रयं तु राधाकृष्णबलभद्ररूपेण पूजयन्ति । चैतन्यरामानुजप्रभृतयः वैष्गवधर्मप्रचारकाः श्रीक्षेत्रे आगमनात् परं जगन्नाथ-बलभद्र-सुभद्रानां स्थाने कृष्ण-बलभद्र-सुभद्राः, कृष्णबलरामराधाः वा आरोपयन्ति ।

६. *गाणपत्यवादः* – गाणपत्यमतवादस्य प्रवर्त्तकः कर्णाटदेशस्य विशिष्टसाधकः गणपतिभट्टः । तस्य मतेन जगन्नाथ-बलभद्र-सुभद्रा यथाक्रमेण खादिरगणपतिः हरिद्रागणपतिः मातङ्गी चेति।

७. *शाक्तमतवादः* – शाक्तमतवादस्य समर्थकः आसीत् ज्ञानसिद्धिग्रन्थस्य प्रणेता इन्द्रभूतिः । तस्य भगिनी लक्ष्मीङ्करा तथा च अन्ये साधकाः जगन्नाथ-बलभद्र-सुभद्राः यथाक्रमं महाकाली, तारा, भुवनेश्वरी चेति स्वीकुर्वन्ति ।

८. *सौरमतवादः* – सौरमतवादानुसारं जगन्नाथ-बलभद्र-सुभद्राः सूर्यस्य वर्त्तमाने रात्रिः, दिवसः, सन्ध्या चेति कालत्रयम् । जगन्नाथस्तु महाकालरात्रिः कृष्णवर्णविशिष्टः, बलरामस्तु श्वेतवर्णविशिष्टः दिवसः, सुभद्रा च कुङ्कुमारुणप्रभा हरिद्रावर्णविशिष्टा सन्ध्या इति ।

९. ***शेषशायिवादः***- शेषशायिवादानुसारं श्रीजगन्नाथः श्रीविष्णुत्वेन, बलभद्रः शेषदेवत्वेन, सुभद्रा च श्रीदेवीत्वेन भूदेवीत्वेन वा स्वीकृताः भवन्ति ।

१०. ***योगवादः***- योगवादानुसारं जगन्नाथ-बलभद्र-सुभद्राः यथाक्रमं सर्वाङ्गपुरुषः, अमानवपुरुषः, निर्वाणकला च । अथवा ईडा-पिङ्गला-सुषुम्नानाडित्रयरूपेण मूर्त्तित्रयं परिकल्प्यते ।

११. ***अणाकारवादः***- अणाकारवादस्य प्रवर्त्तकाः उत्कलीयाः भक्ताः पञ्चसखायः अच्युतः, बलरामः, जगन्नाथः, यशोवन्तः, अनन्तश्चेति ब्रह्मज्ञानिनः साधकाः । ते मूर्त्तित्रयं यथाक्रमं निरञ्जन-शून्य-ज्योतिरूपेण पश्यन्ति ।

१२. ***ॐकारवादः***- ॐकारवादस्य प्रवर्त्तकाः उत्कलीय-पञ्चसखायुगीयकवयः । तेषां मतेन विन्दुब्रह्म, शब्दब्रह्म, नामब्रह्म चेति यथाक्रमं जगन्नाथादिमूर्त्तित्रयम् । अतः जाग्रत्-स्वप्न-सुषुप्त्यवस्थात्रयं तु मूर्त्तित्रये समाविष्टम् । पुनः ते अकारो जगन्नाथः, उकारो बलभद्रः, मकारस्तु सुभद्रा चेति जानन्ति ।

१३. ***ब्राह्मण्यमतवादः***- ब्राह्मण्यमतवादस्य प्रचारकः आसीत् जगद्गुरुश्रीशङ्कराचार्यः । तस्य मतेन जगन्नाथ-सुभद्रा-बलभद्राः विष्णु-ब्रह्म-महेश्वरत्वेन विराजन्ते ।

१४. ***रामायणमतवादः***- रामभक्ताः जगन्नाथं रामचन्द्रत्वेन, बलभद्रं लक्ष्मणत्वेन, सुभद्रां च सीतादेवीत्वेन कल्पयन्ति ।

एवं मतवादवैभिन्न्यात् जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनेषु मूर्त्तिकल्पनावैभिन्न्यं नितरां वर्त्तते इति विदुषां प्रणिधानयोग्यम् ।

श्रीजगन्नाथतत्त्वम्-

श्रीजगन्नाथदेवस्य तत्त्वमाधारीकृत्य पुराणेतिहासप्रत्नतत्त्व-शिलालेखेषु बहुवर्णनमुपलभ्यते इति प्रागेवोपन्यस्तम् । तत्र ऐतिहासिकानां सिद्धान्तदृष्ट्या सप्तमशताब्दीतः प्राक् जगन्नाथशब्दस्य

व्यवहारः नासीत् । किन्तु प्रत्नतत्त्वविदां सिद्धान्तानुसारमुपलब्धेषु[३७०] विभिन्नेषु अभिलेखेषु सप्तमशताब्दीपरवर्त्तिनि अभिलेखेषु नीलाचल-नीलगिरि-नीलमाधव-पुरुषोत्तम-जगन्नाथ-पुरुषोत्तमजगन्नाथ-पुरुषोत्तमक्षेत्रप्रभृतीति उल्लिखितानि सन्ति । अतः पुरुषोत्तमकथनेन श्रीजगन्नाथ एव ज्ञायते । स एव पुरुषोत्तमजगन्नाथः [३७१]स्कन्दपुराणे माधवत्वेन नीलमाधवरूपेण वा पुरुषोत्तमक्षेत्रे पूजितः आसीत् इति प्रतिपाद्यते । स पीतवस्त्रधारी चतुर्भुजविशिष्टः विलक्षणस्वरूपः आसीदिति [३७२]ब्रह्मपुराणात् ज्ञायते । कालक्रमेण स एव श्रीजगन्नाथः त्रिधामूर्त्तिविशिष्टः चतुर्द्धामूर्त्तिविशिष्टो वा भूत्वा इन्द्रद्युम्नस्य यज्ञकरणानन्तरमाविर्भूतः । [३७३]स्कन्दपुराणे आविर्भूतेन चतुर्भुजधारिणा

---

३७०. We cannot definitely establish the historical importance of Puri on archaeological and epigraphical grounds before the seventh century A.D. The temple architecture, as well as some of the celebrated monuments of the locality, can not be deemed anterior to that period. It is strange that although there are references to Purusottam in the earlier Puranas, we have so far not been able to find any epigraphical record pertaining to Purusottam before the seventh century A.D. There is no mention of even the name of Neelachala or Neelagiri in the inscriptions prior to the seventh century A.D.

-The Cult of Jagannatha, p.21.

३७१. (क) अस्य मूलात् प्रतीच्यां हि नृसिंहस्योत्तरे नृप ।
अतिष्ठन् माधवो यत्र चतुर्मूर्त्तिधरो विभुः ॥

-स्कन्दपुराणे उत्कलखण्डे - १५/२४ ।

(ख) नीलाचलं प्रयात्येष दिदृक्षुर्नीलमाधवम् । - तत्रैव- १४/३८ ।

(ग) प्रेषितोऽहं हरिं द्रष्टुमत्यं नीलमाधवम् । - तत्रैव - ७/१९ ।

३७२. सर्वलोकविधातारं सर्वलोकसुखावहम् ।
पुराणं पुरुषं वेद्यं व्यक्त्याख्यातं सनातनम् ॥
पीतवस्त्रं चतुर्बाहुं शङ्खचक्रगदाधरम् ।
सर्वलक्षणसम्पूर्णं सर्वेन्द्रियविवर्जितम् ।
कुटस्थमचलं सूक्ष्मं ज्योतिरूपं सनातनम् ॥

-ब्रह्मपुराणे- ४५/६३, ६५, ६७ ।

३७३. द्रष्टव्या पादटिप्पणी - ३५२ ।

विष्णुना चतुर्भुजधारीश्रीजगन्नाथमूर्त्तिस्थापनार्थमिन्द्रद्युम्नः उपदिष्ट इति वर्णितमस्ति । परन्तु [३७४]ब्रह्मपुराणे स्पष्टतया श्रीजगन्नाथादिमूर्त्ति-त्रयस्योल्लेखो वर्त्तते । तदानीं चतुर्भुजविशिष्टजगन्नाथमूर्त्तिः गठिता न वेति स्पष्टं ज्ञातुं न शक्यते । किन्तु स्तुतिनिवेदनावसरे [३७५]स्कन्दपुराणे चतुर्भुजविशिष्टमूर्त्तिराभासोऽवगम्यते । विलक्षणतया तस्मिन्नेव [३७६]स्कन्दपुराणे श्रीजगन्नाथस्य ऋग्वेदवर्णनानुरूपतया वर्णना समुपलभ्यते । अपि च तत्र पुरुषोत्तममाहात्म्यवर्णने[३७७] स्थलविशेषे कुत्रचित् एकपादविशिष्टत्वेन कुत्रचित् त्रिपादविशिष्टत्वेन कुत्रचित् च अन्तरीक्षपादविशिष्टत्वेन तस्यैव श्रीजगन्नाथस्य रूपवर्णना प्राप्यते इति महद्वैचित्र्यमेतत् [३७८]ब्रह्मपुराणे यस्यैव श्रीजगन्नाथदेवस्य वर्णनं केवलं प्रतिमारूपेण दृष्टिगोचरीभूतं भवति [३७९]स्कन्दपुराणे तस्यैव

---

३७४. श्रीवत्सकौस्तुभधरं शङ्खचक्रगदाधरम् ।
लाङ्गुलास्त्रधरं देवमनन्ताख्यं महाबलम् ।
तृतीया वै सुभद्रां च सर्वलक्षणलक्षिताम् ।
- ब्रह्मपुराणे- ५०/४४-४६ ।

३७५. (क) शङ्खचक्रगदापद्म लसद्बाहुर्जनार्दनम् ।
-स्कन्दपुराणे उत्कलखण्डे- १९/९ ।
(ख) शङ्खचक्रगदापद्मधारिणं शुभदायिनम् । - तत्रैव - २/२६ ।
(ग) शङ्खचक्रगदापद्मधारिणं वनमालीनम् । - तत्रैव- ५/५४ ।

३७६. अहोतवायं खलु भाग्यराशिर्येनाविरासीद्भुविदारुमूर्त्तिः ।
यस्यात्युपास्तिं श्रुतिराहमुक्तिप्रदामनात्मज्ञ विमोहितानाम् ॥
य एष प्लवतेदारुः सिन्धोः पारे ह्यपौरुषम् ।
तमुपास्य दुराराध्यं मुक्तिं यान्ति सुदुर्लभाम् ॥ - तत्रैव- २१/२-३ ।

३७७. पादोऽस्य विश्वभूतानि त्रिपादस्यामृतं दिवि । - तत्रैव - २४/८ ।

३७८. (क) अस्मिन्नायतने पुण्ये विख्याते पुरुषोत्तमे ।
इन्द्रनीलमयी श्रेष्ठा प्रतिमा सार्वकामिकी ॥
- ब्रह्मपुराणे- ४५/७१ ।
(ख) न चात्र दृश्यते चान्या प्रतिमा वैष्णवो शुभा । -तत्रैव- ४६/२७ ।

३७९. (क) तस्माद्दारुमयं ब्रह्म वेदान्तेषु प्रतीयते ।
अलौकिकी सा प्रतिमा लौकिकीति प्रकाशिता ॥
- स्कन्दपुराणे उत्कलखण्डे- ४/७४-७७ ।

दारुप्रतिमात्वेन प्रतिपादनं प्राप्यते । संसारस्यस्यं आदिभूतत्वेन सोऽयं श्रीजगन्नाथः श्वेतद्वीपे प्रसिद्धिं गतः । स एव सच्चिदानन्दमयात् विष्णोरभिन्नः । क्षीरसागरमध्यवर्त्तिश्वेतद्वीपस्थविष्णोः पत्नीत्वेन या लक्ष्मीदेवी प्रख्याता तस्यैव श्रीजगन्नाथदेवस्यापि सेति [३८०]प्रसिद्धिरस्ति। किन्तु विलक्षणसम्पन्नोऽयं श्रीजगन्नाथः नित्यानन्दमयः सच्चिदानन्द-रूपः निरञ्जनः सन्नपि भक्तानुग्रहाय स्वतः स्वरूपं धारयन् विशिष्टतां प्राप्नोति । ततोऽधिकतया ब्रह्मविष्णुरुद्रादिभेदेन शम्भोः षट्प्रकारप्रकाशत्वेऽपि स पुनः श्रीजगन्नाथदेवं अनुसरति स्तौति च इति स्पष्टरूपेण [३८१]रुद्रयामले सूचितम् । वस्तुगत्या तस्य स्वरूपपरिप्रकाशो निर्वेदत्वेन प्लवमानदारुरूपेण जातः इति न केवलं [३८२]ऋग्वेदे समुपन्यस्तं अपि च अरूपतया [३८३]स्कन्दपुराणे प्रकाशित इति हेतोः स एव श्रीजगन्नाथदेवः प्रथमतः वैदिकदेवत्वेन प्रसिद्धिं गच्छति इति प्रमाणिकर्त्तुं निरङ्कुशावचनसामर्थ्यं मिलतीति नास्ति सन्देहः ।

प्रागैतिहासिकसिद्धान्तालोड़नानन्तरमैतिहासिकसिद्धान्तविचारे अस्माकं पुरतः ये ये सिद्धान्तिनः भान्ति तेषु मेघास्थिनिज् इति नामधेयः ऐतिहासिकः अन्यतमः । खीष्टपूर्वचतुर्थशतके भारतवर्षमागत्य असौ

(ख) दारुप्रतिमाचेयं साक्षाद्ब्रह्मप्रकाश्यते । -तत्रैव- ५/७९ ।

३८०. तन्मध्येदद्दशेदेवं शङ्खचक्रगदाधरम् ।
दक्षपार्श्वस्थितां चास्य लक्ष्मी तां शुभलक्षणाम् ॥
-तत्रैव- १७/८, १४ ।

३८१. (क) महाकन्दवासी महानन्दवासी पुरग्रामवासी महायीठदेशा ।
जगन्नाथवक्षः स्थलस्थो परेण्यो वृत्तानन्दकर्त्ता शिवानन्दकर्त्री ॥
- रुद्रयामले उत्तरतन्त्रे - ४४/११ ।

(ख) ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिव ।
ततः परं शिवशम्भोः षट्शिवाः षट्प्रकाशकः ॥
क्रियानिविष्टः सर्वत्र भावनाग्रहरूपधृक् ।
स पश्यति जगन्नाथं कमलोरुगतं हरिः ॥
-तत्रैव- ४५/११-१२ ।

३८२. ऋग्वेदे- १०/१२/१५५/३ ।

३८३. स्कन्दपुराणे उत्कलखण्डे- २१/३ ।

ऐतिहासिकः स्वभ्रमणपुस्तिका [३८४]इण्डिकाग्रन्थे अत्रत्य देवदेवीनामुपासनादिसम्बन्धिबहुतथ्यं प्रतिपादितवान् । तन्मध्ये तेनैव मुख्यतया उपन्यस्तं यत् तदानीन्तनकाले भारतवर्षे प्रमुखतया कृष्णस्योपासना प्रचलिता आसीत् । मेघास्थिनिज्महोदयस्याभिमतोपरि [३८५]भण्डारकरमहोदयाः स्वाभिमतं प्रकटयन्ति यत् तदानीन्तनकाले कृष्णोपासना कृष्णवासुदेवमूर्त्तिपूजारूपेण प्रचलिता आसीत् । सम्प्रति प्राचीनदीकूले शोभमानेषु मन्दिरेषु वासुदेवोपासनां परिलक्ष्य प्राक्तनकाले तत्र वासुदेवपूजायाः बहुलं प्रचलनमासीदिति [३८६]प्रत्नतत्त्वगवेषणाद्वारा ज्ञायते । अतः परवर्त्तिनि काले वासुदेवस्योपासना वासुदेवमाधवोपासनारूपेण प्रसिद्धिमगादिति सुस्पष्टमेव । कालक्रमेण सा वासुदेवमाधवोपासना-माधवोपासना-नीलमाधवोपासनाप्रभृतिभिः प्रसिद्धिं गता । सम्प्रति उत्कलप्रदेशान्तर्गतबौद्धमण्डले 'गन्धराडी'नामकस्थाने तथा च पुरीमण्डलान्तर्गत 'कण्टिलो'नामकस्थाने नीलमाधवस्योपासना दृश्यते । गन्धराडीस्थनीलमाधवमन्दिरं पुरीस्थश्रीजगन्नाथमन्दिरात् प्राचीनतरमिति डॉ० कान्हुचरणमिश्र[३८७]महोदयानामभिमतस्य स्वीकरणेन नीलमाधवोपासनातः क्रमविकाशफलेन श्रीजगन्नाथोपासनायाः सृष्टिरिति कथयितुं शक्यते । अधिकन्तु शैलोद्भववंशीयराजभिः चक्रधरमाधवेत्युपाधिः या गृहीता तद्द्वारा

---

३८४. The accepted date is the fourth century B.C. Herakles of Krishna was worshipped as a demigod in Kleisobora (Krishnapura) and Methora (Mathura).

-The Indica of Meghaothenese-
quoted in Vaishnvism in Orissa, p.3.

३८५. R.C.Bhandarkar -Comparative Essays.

३८६. P.K.Roy : Prachi Valley Archaeological Survey Report, 1975, pp.65-66.

३८७. It is interesting to note that archaeologically and stylestically the temple of Neelamadhaba at Gandharadi near Boud was constructed long before the present Jagannatha temple at Puri.

-The Cult of Jagannatha, p.23.

शैवधर्मस्य पृष्ठपोषकैः अपि तैः राजभिः परवर्त्तिनि काले चक्रधरमाधवस्य नारायणमाधवस्य वा उपासना आचरिता तथा च कृष्णगिरौ नीलगिरौ वा तस्यैव माधवस्य स्थानान्तरणं साधितं यद्द्वारा नीलगिरौ नीलमाधवस्य प्रसिद्धिः जाता इति [३८८]मिश्रमहोदयानामभिमतं विलक्षणभावसम्पन्नमिति मन्यते । वस्तुतः चक्रधरमाधवस्य नारायणमाधवस्य वा महेन्द्रगिरितः नीलगिरिं प्रति स्थानान्तरीकरणे प्रकृष्टप्रमाणाभावात् [३८९]मिश्रमहोदयानां उल्लेखो युक्तियुक्तो न मन्यते । अधिकन्तु तत्र श्वेतकगङ्गराजेन पूजितः नन्दगिरिनाथः कालक्रमेण नीलगिरिनाथरूपेण प्रसिद्धिं गतः इति [३९०]तेषामपरः विश्वासः विद्वद्भिः विमर्षणीय एव । पुराणेषु वर्णितेषु भौगोलिकप्रसङ्गेषु नन्दगिरिनामस्योल्लेखो नास्ति । अतएव तस्य विचारः ग्रहणयोग्यो न भवति । प्राचीनद्युपत्यकायां पूजितस्य माधवस्य प्रस्तरमूर्त्तिः साम्प्रतमपि दृष्टीगोचरीभूता भवति । अतः माधवोपासनायाः क्रमविकाशफलेन नीलमाधवोपासना विहिता इति कथयितुं शक्यते । अपि च नीलमाधवोपासनायाः क्रमविकाशात् श्रीजगन्नाथोपासना जातेति

---

३८८. This also corroborated by the fact that they were worshipping Chakradharamadhaba or Bhagabaua Madhaba as mentioned in their grants in Kongeda area in which Purusottama Kshetra is situated. Their love and respect towards the God Madhaba is very often recorded in their charters, as they seem to compare themselves with Bhagaban Chakradhara although they are Saivas.

-Ibid, p.25.

३८९. There is no evidence at our disposal to suggest anything definitely regarding the removal of Narayanamadhaba of the Mahendragiri and Kangodamandala to Puri. x x x x x It is probable that during the time of the Sailodbhavas the deity was removed to Krishnagiri and subsequently to Neelagiri.

-Ibid, p.25.

३९०. There is another God called Nandagirinatha worshipped by the Svetaka Gangas. It is likely that the conception of nandagirinatha or Krishnagirinatha later of gave rise to Neelagirinatha Jagannatha.

-Ibid, p. 25.

[391]वासुदेवसाहुमहोदयानां मतम् आपाततः स्वीकार्यम् । यः एव नीलमाधवः शवरैः पूजित आसीत् इति किम्बदन्ती सूचयति परवर्त्तिनि काले स एव नारायणोपासकैः विष्णूपासकैश्च पूजित इति दृश्यते । किन्तु तदुपासनायां शवरप्रभावस्याधिक्यात् शवरीनारायणत्वेन स प्रथितोऽभवत् । तत्सहितेन च बौद्धधर्मावलम्बिभिरपि स्वाराध्यदेवतात्वेन सः स्वीकृतः इति नानाविधोक्तिप्रत्युक्तिच्छलेन [392]साहुमहोदयैः उपन्यस्तम् । अपि च शवराराध्यदारुदेवता हरिभावेन विष्णुभावेन वा माठरवंशीयराजभिः प्रपूजिता आसीदिति [393]मिश्रमहोदयानामभिमतमालोच्य स एव दारवीमूर्त्तिधारी शवरीनारायणः परवर्त्तिनि युगे बौद्धैः वैष्णवैश्च स्वीकृतः सन् ख्रीष्टीयसप्तमशतकात् परं नीलाचले पुरुषोत्तमजगन्नाथत्वेन

---

३९१. जगन्नाथ नाम सृष्टि पूर्वरु येउँ नीलमाधव नीलगिरिरे पूजा पाउथिले, से हेउछन्ति शवरद्वारा उपास्य देवता । प्राची उपत्यकारे अन्यान्य स्थानरे येते माधव पूजा पाउथिले ओ पाइ आसुछन्ति सेमानङ्कर मूर्त्ति पाषाण मूर्त्ति, किन्तु शवरमानङ्क द्वारा पूजित नीलमाधव हेउछन्ति काष्ठमूर्त्ति वा दारुमूर्त्ति । जगन्नाथ दारुब्रह्म । तेणु शवरपूजित नीलमाधवङ्कर परिणति हि हेउछन्ति प्रभु श्रीजगन्नाथ ।

- जगन्नाथ चेतनार उद्भव ओ विकाश - पृ०- १०९ ।

३९२. शवरमाने येउँ दारुदेवताकु पूजा करुथिले परवर्त्तीकालरे नारायण उपासक (विष्णु उपासक) माने ताहाकु 'शवरीनारायण' नामरे अभिहित करिछन्ति । शवरमानङ्कर दारुदेवताकु आर्यमाने नारायण कहिले मध्य ताङ्कर पूजारे शवरमानङ्कर अधिक अधिकार थिवारु ताङ्कर विशेषता थिला शवरी, बौद्धमाने मध्य शवरीनारायणङ्कु निजर करिनेउछन्ति ।

- तत्रैव- पृ०- १०९ ।

३९३. Contemporary with the Matharas in the western region of Orissa, the Nalas were ruling over a portion of Dakshina Koshala, comprising the modern Koraput district of Orissa and Bastar and Nagpur in Madhya Bharata. x x x x x In the sixth linc of the inscription there is a passage known as "Purusaya Puran" which may be explained as the home of Purusa, who non but Hari or Vishnu.

-The Cult of Jagannatha- p.8.

प्रसिद्धोऽभवत् इति [१९४]तत्रालोचितम् । सप्तमशतकीय नेउलपुरस्थीयाभिलेखात् ज्ञायते यत् [१९५]शुभकरदेवस्य राजत्वसमये अत्र पुरुषोत्तमबलभद्रयोरुपासना सर्वतोभावेन प्रचलिता आसीत् यतः तदानीन्तनः कश्चन ब्राह्मणः स्वपुत्रस्य पुरुषोत्तमबलभद्रेति नामकरणं कृतवान् । दक्षिणपूर्वदेशस्य शासकः आसीत् श्रीधारणराटः यत्प्रदत्त-ताम्रशासने पुरुषोत्तविषये उल्लेखोऽस्ति । दीनेशचन्द्रसरकार तस्य ताम्रशासनस्य समयः सप्तमशताब्दीति निर्णीय तत्रत्यपुरुषोत्तमः पुरीस्थः श्रीजगन्नाथ इति मतव्यक्तं कृतवान् [१९६]प्रबन्धमाध्यमेन ।

सप्तमशताब्द्याम् उत्कलराज्यस्य पश्चिमप्रान्ते शासकेन नन्दराजेन पुरुषभावेन विष्णोः हरेः स्वीकरणात् स एव पुरुषः पुरुषोत्तमजगन्नाथः इति प्रसिद्धम् इति [१९७]अभियुक्तमतं चिन्त्यमेव । यद्वा भवतु ७१७ खीष्टाब्दे इन्द्रभूतिना रचिते ज्ञानसिद्धिनामके बौद्धग्रन्थे श्रीजगन्नाथस्य स्तुतिहेतोः ततः पूर्वमेव श्रीजगन्नाथस्योपसना उत्कलेषु प्रचलिता आसीदिति निश्चप्रचम् । अष्टमशतके श्रीशङ्कराचार्यः उत्कलदेशमागत्य अत्र ब्राह्मण्यधर्मस्य पुनः प्रतिष्ठां कृतवानिति सर्वैः ज्ञातम् । ततः परं नवमशतके रचिते 'अनर्घराघव'नाटके प्रस्तावनायां

---

१९४. शबरमानङ्कर दारुदेवता बौद्ध ओ वैष्णवधर्म द्वारा प्रभावित होइ क्रमशः पुरुषोत्तम ओ जगन्नाथरे परिणत होइछन्ति ।

- जगन्नाथ चातनार उद्भव ओ विकाश - पृ०- ११० ।

१९५. But the earliest inscription so far known to us in this family where the donors name is recorded as Purusottama is the Neulpur plate of Subhakardeva-I, who was a "Parama Saugata" but who granted lands in favour of as many as one hundred Brahmans. In the long list of the grantees mentioned in the inscription there are four persons bearing the name of Balabhadra and one person of the name Haladhara. We have every reason to believe that Purusottam and Balabhadra were popular deities of this locality, after whom a brahmin father named his sons as Purusottama and Balabhadra.

- The Cult of Jagannatha, p. 36.

१९६. I.H.Q., Vol-XXIII, pp. 221-241.

१९७. The Indian Culture- Vol XV, No. 1-4, p.97.

नाट्यकारेण [398]मुरारिमिश्रेण भगवतः श्रीजगन्नाथदेवस्य यात्रासम्बन्धे उपस्थापितत्वात् तदानीन्तनकाले ततः पूर्वं च श्रीजगन्नाथदेवस्य प्रभूतोपासनापुरःसरं रथयात्रादयः पालिता आसन् इति स्पष्टं ज्ञायते । मध्यप्रदेशस्य सातुनामण्डलस्थ मैहारग्रामात् आविष्कृते दशमशताब्दीयताम्रलेखे [399]पञ्चत्रिंशत्तमश्लोके उड्रदेशस्य पुरुषोत्तमदेवस्य माहात्म्यवर्णनाप्रसङ्गात् अधुनातने उत्कलप्रदेशे तदानीं श्रीजगन्नाथचेतनायाः प्रचारः [400]आसीदिति सर्वजनावधेयम् । शतकेऽस्मिन्नपि दण्डीमहादेवीप्रदत्ते एकस्मिन् दानपट्टके[401] ग्रहीतुः भट्टपुत्रस्य पुरुषोत्तमस्य नामोल्लेखात् तदानीं उत्कलेषु राष्ट्रदेवस्य नामानुसारमपत्यानां नामकरणं प्रारब्धं जातम् । एतदनन्तरं १०१० खीष्टाब्दतः १०७० खीष्टाब्दमध्ये कविकृष्णमिश्रविरचिते [402]'प्रबोधचन्द्रोदय'नाटके पुरुषोत्तमश्रीजगन्नाथदेवस्य उत्कलदेशस्य

---

३९८. अलमतिविस्तरेण । भो भो लवणोद्वेलावनालीतमालतरुकन्दलस्य त्रिभुवनमौलिमण्डनमहानीलमणेः कमलाकुचकलसकेलिकस्तुरिका-पत्राङ्कुरस्य भगवतः पुरुषोत्तमस्य यात्रायां उपस्थापनीयाः सभासदः ।

-अनर्घराघवनाटके प्रथमोऽङ्कः ।

३९९. समुद्रमज्जनान्नूनमोड्रेषु पुरुषोत्तमम् ।
दृष्ट्वा तवान्तिके भूयः पुरा गच्छत्यां शिशुः ॥

-Epigraphica Indica, Vol-XXXV-1963-64, p.171.

४००. (क) जगन्नाथ चेतनार उद्भव ओ विकाश - पृ०- ११४ ।

(ख) The second equally undoubtful reference to Purusottama Jagannatha comes from Maihar in the Satana district of Madhyapradsh. It is found in a stone inscription belonging to the temple of Saraswato situated on a Mountain in Maithar.

-The Cult of Jagannatha and the Regional Traditions of Orissa, p.39.

४०१. Indian Historical Quarterly, Vol-VI, pp.141-142.

४०२. पुरुषः- अहमुत्कलदेशागतोऽस्मि । अस्ति तत्र सागरतीरे पुरुषोत्तमशब्दितं देवायतनम् ।

महामोहः- कुतो भवान् । पुरुषः- अहं पुरुषोत्तमादागतोऽस्मि ।

- प्रबोधचन्द्रोदयनाटके द्वितीयोऽङ्कः ।

च वर्णना समुपलभ्यते । ११९८ ख्रीष्टाब्दीये 'दासगोवा'नामधेये अभिलेखे श्रीजगन्नाथमन्दिरस्य निर्माणकर्त्तुः चाडगङ्गदेवस्य विषये उल्लेखनात् तदानीं श्रीजगन्नाथदेवस्य प्रसिद्धिः आसीत् इति [४०३]ऐतिहासिकैः प्रतिपादितमेव । द्वादशशताब्द्यां रामानुज-विष्णुस्वामी-निम्बार्क-माधवाचार्यप्रभृतयः वैष्णवधर्मप्रचारकाः पुरुषोत्तमक्षेत्रमागत्य श्रीजगन्नाथं वैष्णवधर्मस्य सर्वश्रेष्ठदेवत्वेन गृहीतवन्तः । फलतः वैष्णवधर्मस्य बहुलप्रसारात् श्रीजगन्नाथमन्दिरे पूजाविधौ पूर्वप्रचलिताः नियमाः वैष्णवधर्मानुसारं किञ्चित्परिमाणेन परिवर्त्तिताः जाताः । क्रमशः श्रीजगन्नाथसंस्कृतौ राधाकृष्णयो-रुपासनायाः अन्तर्भावः जातः । फलतः द्वादशशताब्द्याः मध्यभागे कविः जयदेवः राधाकृष्णयोः उपासनामाधारीकृत्य गीतगोविन्दकाव्यं रचितवान् । गीतगोविन्दकाव्यस्य रचनावसरे जयदेवः प्रतिदिनं श्रीजगन्नाथमन्दिरमागत्य तत्काव्यपाठेन भगवन्तं स्तौति स्म इति किम्बदन्ती । त्रयोदशशताब्दीतः श्रीजगन्नाथः उत्कलेषु राष्ट्रदेवतात्वेन प्रसिद्धिं गतः । तदानीं राजा अनङ्गभीमदेवः श्रीजगन्नाथस्य सेवकरूपेण उत्कलराज्यशासनं करोति स्म इति [४०४]मादलापाञ्जितः ज्ञायते । तस्य समये जगन्नाथ-बलभद्र-सुभद्रा मूर्त्तित्रयस्य पूजा उत्कलेषु विभिन्नस्थानेषु ख्यातिं प्राप्ता । पञ्चदशशतके श्रीजगन्नाथदेवः उत्कलदेशस्य सम्मानरक्षणाय धनुर्धररूपेण उत्कलराजपुरुषोत्तमदेवेन साकं काञ्चीयुद्धक्षेत्रे अवतीर्णो जात इति न केवलं जनश्रुतितः अपि च [४०५]मादलापाञ्जितः ज्ञायते । अनन्तरं श्रीचैतन्यदेवः वङ्गदेशात्

---

४०३. द्रष्टव्य पादटिप्पणी - २६३ ।

४०४. ए नगरे कटके थाइ श्रीपुरुषोत्तम जगन्नाथङ्कु देवङ्कु समस्त समर्पि राउतपणे थाआन्ति ।

- मादलापाञ्जि- पृ०- २७ ।

४०५. दश अङ्करे राजा शुणिले काञ्चि नगरे पद्मिनी..... तहिँकि राजा मध्यस्थ पठिआइ.......नकला । राजा शुणि कोपकरि तुम्भे आम्भपाइ पारे श्रीछामुरे जणाइब । एहिदिन रात्ररे महास्वार बहुत काकुस्थ होइ महाप्रभुङ्क श्रीछामुरे जणाइले । प्रभुङ्कर सेहि रात्रे आज्ञा होइला । बैत न मरिब । आम्भे बिजे कले से गड़ मरिब आम्भे कलाबारूँ धलाबारूँ चढ़ि आगे

पुरीमागत्य श्रीजगन्नाथं कृष्णरूपेण प्रतिपादितवान् । किन्तु [४०६]सालवेगनामधेयेन यवनभक्तकविना श्रीजगन्नाथदेवः बुद्ध इति प्रचारितः ।

श्रीजगन्नाथः न केवलमुत्कलीयानामपि च सर्वेषां भारतीयानाम् आराध्यदेवो जातः । सोऽयं कम्बुकटकविलासी वैदिकयुगादारभ्य कालक्रमेण इदानीं यावत् नीलमाधव-दारुब्रह्म-पुरुषोत्तम-नीलाद्रिनाथ प्रभृतिनामधारणपूर्वकं जैनबौद्धतान्त्रिकप्रभृतिभक्तविशेषैः क्रमानुसारं जीन-बुद्ध-भैरवप्रभृतिनामानि गृह्णन् अधुना श्रीजगन्नाथ इति ख्यातः । उक्तं यथा अभियुक्तैः-

यो दारुब्रह्ममूर्त्तिः प्रणवतनुधरः सर्ववेदान्तसारः
भक्तानां कल्पवृक्षो भवजलतरणिः सर्वतत्त्वानुतत्त्वम् ।
सिद्धानां योगमूर्त्ति हरिहरनुमितः श्रीपतिर्वैष्णवानां
शैवानां भैरवोऽयं सततसुविदितः शाक्ततत्त्वे च शक्तिः ॥
बौद्धानां बुद्धमूर्त्ति ऋषभः मुनिवरो जैनसिद्धान्तसारे
सोऽयं नीलाद्रिनाथो भवभयहरणो माधवः पातु नित्यम् ॥

यद्यपि पुर्यामधुनातनश्रीजगन्नाथमन्दिरस्य रत्नसिंहासने जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनेति मूर्त्तिचतुष्टयं विराजते तथापि श्रीजगन्नाथक्षेत्रमिति प्रसिद्धितः श्रीजगन्नाथः प्रथमतया क्षेत्रदेवत्वेन अत्र प्रतिष्ठितः आसीत् इति ज्ञायते । [४०७]ब्रह्मपुराणस्य मङ्गलाचरणमपि इत्थं

विजे कलु । तु याइ राजाङ्कु कह । आम्भ दक्षिण पाचेरी कणरे दुर्गामाधवमूर्त्ति दरशन करि अम्भ पछि यिवु । किछिदूर गला उत्तारु मने विचारिले महाप्रभुङ्कर किछि सङ्केत न पाइलि । एहा जाणि गउडुणीठारे वच्छमुदि सङ्केत देइगले । से मुदि राजा पाइ बहुत काकुस्थ होइ मथारे लगाइले ।

-मादलापाञ्जि- पृ०- ५०-५१ ।

४०६. नीलाचले विजेकरि बौद्ध अवतारेण ।
वेनिभूज टेकि प्रभु याचुअछ शरण ॥

-सालवेग विज्ञप्ति ।

४०७. यस्मात् सर्वविदश्चराचरमिदं मायाजगज्जायते
यस्मिंस्तिष्ठन्ति याति चान्तसमये कल्पनानुकल्पे पुनः ।

प्रतिपादयति । स एव पुरुषोत्तमः श्रीजगन्नाथः आर्त्तभक्तजनानां प्रार्थनां स्वीकृत्य धरणीतले आविर्भवति इति प्रतिपादितम् [४०८]अभियुक्तैः ।

श्रीकृष्णस्य या स्तुतिः [४०९]ब्रह्मवैवर्त्तपुराणे उपन्यस्ता तदनुसारं परंब्रह्मणः श्रीजगन्नाथस्य सगुणनिर्गुणरूपाभेद्यभावद्वयं महात्मना [४१०]अच्युतानन्ददासेन प्रतिपादितम् । तत्त्वमिदं ब्रह्मतत्त्वं भगवत्तत्त्वं वेति वा श्रीमद्भागवते [४११]उपन्यस्तम् । तस्मिन्नेव भगवत्तत्त्वे रुक्मिण्याः प्रवेशेन सह राधाकृष्णयोः तत्त्वस्य एकत्र समावेशः तथा च उभयोः मिश्रणं श्रीजगन्नाथे अस्तीति [४१२]नीलाद्रिमहोदये

यं ध्यात्वा मुनयः प्रसन्नमनसा मोक्षं लभन्ते ध्रुवं
तं वन्दे पुरुषोत्तमाख्यममलं नित्यं विभुं निश्चलम् ॥

- ब्रह्मपुराणे- १/१ ।

४०८. ब्रह्माण्डेऽखण्डऽभाण्डेऽस्थिरतरधरणीमण्डले चण्डशौण्डे
दुर्दण्डः दैत्यदन्तावलबलदलने यस्तु चण्डीरथश्च ।
आनन्दे आदिकन्दनवजलदतनुः सुन्दरं श्रीमुकुन्दं
वन्दे पादारविन्दे तमसुरनिधनं श्रीजगन्नाथदेवम् ॥

४०९. श्रीकृष्णचरणाम्भोजे विशेषशरणं ययौ
सगुणं निर्गुणं ब्रह्मज्योतिरूपं सनातनम् ।
साकारं निराकारं च तेजोरूपं नमाम्यहम् ॥

- ब्रह्मवैवर्त्तपुराणे श्रीकृष्णजन्मखण्डे ।

४१०. शुण आहे गोपसुत भगतिर कथा
सगुण निर्गुण दुइ येवण व्यवस्था ।
दुइ से डेणारे पक्षी उडिकरि याइ
दुइ से चक्षुरे सेहि संसारे खेलइ ॥
एक ये नथिले कणा दुइ गले अन्ध
एणु करि सगुण निर्गुण मध्ये बन्ध ॥

- अच्युतानन्ददासकृतमालिका ।

४११. वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ॥

- श्रीमद्भागवते- १/२/११ ।

४१२. नमो नीलनृसिंहाय विष्णो ब्रह्मन् रमापते ।
इदानीं रुक्मिणी विष्णो हृत्वा परिणयिष्यति ॥

[४१३]जगन्नाथचरितामृते च वर्णितमस्ति । तदाधारीकृत्य श्रीजगन्नाथ-मन्दिरे अधुना राधाकृष्णयोः उपासना बहुलतया परिलक्ष्यते । एतेन भक्तानुग्राहिपरंब्रह्म अस्मिन् श्रीपुरुषोत्तमक्षेत्रे सर्वदा दारुब्रह्मरूपेण विराजमानः इति [४१४]तन्त्रयामलस्योक्तिः न कथञ्चित् प्रकारेण असङ्गतानुभूयते । अतोऽभियुक्तैरुच्यते यत्-

रत्नाकरस्तवगृहं गृहिणी च लक्ष्मी
किं देयमस्ति भवते पुरुषोत्तमाय ।
आभीरगोपनयना हृतमानसाय
दत्तं मनस्तदनु मे त्वरितं गृहाण ।। इति ।

बलभद्रतत्त्वसमीक्षा-

चतुर्द्धामूर्त्तिकल्पनायां यद्यपि श्रीजगन्नाथदेवस्य प्रसिद्धिः अधिका परिलक्ष्यते तथापि तत्र बलभद्रस्य महत्त्वं ततो न्यूनमिति तर्कयितुं न शक्यते । किमस्य बलभद्रदेवस्य तत्त्वम् ? कथं कुतो वा अयं श्रीजगन्नाथदेवेन सह श्रीजगन्नाथसंस्कृतौ अन्तर्भुतः इत्यादिविषयेषु अत्र आलोच्यते ।

श्रीजगन्नाथदेवस्य ज्येष्ठभ्राता श्रीबलभद्रः एव । बलभद्रः शिवस्वरूपेण परिचितः आसीदितिविषये बहुत्र ऐतिहासिकं तथ्यं [४१५]विद्वद्भिः प्रतिपादितम् । परवर्त्तिनि काले वैष्णवधर्मस्य प्राधान्यता-पुरःसरं जगन्नाथदेवस्य कृष्णवासुदेवत्वेन कथनं जातम् । वैष्णवधर्म-

---

जगन्नाथ सुरश्रेष्ठ नमस्ते कमलापते ।
आज्ञापयो महाबाहो श्रीकृष्णं रुक्मिणीं प्रति ।।

- नीलाद्रिमहोदये ।

४१३. गुणकीर्त्यादिकं यत्तु स्थापितं ह्यत्र तिष्ठति ।
राधाकृष्णात्मकदेहे जगन्नाथेति जल्पिति ।।

-जगन्नाथचरितामृते ।

४१४. भारते चोत्कलदेशे भूस्वर्गे पुरुषोत्तमे ।
दारुरूपी जगन्नाथो भक्तानामभयप्रदः ।।

-तन्त्रयामले - १/१ ।

४१५. जगन्नाथ चेतनार उद्भव ओ विकाश - पृ०- १५७ ।

सम्प्रदाये तस्य जगन्नाथदेवस्य मुख्यत्वप्रतिपादनात् बलभद्रस्य प्रतिष्ठायाः क्षुर्णता जातेति अनुमातुं शक्यते ।

उत्कलीयादिवासिकन्धसमाजे जाकेरिपेनु-तानापेनु-मुरविपेनु देवतात्रयस्य पूजा अधुनाऽपि प्रचलिताऽस्ति । एतासु देवतासु ज्येष्ठभ्रातृत्वेन जाकेरिपेनु इत्यस्य, कनिष्ठभ्रातृत्वेन मुरविपेनु इत्यस्य, ज्येष्ठभ्रातुः जाकेरिपेनु इत्यस्य पत्नीत्वेन तानापानु इत्यस्याः च प्रसिद्धिरस्ति । तानापेनु धरणीति तैः कन्धजातीयैः ज्ञायते । अतएव धरण्याः अधीश्वररूपेणं जाकेरिपेनु (बलभद्र) इत्यस्य प्राधान्यं तस्मिन् समाजे स्वीकृतमस्ति । [४१६]विदुषां मतानुसारं एताः तिस्रः देवताः कालक्रमेण बलभद्र-जगन्नाथ-सुभद्रारूपेण क्रमानुसारं परिचिताः जाताः ।

अधिकन्तु तदानीं बलभद्रः रुद्ररूपेण भवानीरूपिण्या सुभद्रया साकं समन्वितः सन् अत्यन्तं प्रसिद्धः आसीदिति पुरन्दरपुरीमण्डनायमानैः श्रीजगन्नाथसंस्कृतविश्वविद्यालयस्य प्रथमकुलपतिभिः [४१७]प्रह्लादप्रधानमहोदयैः स्पष्टीकृतमस्ति । किन्तु परवर्त्तिनि काले श्रीजगन्नाथधर्मसंस्कृतौ तादृश्याः भावनायाः विपरिणामेन [४१८]तन्त्र-शास्त्रानुसारं विमला-जगन्नाथयोः यथाक्रमं भैरवीभैरवत्वेन कल्पनं जातमिति ज्ञायते ।

सप्तमशतकात् पूर्वम् उत्तरभारते निवसद्भिः शवरजातीयमनुष्यैः पुरुदेषगुरुगान् इत्यभिधेययोः ययौ देवयोः उपासना कृता आसीत् तौ एव क्रमानुसारं पुरुषोत्तम शेषदेवौ इति [४१९]इतिहासप्रमाणमुररीकृत्य

---

४१६. जगन्नाथमन्दिर ओ जगन्नाथतत्त्व- पृ०- २७-२८ ।

४१७. आषाढ मासरे गुन्चा रथ । रथे विजे कले से जगन्नाथ ॥
आगे बलभद्र पछे भवानी । पछे कुदाइले दुती लो सारङ्गपानि ॥
डालखाइरे ॥
- लोकसंस्कृतिरे जगन्नाथ - प्रह्लाद प्रधान-
'पौरुष' चतुर्दशसंख्या- पृ०- ८ ।

४१८. विमला भैरवी यत्र जगन्नाथस्तु भैरवः । - रुद्रयामले ।

४१९. It may be presumed that the dominant murugan cult became

[४२०]वासुदेवसाहुमहोदयैः साम्प्रतिकौ उपासितौ जगन्नाथ-बलभद्रौ तयोः रूपान्तरमात्रमिति अनुमीयते । विशेषतः षष्ठसप्तमशतकयोः मध्यवर्त्तिनि काले उत्कलदेशस्य केन्द्रभागे तथा च पूर्वभागे 'मणिनागेश्वरः' राष्ट्रदेवत्वेन उपासितः आसीदिति राज्ञः लोकविग्रहस्य 'कणास'[४२१] ताम्रलेखात् भानुवर्द्धनस्य [४२२]'ओलसिंह' ताम्रलेखाच्च स्पष्टतः यत् ज्ञायते तत् प्रमाणयोग्यं मन्यते । एतन्मूलरूपेण सम्प्रति उत्कलदेशस्य रणपुरदुर्गस्थ मैनाकपर्वते मणिनागपर्वते वा आराध्यमणिनागेश्वरः विराजते इति [४२३]मिश्रमहोदयानामभिमत-ग्रहणीयमेव । प्राक्कालिकशवरसभ्यतायां नागपूजायाः प्रचलनमासी-दित्यतः क्रमविकाशफलेन मणिनागेश्वरः अधुना बलभद्ररूपेण श्रीजगन्नाथेन सह पूजितो भवतीति तैः [४२४]मिश्रपादैरपि प्रतिपादितम् ।

---

blended with the Serpent Cult of the Nagas, so much so that we associate the serpent with murugan cult now a days.

- Indian Culture- Vol-XV, No. 1-4; p.98.

४२०. जगन्नाथ चेतनार उद्भव ओ विकाश- पृ०- १२९ ।

४२१. O.H.R.J., Vol-II, pp. 31-46.

४२२. अम्बिका मणि नागेश्वर भट्टारकाद्य मैत्रायणायच्छात्र ।
ब्राह्मणानाम्प्रतिपादितस्तदेषां समचितान् ताम्रपट्टकान् ॥
We granted a village named Kumvarka Sunkhataka attached to this Vishaya District of ....lam-kshetra, in favour of Ambika-Maninageswar Bhattaraka, inorder to increase our merit (Dharma) through the feet of Sri Parama Bhattaraka (The god) as long as the existence of the moon and the sun by (issuing this) copperplate.

-O.H.R.J., Vol-II, Nol, pp. 32-33.

४२३. That God is called maninageswar and was probably installed on the modern Mainaka or maninaga mountain in Ranapur in Puri district, not for from Kanas and Olasingh where these copperplates were discoverd, there is a mountain called maninaga in the estate of Ranapur on which there is a temple of maninaga.

- The Cult of Jagannatha, p.14.

४२४. The worship of Naga is said to have originated among the

इतः पूर्वमुपस्थापिते राज्ञः शुभकरदेवस्य नेउलपुरदानपत्रसन्दर्भे दानग्रहीतोः ब्राह्मणयोः पुरुषोत्तमः बलभद्रः चेति नामोद्वयोल्लिखितत्वात् तदानीन्तनकाले ततः पूर्वं च बलदेवः प्रसिद्धदेवः आसीदिति कथयितुं शक्यते। अधुनातनवालेश्वरमण्डलान्तर्गत-रेमुणानामधेये ग्रामे या बलदेवमूर्त्तिः प्रपूजिता भवति सैव एतादृशक्रमविकाशफलेन उद्भूता जाता।

जगन्नाथबलभद्रसुभद्राः बौद्धधर्मस्य बुद्धसंघधर्मरूपेण बौद्धत्रिरत्नेन सह यथाक्रमं कल्प्यन्ते [४२५]विद्वद्भिः। अशोकस्य राजत्वसमये बौद्धधर्मेण दीक्षितैः उत्कलीयशवरैः पुरीक्षेत्रे बौद्धस्तूपः पूजितः आसीदिति महतावपादैः इतः पूर्वं प्रतिपादितम्। तन्त्रप्रभावितबौद्धधर्मे श्यामादेवी-सुभद्रा-हयकर्णा-खगानना-महाभैरवा-वायुवेगाप्रभृतिभिः शक्तिभिः साकं क्रमानुसारं सुभद्र-वज्रप्रभ-महाभैरव-विरुपाक्ष-वज्रभैरव-महावीरप्रभृतीनां पुरुषदेवानां नामोद्धारं कृत्वा साहुमहाभागैः [४२६]सुभद्रेण सह सुभद्रायाः तथा च महाभैरवप्रभृतीनां शिवपर्यायवाचिनां सुभद्रया साकं सम्पर्कं कल्पयितुं शक्यते यतः शिवत्वेन इतः प्राक् बलभद्रस्य प्रसिद्धिः अस्ति एव। कुलपतिभिः [४२७]प्रह्लादप्रधानमहानुभवैः अपि तथा मतं प्रतिपाद्य शिवत्वेन बलभद्रस्य तथा च शिवानीत्वेन सुभद्रायाः सम्पर्कः कल्पितः। श्यामादेवी साम्प्रतं श्यामाकालीरूपेण तान्त्रिकरीत्या अत्र पुरीक्षेत्रे पूजिता भवति।

---

aboriginal tribes, and in the Brahmanical age it was accepted by the Hindus as Balabhadra, an incarnation of Sesa or Anantanaga........... So it can be inferred that in the country of Toshali the image of Maninaga was the popular Rastradevata which in course of time come to be regard as Baladeva.

- Ibid, p.15.

४२५. जगन्नाथचेतनार उद्भव ओ विकाश - पृ०- १६० ।

४२६. तत्रैव - पृ०- १६१ ।

४२७. बौद्धपरम्परारे सुभद्रा -प्रह्लाद प्रधान - 'पौरुष' पञ्चदशवर्ष, प्रथमसंख्या- पृ०- ८-९ ।

अनन्तरं विद्वांसः ब्राह्मण्यधर्मे श्रीजगन्नाथधर्मस्य अन्तर्भावं कृत्वा कृष्णवासुदेवे श्रीजगन्नाथं, सङ्कर्षणे श्रीबलभद्रं तथा च एकानंशायां सुभद्रां कल्पयन्ति । घसुण्डिशिलालेखात् खीष्टपूर्वद्वितीयशतकात्पूर्वम् उत्तरपश्चिमभारते भागवतधर्मः सङ्कर्षणवासुदेवौ केन्द्रीकृत्य प्रचलितः आसीदिति [४२८]ज्ञायते । नानाघाटशिलालेखे अन्येषां देवानां नामभिः सह सङ्कर्षणवासुदेवयोः नामोल्लेखः दृश्यते । ततः दक्षिणभारते तदानीं भागवतधर्मः प्रसारितः इति [४२९]ज्ञायते । क्रमशः एषा एव भगवच्चेतना दक्षिणपूर्वभारते [४३०]प्रसारिता । नाशिकगुम्फाशिलालेखे रामकेशवयोः उपासना प्रसिद्धा दृश्यते । तावेव रामकेशवौ यथाक्रमं सङ्कर्षणवासुदेवौ इति सुस्पष्टमितिहासात् [४३१]ज्ञायते । पञ्चमशताब्द्यां रचितायां बृहत्संहितायां वराहमिहिरेण देवतात्रये बलदेवस्य नामोल्लेखः कृतः । ततः परं वासुदेवः क्रमशः उत्कलेषु जगन्नाथरूपेण परिचितो जातः । तस्य पार्श्वे विद्यमाना देवी एव ततः सम्भुता शक्तिरिति [४३२]श्रीमद्भागवतं

---

४२८. (क) जगन्नाथचेतनार उद्भव ओ विकाश - पृ०- १६२ ।

(ख) We now come to second century B.C. Sankarsana appears along with his brother in this inscription and jointly are addressed as 'Bhagavata' (the Supreme God).

-Vaishnavism in Orissa, p.4.

४२९. The names of Sankarsana and Vasudeva appear along with other deities. This inscription of the second or first century B.C. shows that the Bhagavata religion had spread to the south.

-Vaishnavism in Orissa, p.4.

४३०. Gradually the Cult found its way into South-Eastern India. The Chinastone inscription of the time of Yajnasri Satakarni shows that the faith flourished in the Kistna district in the second century A.D. -Early History of the Vaishnav Sect.

-R.C. Roychoudhury, p.180.

४३१. The Nasik Cave Inscription, p.60,

Epigraphica Indica Vol-VII

४३२. शेषं च मत्कलां सूक्ष्मांश्रिदेवी महाश्रयाम् ।

-श्रीमद्भागवतपुराणे- ८/४/२० ।

प्रस्तौति । न केवलमेतदपि च वसुदेवदेवक्योः [४३३]पुत्ररूपेण हरिसङ्कर्षणयोः परिचयेन सह दुष्टदलननिमित्तं कलियुगे तयोः विराजमानत्वं [४३४]सूच्यते तत्र । अतएव जयदेवगोस्वामिकृत-गीतगोविन्दकाव्ये[४३५] वर्णितदशावतारमध्ये अन्तर्भुक्तस्य [४३६]बलरामहलधरस्य, येन् शिरसि भूमण्डलं धार्यते, पुराणतथ्यानुसारं कृष्णात् आद्योद्भवत्वात् तस्य ज्येष्ठभ्रातृत्वं युज्यते एव । तयोर्मध्ये न केवलमभेदाभेदसम्पर्कः[४३७] अपि च आधाराधेयभावः

---

४३३. कीर्त्तिमन्तं सुषेणं च भद्रसेनमुदारधीः ।
ऋजु समर्दनं भद्रं सङ्कर्षणं महीश्वरम् ॥
अष्टमस्तु तयोरासीत् स्वयमेव हरिः किल ।
सुभद्रा च महाभागा तव राजन् पितामही ॥
- श्रीमद्भागवतपुराणे - ९/२४/५४-५५ ।

४३४. सदा सङ्कर्षणश्चक्री भगवान् मधुसूदनः ।
कलौ जनिष्यमाणानां दुःखशोकतमोनुदम् ॥
-तत्रैव- ९/२४/६०-६१ ।

४३५. बहसि वपुषि विशदे वसनं जलदाभम् ।
हलहतिभीतिमिलित यमुनाभम् ॥
केशव धृतहलधररूप जयजगदीश हरे ॥
- जयदेवकृतदशावतारस्तोत्रे - ८ ।

४३६. (क) भूमण्डलं सर्षपायति यस्य मूर्ध्नि ।
तस्मै नमो भगवतेऽस्तु सहस्रमूर्ध्ने ॥
- श्रीमद्भागवतपुराणे- ६/१६/४८ ।

(ख) विभर्त्ति येन ब्रह्माण्डं बलेन महताविभूः ।
तं बलं नागराजानां फणा सप्तकमण्डितम् ॥
- स्कन्दपुराणे उत्कलखण्डे- ५/५९-६० ।

४३७. (क) न भेदो विद्यते किञ्चिन्मध्ये तद्रामकृष्णयोः ।
एकगर्भसम्भवत्वात् यदि चेज्जन्मना पृथक् ॥
-तत्रैव- १६/४४ ।

(ख) न भेदोऽस्तीह को विप्राः कृष्णस्य च बलस्य च ।
एकगर्भ प्रसूतत्वात् व्यवहारोऽथ लौकिकः ॥
-तत्रैव- १९/२३ ।

[४३८]कल्पितोऽस्ति। अधिकन्तु स्वतन्त्रतया बलभद्रस्य या वर्णना [४३९]ब्रह्मपुराणे प्राप्यते सैव चमत्कारमयी । लिङ्गशब्देन सह लाङ्गल-लगुड़-लकुलप्रभृतिशब्दानां सम्पर्कं प्रकल्प्य कुलपतिभिः [४४०]श्रीमत्प्रधानैः बलभद्रः शिवः इति यत् प्रतिपादितं तत् वस्तुतः [४४१]लिङ्गपुराण[४४२]वायुपुराणयोः अनुसारं युक्तिसङ्गतम् । तत्रापि शिवविष्णोर्मध्ये [४४३]अभेदत्वं कल्पितमस्ति । [४४४]ब्रह्मपुराणे स्वयं

---

४३८. यथा भिन्नत्वेन् भेदश्चनन्त वासुदेवयोः ।
आधारोधेयः सम्बन्धात् भिन्नत्वं न प्रतीयते ॥

- ब्रह्मपुराणे- ५०/४४ ।

४३९. गौराङ्गक्षीणवर्णाभं द्वितीयं स्वस्तिकाङ्कितम् ।
लाङ्गलास्त्रधरं देवमनन्ताख्यं महाबलम् ॥
देवदानवगन्धर्वं यक्षविद्याधरोरगैः ।
न विज्ञातो हि तस्यान्तस्तेनानन्त इतिं स्मृतः ॥

- तत्रैव- ५०/४५-४६ ।

४४०. रुद्रबलदेव - प्रह्लादप्रधानः, साहित्यायन- पृ०पृ०- ७-८ ।

४४१. आद्ये श्वेतः कलौ रुद्रः सुतारामदनस्तथा ।
सुहोत्रः कङ्कणश्चैव लोकाक्षिर्मनुसत्तमः ।
जटामाल्योऽट्टहासश्च दारुको लाङ्गली तथा ॥

- लिङ्गपुराणे- ७/३३ ।

४४२. नाम्ना वै लाङ्गली भीमो यत्र देवाः सवासवाः ।
द्रक्ष्यन्ति मां कलौ तस्मिन्नवतीर्णं हलायुधम् ॥

-वायुपुराणे- २३/१८७ ।

४४३. (क) स एव जगतां कालः पाताले च व्यवस्थितम् ।
विष्णोर्दिव्यः गुरोर्मूर्त्तिर्दिव्य साक्षाद् हलायुधः ॥

- लिङ्गपुराणे- ४९/६५ ।

(ख) यो रुद्रः स स्वयं विष्णुर्यो विष्णुः स महेश्वरः ।
उभयोरन्तरं नास्ति पवनाकाशयोरिव ॥

-ब्रह्मपुराणे- ५६/६० ।

४४४. सङ्कर्षणं स्वमन्त्रेण भक्त्या पूज्य प्रसादयेत् ॥
नमस्ते हलधृग्राम नमस्ते मुसलायुधः ।
नमस्ते रेवतीकान्त नमस्ते भक्तवत्सलः ॥

ब्रह्मणा सङ्कर्षणरूपिबलभद्रस्य यादृशं वर्णनं कृतम् ततः शिवबलभद्रयोर्मध्ये अभेदत्वं स्वतः ज्ञायते ।

यद्वा भवतु शिवस्य भूषणं यः नागः तस्य फणामुकुटं बलभद्रस्य मस्तके शोभते, तथा च आदिवासिनः नागदेवतां पूजयन्तिस्म इति कृत्वा बलभद्र-शिवयोर्मध्ये भेदो नास्तीति प्रतिपादकानां [४४५]श्रीमत्प्रधानानां युक्त्यनुसारं बलभद्रः आदिवासिजनैः अवश्यमेव बहुकालात् पूर्वं पूजितः आसीदिति नास्ति संशयलेशः ।

उत्कलेषु प्रथमतया बलभद्रसङ्कर्षणः शिवरूपेण तथा च सुभद्रा दुर्गाशक्तिरूपेण पूजिते आस्ताम् इति [४४६]गयाचरणत्रिपाठी-महोदयैः यत् उल्लिखितं तत् समीचीनम् इति तर्कयितुं शक्यते । विष्णुरूपेण श्रीजगन्नाथस्य प्रसिद्ध्यनन्तरं वैष्णवधर्मस्य प्राधान्यात् शिवः बलराम-बलदेव-बलभद्रत्वेन, दुर्गा-सुभद्राभद्रात्वेन च प्रसिद्धिं प्राप्तवत्यौ । क्रमशः जगन्नाथबलभद्रयोर्मध्ये भगिनीत्वं प्राप्य सुभद्रावैष्णव-देवतात्वेन पञ्चरात्रपद्धत्या पूजिता अभवत् । भक्तजनाः अधुना तत्क्षेत्रे लाङ्गलधरं बलभद्रं स्तुवन्ति एवं यथा-

हलापानफलेन नेत्रयुगलं मन्दररागाश्रितम् ।
पाणौ शाणितलाङ्गलं समूषलं जेतुं रिपुन् सङ्गरे ॥

नमस्ते बलिनां श्रेष्ठ नमस्ते धरणीधर ।
प्रलम्बारे नमस्तेऽस्तु त्राहि मां कृष्णपूर्वजः ॥
नीलवस्त्रधरं देवं फणाविकटमस्तकम् ।
महाबलं हलधरं कुण्डलैकविभूषितम् ॥

- ब्रह्मपुराणे- ५७/२१-२५ ।

४४५. रुद्रबलदेव- प्रह्लादप्रधान, साहित्यायन- पृ०- १६ ।

४४६. And since Samkarsana is completely idential with Balabhadra, who as often referred to as an incarnation of the former, it was not difficult to introduce Siva at a certain stage as Balabhadra/Samkarsana i.e. as the elder brother of Krusna/Purusottama to satisfy the feeling of the Saivattis of Orissa and to impart the deity at Puri a more universal character.

-The Cult of Jagannatha and the Regional Tradition of Orissa, p.189.

आर्त्तानां सकलार्त्तिनाशनकरं श्रीशाग्रजं श्रीयुतम् ।
वन्दे श्रीबलभद्रदेवमतुलं श्वेताङ्गरूपं विभूम् ।। इति ।

सुभद्रातत्त्वम्-

श्रीजगन्नाथसंस्कृतौ सुभद्रायाः मूलतत्त्वं किम् ? कुतो वा श्रीजगन्नाथसंस्कृतौ सुभद्रयाः अन्तर्भावः जातः इत्यादिविषयः आलोचनीयः ।

ऐतिहासिकसिद्धान्तानुसारं सप्तमशताब्दीतः द्वादशशताब्दीं यावत् रचितेषु विभिन्नेषु ग्रन्थेषु शिलालेखेषु च जगन्नाथं विना न तत्र कुत्रचित् बलभद्रसुभद्रयोः नामोल्लेखो दृश्यते । तथापि सुभद्रायाः स्थितिः तदानीं नासीत् इति कथयितुं न शक्यते । तस्मिन्काले श्रीजगन्नाथदेवस्य प्राधान्येन अन्यमूर्त्तिविशिष्टानां देवानां पूजा गौणत्वेनासीत् इति सम्भाव्यते । एवं वा अनुमातुं शक्यते यत् यथा श्रीजगन्नाथः कालानुसारं विभिन्नसम्प्रदाये विभिन्नरूपेण पूजितो जातः तथैव सुभद्रासम्प्रदायविशेषेषु भिन्नभिन्नभावेन पूजिता आसीत् । सुभद्रायाः प्राक्परिचयः यदि 'श्रीः' भवेत् तर्हि श्रीरामानुजाचार्येण दीक्षित उपदिष्टश्च उत्कलीयराजा चोडगङ्गदेवः स्वनिर्मिते श्रीजगन्नाथमन्दिरे श्रीदेवीं लक्ष्मीदेवीं वा स्थापयामास इति तर्कयितुं शक्यते । लक्ष्मीनृसिंहावेव श्रीजगन्नाथसंस्कृतौ प्रथमतः उपास्यदेवाविति सा लक्ष्मीः सुभद्रेति मन्वन्ति युक्तिवादिनो [४४७]विद्वांसः । द्वादशशताब्द्यां लक्ष्मीः शक्तिरूपेण विवेचिता आसीत् । ततः परं चतुर्दशशताब्द्यां लक्ष्मीः सुभद्रात अभिन्ना इति प्रतिपादितम् । तदवसरे सुभद्रायाः प्रतिष्ठा तन्त्रप्रभावतः जाता । अन्यच्च भागवतधर्मसम्प्रदायस्य प्रभावात् यत् त्रिमूर्त्तितत्त्वं परिकल्पितं तदनुसारेण त्रयोदशशतके सुभद्राचेतनायाः सृष्टिर्जातेति १२२५ खीष्टाब्दे अनङ्गभीमदेवेन [४४८]खोदिताभिलेखात् ज्ञायते । शतकेऽस्मिन्

---

४४७. It is only the common people who differentiate between the two. Whenever and wherever Visnu is there in a form of male, laxmi is present there (in a female form.)
-The Cult of Jagannatha and the Regional Tradition in Orissa, p.55.

४४८. Epigraphica Indica, Vol-XXX, p.VIII, p.196.

निर्मिते कोणार्कमन्दिरे कृष्णशिवदुर्गामूर्त्तीनां यत् परिप्रकाशः विद्यते तत्र क्रमानुसारं जगन्नाथ-बलभद्र-सुभद्रादेवतानां परिचयोऽस्ति इति [४४९]ऐतिहासिकानां मतम् । किन्तु प्रत्नतात्त्विकानां मतानुसारं ज्ञायते यत् त्रयोदशशताब्द्यामपि सुभद्रायाः प्रचारः स्पष्टतया नासीत् । तथापि प्रथमभानुदेवस्य(१२६४-७८) अनन्तवासुदेवमन्दिरशिलालेखे[४५०] बलदेवकृष्ण(वासुदेव)सुभद्रादेवतानां नामोल्लेखः एकत्र विद्यते । अतः देवतात्रये सुभद्रायाः उपासना बहुकालात् पूर्वं प्रचलिता आसीत् इति कथयितुं युज्यते । आदिवासिजनपूजिता तानापेनुदेवता सुभद्रेति यत् पूर्वं प्रतिपादितं तत्र डॉ० काह्नुचरणमिश्राः[४५१] एकमताः न भवन्ति प्रत्युत ते शवरपूजिता स्तम्भेश्वरी देवी सुभद्रादेव्याः मूलरूपमिति प्रमाणयन्ति ।

४४९. O.H.R.J., Vol-III, p.62.

४५०. (क) The meaning of the last line of the records which speaks of the deities Halin (Balarama), Chakrin (Krishna Visnu) and Snbhadra, is difficult to determine. But the mention of these three deities, in connection with the Jagannatha temple at Puri in a record of the thirteenth century is interesting. A Bhubaneswar inscription of the same century bearing the date Saka 1200 (1278 A.D.) Staes how the Ganga princess Chandrika or Chandradevi, daughter of Vanu-I, built a temple of Visnu at Ekamra (Bhubaneswer) and decorated with diamonds and other ornaments Bala, Krishna and Subhadra (apparently installed in the said temple).

-Epigraphica Indica, Vol-XXX, p.VIII, 1954

-by D.C. Sarkar, p.199.

(ख) Line-4 : Go-charini gramakshatayi- uttapalinaivedy-arthanighrita-vi(nja)na dadhitamovala sahite- Line-5 : (ta)mdav-karartham Hali Chatri (kri) Su(su)bhadra Srikonchakau Karasya Nasyatih.

-Ibid, Inscription-2, p.202.

४५१. In between Dakshina Kosala and Kalinga there was an extensive forest kingdom, known as Mahakaotara in the time of Samudragupta. That country was under a royal family, whose members were described as "Stambheswari Padabhakta" or the devout worshippers at the feet of Goddess Stambheswari.

-The Cult of Jagannatha, p.13.

तेषां मतानुसारं दक्षिणकोशलकलिङ्गयोर्मध्ये महाकान्तारराज्ये शवरजातीयाः आदिवासिनः तदानीमेकं काष्ठस्तम्भं पूजयन्ति स्म । प्रथमतया सैव स्तम्भेश्वरी गृहदेवतात्वेन पूजिता आसीत् । परवर्त्तिनि काले राजवंशस्य इष्टदेवतात्वेन स्वीकृतिं प्राप्य सा स्तम्भेश्वरी राष्ट्रदेवतात्वेन प्रसिद्धा जाता । कलाहाण्डिमण्डलान्तर्गत-तेरासिङ्गग्रामादुपलब्धताम्रलेखात् ज्ञायते यत् चतुर्थपञ्चमशतकयोर्मध्ये राजा तुष्टिकरः देव्याः स्तम्भेश्वर्याः उपासकः आसीत् । तदानीं च स्तम्भेश्वरी भगवतीति ख्याता [४५२]आसीत् । ऐतिहासिक-दीनेशचन्द्रसरकारमहोदयानां मतानुसारमुत्कलप्रदेशस्य शुल्कीराजवंशस्य इष्टदेवता या स्तम्भेश्वरी सैव [४५३]शिवलिङ्गात् दृश्यमाना आसीत् । परन्तु [४५४]सत्यनारायणराजगुरुमहोदयाः स्तम्भेश्वरी या खलु शवराणामाराध्यदेवी आसीत् परवर्त्तिसमये सैव सुभद्रेति नामधारणपूर्वकं ब्राह्मणानां पृष्ठपोषकतां प्राप्य समग्रेऽस्मिन् उत्कप्रदेशे

---

४५२. (क) O.H.R.J., Vol-V, p.63.

(ख) A Copperplate inscription disconered in Terasingha (kalahandi district) discloses that about the 4th or 5th century A.D., there was a local king named Tustikara who was a worshipper of Stambheswari. This deity is called Bhagavati in the copperplate grant.

-The Cult of Jagannatha pp.13-14.

४५३. Verse No.1 of our inscription found in most of the Sulkin records, is an adoration to the God Girisa, i.e. Siva, while verse 2-3 introduce King Ranastambha of the Sulkin family favoured by the goddess Stambhaswari, as having constructed same temples probably for the God Sadasiva.

-Puri plate of Kulastambha : by D.C. Sarkar

-Epigraphica Indica, Vol-XXIX, 1951-52 pp.166-167.

४५४. According to S.N.Rajguru it is an aboriginal goddess which was subsequently taken by Brahmanas. In this connection Rajaguru says "In every village of these hill tribes we find one or two wooden pillars small in size, and worshipped by villagers in ceremonial occasions.

-The Cult of Jagannatha, p.14.

पूजिता जातेति प्रतिपादयन्ति । [४५५]काह्नुचरणमिश्रमहोदयानां मतानुसारं पश्चिमोत्कलेषु पूजिता स्तम्भेश्वरी सुभद्रारूपेण क्रमशः अखण्डोत्कलेषु राष्ट्रदेवतात्वेन पूजिता जाता । किन्तु उत्कलेषु बौद्धधर्मस्य प्रसारानन्तरं महायानसम्प्रदायविशिष्टभक्ताः तद्धर्मस्य रत्नत्रितयस्य स्थाने मनुष्याकृतिविशिष्टदेवतामूर्त्तित्रयं प्रकल्प्य तत्र धर्मरत्नं सुभद्रां स्वीकृतवन्तः इति [४५६]महताबमहोदयाः मन्वन्ति । अधिकन्तु [४५७]बौद्धधर्मग्रन्थेषु विभिन्नमण्डलेषु विशेषतः सम्बरमण्डले, षट्चक्रवर्त्तिमण्डले, कालचक्रमण्डले च सुभद्रादेव्याः रूपवर्णगुणादिविषये वर्णना उपलभ्यते । कालचक्रमण्डलस्य वाङ्मण्डले नैर्ऋतकोणस्य पद्मकर्णिकायाः अष्टमदलस्था सुभद्रा चतुर्भुजा, त्रिनेत्रा, रक्तवर्णा, ललितासने उपविष्टा, षट्चक्रमण्डले सुभद्रा धवलवर्णा, द्विभुजा, त्रिनेत्रा, कृष्णवर्णजटामुकुटा, हस्ते पद्ममुद्राधारिणी, वज्रप्रभदेवस्य शक्तिस्वरूपा चेति । किन्तु उपलब्धे पालवंशराजत्वकालीनताम्रफलके (यत् खलु ब्रिटिशसंग्रहालये संरक्षितमस्ति) कृष्णबलरामयोर्मध्ये एकानंशादेव्याः या मूर्त्तिः अङ्किता सा पद्मासनस्था, द्विभुजा, दक्षिणहस्ते दर्पणधारिणी पार्वत्याः गौर्य्याः वा

---

४५५. It is not improbable that after the downfall of Bailodbhavas, when the countries of Kongoda and Tosali were ruled by the Bhauma-kars, the Gods Purusottama and Balabhadra and the goddess Stambheswari might have been worshipped as the Rastradevatas in the newly formed Kingdom. This seems to have been one of the main factors in the evolution of the image type of Purusottama-Jagannatha which comprised where separate icons of Jagannatha, Balabhadra and Subhadra.

-Ibid, p.15.

४५६. Of the three images Jagannatha was considered to stand for Buddha of Buddhism, Dharma in Buddhism believed to be a foxmale, so one of the images was supposed to be a female. x x x x x The Savaras accordingly treated two of the images as brothers and third as the sister.

-The History of Orissa, Vol-II, p.521.

४५७. यागावली - अभयशङ्करगुप्त ।

मूर्त्तिस्वरूपा । साम्प्रतं विराजितमूर्त्या साकं तस्याः न किञ्चित् साम्यमस्ति । [४५८]प्रह्लादप्रधानमहोदयानां मतानुसारं सुभद्रादेवी बलभद्रदेवेन साकं समन्विता । यदि बलभद्रः सुभद्रः शिवो वा भवेत् तर्हि सुभद्रा गौरी भवानी दुर्गा वेति कथयितुं शक्यते । सम्बरमण्डले वर्णिता सुभद्रा बलभद्रस्य शक्तिरूपा । [४५९]प्रभातमुखार्जीमहोदयाना-मभिमतानुसारं मत्स्य-ब्रह्माण्ड-विष्णु-वायुप्रभृतिषु पुराणेषु सुभद्रादेवीविषये विचाराभावात् पञ्चमशताब्द्यां वराहमिहिरेण लिखित[४६०]बृहत्संहितायाम् एकानंशादेव्याः वर्णनप्रसङ्गात् सैव एकानंशा सुभद्रायाः मूलरूपमस्ति स्वीकर्त्तुं युज्यते ।

गुप्तकालीनवैष्णवधर्मे यदा शक्तिवादस्याभ्युदयो जातः तदा एकानंशा शक्तिस्वरूपिणी जाता । सांख्यदर्शनस्य पुरुषप्रकृत्यौ भित्तीकृत्य अवतारवादे यदा शक्तिः संयोजिताः तदा शक्तिस्वरूपा एकानंशा कृष्णबलदेवयोर्मध्ये गृहीता जाता । ततः परवर्त्तिनि काले यदा कृष्णबलदेवौ जगन्नाथबलभद्ररूपेण वैष्णवधर्मे गृहीतौ जातौ तदा शक्तिरूपा एकानंशा सुभद्रारूपेण प्रसिद्धिं गता[४६१] । अभिमतेनानेन

---

४५८. बौद्धपरम्परारे सुभद्रा - पौरुष-१९८१, जुलाई संख्या- पृ०- १० ।

४५९. More difficult is the attempt to determine the origin of Subhadra worship. Subhadra is not mentioned in the early inscriptions or Puranas like Matsya, Brahmanda, Vishnu or Vayu. x x x x x These Puranas were composed long after the fourth century A.D. Varahmihiras reference to the images of "Ekanamsa" standing between the images of Balabhadra and Krishna, seem to indicate the conception of Subhadra in making.

-Vaishnavism in Orissa, p.7.

४६०. एकानंशा कार्या देवी बलदेव कृष्णयोर्मध्ये ।
कटिसंस्थितवामकरा सरोजमितरेण चोद्वहन्ती ॥

- बृहत्संहितायाम्- ५८/३६ ।

४६१. Subhadra seems to have been introduced as the Sakti of the Vasudeva-Krishna. Sakti conception was an important feature of Guptan Vaishnavism and received impetes from the Samkhya doctrine of "Purusa" and "Prakriti".

-Vaishnavism in Orissa, p.7.

एकमताः भूत्वा[४६२]वानार्जिमहोदयाः भुवनेश्वरस्य अनन्तवासुदेवमन्दिरे विराजितां सुभद्राम् एकानंशामिति निरूपयन्ति । किन्तु[४६३]परमानन्दाचार्यमहोदयैः प्रकाशिते भुवनेश्वरशिलालेखे अनन्तवासुदेवमन्दिरे बलभद्रकृष्णयोर्मध्ये सुभद्रायाः स्पष्टमुल्लेखनात् एकानंशा सुभद्रा इति कथने दृश्यते महान् वादः । अभिलेखस्यास्य यदि साधुः पाठः जातः तर्हि एकानंशा परवर्त्तिनि युगे सुभद्रारूपेण प्रसिद्धिं गता इति कथयितुं पार्यते ।

सर्वतन्त्रस्वतन्त्रैः[४६४]उत्कलीयकवि सारलादासैः सुभद्रायां ब्रह्म आरोप्य देवतात्रयस्य प्रतिष्ठा विस्तारिता ।[४६५]अच्युतानन्ददास-[४६६]प्रमुखैरपि इत्थं प्रतिपादितम् । अधिकन्तु[४६७]स्थलविशेषे ब्रह्मा अभिशापं प्राप्य सुभद्रारूपेण नीलाचले विराजते इति तत्र उत्कलीयानामस्ति महान् विश्वासः । तथापि विश्वासस्यास्य मूलं चिन्त्यमेव । यद्वा भवतु त्रिमूर्त्तिकल्पनाय द्वादशत्रयोदशशतकयोर्मध्ये एकानंशा सुभद्रात्वेन गृहीता अभूत् इति ऐतिहासिकानामभिमतानुसारं[४६८] कथयितुं युज्यते ।

पुराणेषु सुभद्राचेतना भिन्ना प्रतिपादिता अस्ति । विष्णुमूर्त्तिनिर्माणप्रसङ्गे जगन्नाथबलभद्राभ्यां सह भगिन्याः सुभद्रादेव्याः सुशोभनमूर्त्तिनिर्माणनिमित्तं विश्वकर्मा इन्द्रद्युम्नेन निवेदितः इति

---

४६२. Development of Hindu Iconography,
Dr.J.N.Banerjee, p.503.

४६३. मुकुटाद्यैरलङ्कारैः शक्त्या भक्त्या मुदान्विता ।
बलकृष्णसुभद्रां च श्रेयसेऽसावभूषयत् ॥
- भुवनेश्वरशिलालेख, परमानन्दआचार्यः, पृ०- ४५० ।

४६४. सारलादासमहाभारते आदिपर्वे, पृ०- १०५६ ।

४६५. मन्मथचन्द्रिका, अच्युतानन्ददास ।

४६६. प्रेमभक्तिब्रह्मगीता, यशोवन्तदास ।

४६७. विष्णुकेशरीपुराण, दिवाकरदास, पृ०- ४३ ।

४६८. Evolution of the Puri Triad -P.Mukherjee, p.53.
(U.U. Silver Jubuli Souvenir-1959)

[४६९]ब्रह्मपुराणादुपलभ्यते । तत्र या भगिनीभावना निहिता अस्ति तन्मूलकत्वेन [४७०]श्रीमद्भागवते सुभद्रायाः योगमायारूपेण महान् विचारः भगद्युपदेशप्रसङ्गे दृश्यते । अनन्तरं सुभद्रायाः । यादृशी मूर्त्तिः घटिता तत्र सकलं वैचित्र्यपूर्णं रूपलावण्यं चासीदिति बहुत्र [४७१]प्रतिपादितम् । यद्यपि साम्प्रतं श्रीजगन्नाथोपासनास्थलेषु जगन्नाथबलभद्रमूर्त्तिभ्यां सह भूजविहीना सुभद्रायाः मूर्त्तिः दृश्यते तथापि प्राक्तनकाले सैव चतुर्भुजधारिणी आसीदिति प्रस्तौति [४७२]कूर्मपुराणम् । [४७३]स्कन्दपुराणे

---

४६९. भगिनी वासुदेवस्य रुक्मवर्णा सुशोभनाम् ।
तृतीयां वै सुभद्रां च सर्वलक्षणलक्षिताम् ॥

- ब्रह्मपुराणे- ५०/४६-४७ ।

४७०. यदूनां निजनाथानां योगमायां समादिशत् ।
गच्छ देवी व्रजं भद्रे गोपगोभिरलङ्कृतम् ।
रोहिणी वसुदेवस्य भार्याऽऽस्ते नन्दगोकुले ॥
दुर्गेति भद्रकालीति विजया वैष्णवीति च ॥
कुमुदा चण्डिका कृष्णा माधवी कन्यकेति च ।
माया नारायणीशानी शारदेत्याम्बिकेति च ॥

- श्रीमद्भागवतपुराणे- १०/२/६, ७, ११, १२ ।

४७१. (क) तृतीयां स्वर्णवर्णाभां पद्मपत्रायतेक्षणाम् ।
विचित्रवस्त्रसंछन्नां हारकेयूरभूषिताम् ॥
विचित्राभरणोपेतां रत्नहारावलम्बिताम् ।
पीनोन्नतकुचां रम्यां विश्वकर्मा विनिर्ममे ॥

-ब्रह्मपुराणे, ५०/५३-५४ ।

(ख) सुभद्रा चारुवदना वराब्जाभयधारिणी ॥
लक्ष्मीः प्रादुर्बभुवेयं सर्वचैतन्यरूपिणी ।
इयं कृष्णावतारे हि रोहिणी गर्भसम्भवा ॥

- स्कन्दपुराणे उत्कलखण्डे- १९/१०-११ ।

४७२. चतुर्भुजा शङ्खचक्रपद्महस्ता शुभान्विता ।
कोटिसूर्यप्रतीकाशा मोहिनी सर्वदेहिनाम् ॥

- कूर्मपुराणे- १/३९ ।

४७३. (क) तयोर्मध्ये स्थितां लक्ष्मीं सुभद्रां भद्ररूपिणीम् ॥
सर्वदेवारणिं पापसागरोत्तारकारिणीम् ।

लावण्यमयीं मूर्त्तिं धारयन्ति येषा देवी सुभद्रा बलभद्रस्य भगिनीत्वेन यद्यपि प्रख्यातिं गता तथापि लक्ष्मीरूपेण प्रसिद्धा । न केवलमेतदपि च जगज्जननीरूपेण तस्याः स्तुतिः ब्रह्मणा कृतेति तत्र [474]प्रदर्शितम् । सुभद्रा अर्जुनस्य पत्नीत्वेन केवलं वर्णिता [475]गरुडपुराणे । सत्त्वरजस्तमस्त्रिगुणात्मिका प्रकृतिः निर्गुणपुरुषमाश्रित्य जगदिदं सृजतीति [476]श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन यथा उपदिष्टं तथानत् अत्र योगमाया सुभद्रा श्रीजगन्नाथेन सह सर्वं साधयतीति [477]कूर्मपुराणे विचारो दृश्यते । अवसरेऽस्मिन् तस्याः सुभद्रादेव्या ब्रह्मसंज्ञाप्राप्तौ भागत्रयकल्पना जाता, सत्त्वगुणसम्पन्न-

---

विकचाम्भोजवदनां वराब्जाभयधारिणीम् ॥
रूपलावण्यवसतिं शोभमानां प्रसाधनैः ।
कुङ्कुमारुणदेहां तां साक्षाल्लक्ष्मीमिवापराम् ॥

-स्कन्दपुराणे उत्कलखण्डे- १९/४५-४७ ।

(ख) लक्ष्मीः प्रादुर्बभूवेयं सर्वचैतन्यरूपिणी ।
इयं कृष्णावतारे हि रोहिणीगर्भसम्भवा ॥
भगिनी बलदेवस्येत्येषा पौराणिकी कथा ।
पुंरूपे स्त्रीस्वरूपेण लक्ष्मीः सर्वत्र तिष्ठति ॥

- तत्रैव- १९/११,१४ ।

४७४. जय भद्रे सुभद्रे त्वं सर्वेषां भद्रदायिनी ।
भद्राभद्रस्वरूपे त्वं भद्रकालि ! नमोऽस्तुते ॥
त्वं माता जगतां देवि पिता नारायणो हि सः ।
स्त्रीरूपं त्वं सर्वमेव पुंरूपो जगदीश्वरः ॥

- तत्रैव- २७/५७-५८ ।

४७५. अर्जुनो द्वारवत्यान्तु सुभद्रां प्राप्तवान् प्रियाम् ।
वासुदेवस्य भगिनीं मित्रं देवकीनन्दनम् ॥

-गरुडपुराणे- १४५/१६ ।

४७६. सत्त्वरजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देही देहिनमव्ययम् ॥

-श्रीमद्भगवद्गीतायाम्- १४/५ ।

४७७. इयं सा परमाशक्तिर्मन्मयी ब्रह्मरूपिणी ।
मायामयप्रियाऽनन्ता ययेदं मोहितं जगत् ॥

ब्रह्मरूपत्वेन[४७८] सह सृष्टिस्थितिविनाशकारणत्वमपि[४७९] तत्र च प्रकटितमस्ति । न केवलमेतदपि च विष्णुस्तुतिप्रसङ्गे महर्षिनारदेन उपदिष्टः सन् राजा इन्द्रद्युम्नः तथाभूतां देवीं सुभद्रां स्तौति स्म इति [४८०]स्कन्दपुराणे दृश्यते । एषा देवी सुभद्रा आदिशक्तिः योगमाया चेति । सृष्टेः प्रारम्भे परमात्मनः इच्छानुसारं यत् कम्पनं भवति तत्कम्पनं सगुणनिर्गुणयोरुभयोः शक्तेः संयोगेनैव सम्भवति । अतएव तत्र प्रकृतिपुरुषयोः मिलनात् यथार्थतः सुभद्रायाः आविर्भाव जातः इति । एषा देवी सुभद्रा भगवतः श्रीजगन्नाथस्य शक्तिरिति [४८१]बहुप्रसिद्धम् । तस्या देव्याः सुभद्रायाः पूजार्च्चनाद्वारैव परमसौभाग्यप्राप्तिः भवतीति [४८२]गरुडपुराणे वर्णितमस्ति। ब्रह्मपुराणे पञ्चतीर्थवर्णनाप्रसङ्गेऽपि सुभद्रायाः इत्थं भूतवर्णनेन सह कात्यायनीरूपेण प्रसिद्धिः परिलक्ष्यते। अधिकन्तु नारदपुराणे स्कन्दपुराणे च कात्यायनीस्वरूपेण एषा वर्णिता[४८३] अस्ति।

सैषा सर्वजगत्सूतिः प्रकृतिस्त्रिगुणात्मिका ।
प्रागेवमतः सञ्जाता श्रीकल्पे पद्मवासिनी ॥
-कूर्मपुराणे उत्तरार्द्धे-१/३४, ३८ ।

४७८. योगमाया महादेवी महामाया नमोऽस्तु ते ।
ईश्वरी अन्नभाजनं ब्रह्मस्थानस्थिते सदा ॥ - गायत्रीकल्पे ।

४७९. शिवशक्तिसमायोगः परमात्मेति निश्चितम् ।
परां शक्तेषु सञ्जाताचिच्छक्ति तदुद्भवाम् ॥
- शिवपुराणे पार्वतीखण्डे- २/१५ ।

४८०. यया सृजस्यत्सि जगन्ति नाथ वक्षःसरोजासनया स्वशक्त्या ।।
तां भद्ररूपां जगदाश्रयां ते देवार्णि पादयुगे नतोऽस्मि ॥
-स्कन्दपुराणे उत्कलखण्डे- २०/२२-२३ ।

४८१. तस्य शक्तिस्वरूपेयं भगिनी श्रीः प्रकीर्त्तिता ।
-तत्रैव- १९/१७ ।

४८२. बलभद्रं समभ्यर्च्च्य बलारोग्यमवाप्नुयात् ।
सुभद्रां पूजयित्वा तु सौभाग्यं परमाप्नुयात् ॥
- गरुडपुराणे- ८६/२६ ।

४८३. (क) ततः सम्पूज्य मन्त्रेण सुभद्रां भक्तवत्सलाम् ।
प्रसादयेत्ततोविप्राः प्रणिपत्य कृताञ्जलिः ॥

आध्यात्मिकदृष्ट्या शक्तिरूपेण विराजते एषा देवी सुभद्रा । [४८४]नीलाद्रिमहोदये एतद्विषये आलोचनमुपलभ्यते । [४८५]स्कन्दपुराणे प्रतिपादिते भिन्नेऽस्मिन् प्रतिमात्रये जगन्नाथविष्णोः स्थाने नृसिंहस्य वर्णना विद्यते । अतः जगन्नाथः न कृष्णः परमार्थतो विष्णुः, तथा च बलभद्रः न कृष्णस्य भ्राता तत्त्वतः कृषिबलानां देवता लाङ्गलीति, नागपूजकानां देवता वा । इयं च सुभद्रा भवनेश्वरीदेवीरूपेण विद्यमाना कृष्णबलरामयोः माहात्म्यं प्रकटयति। नीलाद्रिमहोदये सुभद्रायाः पूजा भुवनेश्वरी पूजापद्धत्यनुसारेण प्रतिपादिता वर्त्तते । अतएव सुभद्रा स्वयं भुवनेश्वरी इति स्वीकार्या । पुराणान्तरे[४८६] स्वयं ब्रह्मणा सुभद्रा स्त्रीत्वेन

नमस्ते सर्वगे देवि नमस्ते सुखसौख्यदे ।
त्राहि मां पद्मपत्राक्षि कात्यायनि नमोस्तु ते ॥
एवं प्रसाद्य तां देवीं जगद्धात्रीं जगद्धिताम् ।
बलदेवस्य भगिनीं सुभद्रां वरदां शिवाम् ॥

- ब्रह्मपुराणे- ५७/५७-५९ ।

(ख) त्वमेव लक्ष्मीर्गौरी च शची कात्यायनी तथा ॥
यच्च किञ्चित् क्वचिद्वस्तु सदसद्वाखिलात्मिके ।
तस्य सर्वस्य शक्तिस्त्वं स्तोतुं त्वां कस्तु शक्तिमान् ॥

- स्कन्दपुराणे उत्कलखण्डे- २७/५५-५६ ।

(ग) नारदपुराणे उत्तरभागे (५५/६७) अप्येवम् ।

४८४. नमो दिव्यैः महादेव्यै वैष्णव्यै च नमो नमः ।
ब्रह्माण्यै ब्रह्मरूपायैः शिवायै सततं नमः ॥
रुद्राण्यै रुद्ररूपायै कालरात्र्यै नमो नमः ।
वैष्णव्यैः विष्णुरूपायै महालक्ष्मै नमो नमः ॥
स्त्रीरुपिण्यै नमस्तेऽस्तु सुभद्रे त्वां नमाम्यहम् ।
साक्षादब्रह्मस्वरूपां त्वां जगदम्बे नमोऽस्तु ते ॥

-नीलाद्रिमहोदये ।

४८५. ऋग्वेदरूपी हलधृक् सामवेदो नृकेसरी ।
यजुर्मूर्त्तिस्त्वियं भद्रा चक्रमाथर्वणं स्मृतम् ॥

-स्कन्दपुराणे उत्कलखण्डे- २८/४४-४५ ।

४८६. एषा शुभानना नारी मत्प्रसादाद्भविष्यति ।
सुभद्रा नामविख्याता वीरसूः पतिवल्लभा ॥ इति ॥

वर्णिता । [४८७]सुभद्रा बलभद्रस्य भगिनीति प्रथिता । गरुडपुराणे[४८८] सा देवी बलभद्रस्य शक्तित्वेन निर्णीता । पुरुषोत्तममाहात्म्ये [४८९]रामकृष्णयोर्मध्ये कश्चन भेदो न दृश्यत इति यत् प्रतिपादितं ततः जगन्नाथबलभद्रयोभिन्नत्वात् सुभद्रा जगन्नाथस्य शक्तिरिति कथनेन नास्ति कश्चिद्दोषः । देवीशक्तेः मुख्यत्वग्रहणानन्तरं भारतवर्षे यानि चत्वारि तन्त्रपीठानि जातानि तेषु पुरुषोत्तमपुरीपीठस्य उड्डीयानपीठस्य वा प्राथम्यग्रहणेन तत्र प्रधानशक्त्या विमलया सह जगन्नाथस्य पूजार्च्चना प्रसिद्धा जातेति [४९०]कालिकापुराणात् प्रतीयते । श्रीमद्देवी-भागवतप्रतिपादनानुसारं[४९१] पुरुषोत्तमे विमलाजगन्नाथौ भैरवी-भैरवत्वेन प्रसिद्धौ । उभयोः पारस्परिकी सापेक्षता वर्त्तते । अधुनाऽपि श्रीमन्दिरे श्रीजगन्नाथनैवेद्यसमर्पणानन्तरं विमलायाः कृते तन्नैवेद्यसमर्पणं विना तस्य महाप्रसादत्वं न सम्भवति ।

विचार्यमेतत् यत् सुभद्रया साकं विमलायाः शाक्तसम्बन्धो वर्त्तते

---

४८७. भगिनी बलदेवस्येत्येषा पौराणिकी कथा ।
पुंरूपे स्त्रीस्वरूपेण लक्ष्मीः सर्वत्र तिष्ठति ॥
-स्कन्दपुराणे उत्कलखण्डे- १९/१४ ।

४८८. बलभद्रं येऽर्च्चयन्ति सुभद्रां बलभद्रकम् ।
ज्ञानं प्राप्य श्रियं पुत्रान् व्रजन्ति पुरुषोत्तमम् ॥
-गरुडपुराणे- ८६/१८ ।

४८९. यो वै विष्णुः स वै रामो यो रामः कृष्ण एव स ।
-स्कन्दपुराणे उत्कलखण्डे- २७/१५ ।

४९०. ओड्राख्यं प्रथमं पीठं द्वितीयं जालशैलकम् ।
तृतीयं पूर्णपीठं तु कामरूपं चतुर्थकम् ॥
ओड्रपीठं पश्चिमे तु तथैवोड्रेश्वरीं शिवाम् ।
कात्यायनीं जगन्नाथमोड्रेशं च प्रपूजयेत् ॥
-कालिकापुराणे- ६४/४३-४४ ।

४९१. उत्कले नाभिदेशे च विमला पुरुषोत्तमे ।
विमला भैरवी यत्र जगन्नाथस्तु भैरवः ॥
रसना उड्डदेशे च विमला पुरुषोत्तमे ।
तदुत्सिष्टं महापीठे जगन्नाथाख्यो भैरवः ॥
-श्रीमद्देवीभागवते ।

न वेति । तत्र इदमेव प्रतिभाति यत् श्रीजगन्नाथमन्दिरे तन्त्रपद्धत्या पूजासकलं विधीयते । अतः सुभद्रायाः अपि तथैव विधानं वर्त्तते । सुभद्राविमलयोः दुर्गारूपेण ख्यातिरस्ति । पुनश्च विमला श्रीजगन्नाथस्य मायाशक्तिस्वरूपा । बलभद्रस्य क्रियाशक्तिस्वरूपा सुभद्रा इच्छाशक्तिस्वरूपिणी वर्त्तते । विमलादेवी ॐ ह्रीं- इति मन्त्रेण पूजिता भवति । परन्तु सुभद्रा भुवनेश्वरीमन्त्रेण पूजिता भवति । स्थलविशेषे-

"विमला सा महादेवी जगन्नाथस्तु भैरवः ।"

इति उद्धरणं प्रदाय गणेशप्रसादपरिजामहाभागेन[४९२] सुभद्राविमलयोर्मध्ये अभिन्नत्वं प्रदर्शितम् । वस्तुतः श्रीजगन्नाथो भैरवः, विमलादेवी भैरवी । कालिकापुराणे[४९३] भैरवस्य ध्यानानुसारेण पृथक्तया वर्णनमस्ति । भैरवो विष्णुस्वरूपः चतुर्भुजविशिष्टः गदापद्मशक्तिधरः शुक्लवर्णश्च । शक्तिधारणात् तस्य शक्तिस्वरूपया विमलादेव्या सह सम्पर्को वर्त्तते । वस्तुतः बहुषु क्षेत्रेषु विमलासुभद्रयोः भैरवीरूपं वर्णितमस्ति । अतएव तन्त्रमतानुसारं सुभद्राविमलयोर्मध्ये अभिन्नता वर्त्तते । बौद्धधर्मस्य वज्रयानतन्त्रं यदा शैवशाक्तवैष्णवधर्मसम्बलितं जातं तदारभ्य सुभद्रा भैरवीति प्रसिद्धिं गता इति विद्वद्भिः[४९४] अनुमीयते ।

योगमार्गावलम्बिनः उत्कलीयाः सुभद्रां 'ह्रीं'-बीजस्य मूलदेवतारूपेण कल्पयन्ति । कविदिवाकरदासः[४९५]जगन्नाथचरितामृते काव्ये एतद्विषये स्पष्टं प्रतिपादयति । वैष्णवानां मते सुभद्रा राधास्वरूपिणी चिन्मयी शक्तिस्वरूपा च भवति । शिवदासमहोदयैः

---

४९२. तन्त्रदेवता जगन्नाथ- उत्कलप्रसङ्ग, रथयात्राविशेषांङ्के, १९७०, पृ-४६ ।

४९३. जपं च बलिदानं च अङ्गास्त्राणां प्रपूजनम् ।
मुद्रापूर्वा विसृष्टिश्च षट्कर्मेतत् प्रकीर्त्तितम् ॥
-कालिकापुराणे- ६४/६६ ।

४९४. Evolution of the Puri Triad -P.Mukherjee
(U.U. Silver Jubulee Souvenir-1959) p.52.

४९५. श्रीं-कार बलदेव जाण । सुभद्रा ह्रीं बीजप्रमाण ॥
राधिका संयुक्त अटन्ति । क्लीं बीज जगन्नाथमूर्त्ति ॥
-जगन्नाथचरितामृतौ- पृ०- १९७ ।

[496]राधारसामृतगीतायां विषयेऽस्मिन् समुपस्थापितम् । न केवलमेतदपि च अच्युतानन्ददासमहोदयाः [497]मन्मथचन्द्रिकायां सुभद्रां रासेश्वरी-राधात्वेन वर्णयन्ति । स्थलविशेषे वैष्णवानां मते सुभद्रा लक्ष्मीस्वरूपेण पूज्यते । श्रीक्षेत्रं महालक्ष्मीमयं पीठमिति [498]ज्ञानार्णवतन्त्रे वर्णितत्वात् युक्तिसङ्गतमेतन्मन्यते । इत्थं देवी सुभद्रा कालानुसारं बौद्धजैनशैवशाक्तानां धर्मानुसारेण देवीशक्तिरूपेण परिचिता जाता । मूर्तित्रयपरिकल्पनानुसारं सुभद्रा ब्रह्मत्वेन, बौद्धत्रिरत्नानुसारं धर्मत्वेन, शैवमतानुसारं पाशत्वेन, अन्ते च शक्तिसम्प्रदाये भैरवीत्वेन, महाकालीदुर्गात्वेन च पूजिता परिचिता च जाता ।

एवंप्रकारेणालोचनाप्रावल्यात् अद्यापि सुभद्रातत्त्वं रहस्यावृतम् । तस्य रहस्योद्घाटने तस्याः करुणां विना अस्मद्दृशानां कुतो वा सामर्थ्यमिति विषयसिद्धान्ते विद्वांसः शरणम् ।

सुदर्शनतत्त्वम्-

श्रीजगन्नाथसंस्कृतौ चतुर्द्धामूर्त्तिकल्पनायां जगन्नाथबलभद्र-सुभद्राभिः सह सुदर्शनस्य नितरामावश्यकताऽस्तीति । न कस्मिंश्चित् काले केनचित् नाङ्गीकर्त्तुं शक्यते । न केवलं श्रीजगन्नाथमन्दिरस्य रत्नसिंहासने अपि च सर्वत्रैव यत्र यत्र श्रीजगन्नाथोपासना प्रचलति तत्र तत्र श्रीजगन्नाथमूर्त्तेः प्रतिमायाः चित्रप्रतिमायाः वा वामपार्श्वे स्तम्भरूपेण सततं वर्त्तमानोऽयम् उपास्यशक्तिविशेषः सुदर्शन इति प्रसिद्धम् । कोऽयं सुदर्शनः ? श्रीजगन्नाथसंस्कृतौ कथमस्य अन्तर्भावः भ्रातृभगिनीत्वेन श्रीजगन्नाथबलभद्रसुभद्राणां वर्त्तमानावस्थायां तस्य एताभिः सह कीदृशः सम्पर्कः ? इत्यादिविषयेषु विदुषां मनसि संशयो भवेत् ।

---

४९६. ज्येष्ठ बलराम ये कनिष्ठ जगन्नाथ ।
येउ राधा सुभद्राटि नाम तार ख्यात ॥
- राधारसामृतगीता- शिवदास- पृ०- ५३ ।

४९७. सुभद्राटि रङ्गदेवी राधा रासेश्वरी ।
मध्यरे विजयमाता शून्यरूपधारी ॥ - मन्मथचन्द्रिका ।

४९८. महालक्ष्मीमयं पीठम् उड्डीयानमतः परम् ॥ - ज्ञानार्णवतन्त्रे ।

सुदर्शनस्य स्थापनाविषये न किमपि प्रतिष्ठिततथ्यं पुराणेषु समुपलभ्यते । केवलं त्रिधामूर्त्तितत्त्वेन सह चतुर्द्धातत्त्वस्य उद्रेकः सुदर्शनस्य सम्मिश्रणात् परवर्त्तिनि पुराणकाले जातः इति प्रतीयते । जगन्नाथबलभद्रसुभद्रेति मूर्त्तित्रयस्य यथाक्रमं विष्णुशिवशक्ति-सम्प्रदायकल्पनेन सह सौरसम्प्रदायीयत्वेन सुदर्शनस्य मिश्रणात् चतुर्द्धामूर्त्तिकल्पनं जातमिति यद्यपि आधुनिकविद्वद्भिः[४९९] प्रतिपाद्यते तथापि न तावत् तथाभूतः कश्चन अर्थः स्पष्टतया पुराणेषु कुत्रचित् समुपलभ्यते । केवलं कोटिसूर्यसमप्रभत्वेन सुदर्शनस्य वर्णनया साकं पुराणेषु[५००] स्थलविशेषे विष्णोः श्रीजगन्नाथस्य वा आयुधत्वेन परिकल्पनात् चतुर्द्धामूर्त्तिकल्पना यथार्थतां गतेति ज्ञायते । तत्र रत्नसिंहासने श्रीजगन्नाथदेवस्य वामपार्श्वे रक्तवर्णविशिष्टः शाखाग्रस्तम्भसदृशः सुदर्शनः विद्यमानोऽस्तीति [५०१]स्कन्दपुराणे

४९९. श्रीजगन्नाथचेतनार उद्भव ओ विकाश- पृ०- १५१ ।

५००. (क) चक्रं सुदर्शनं विष्णोश्चतुर्थं वपुरास्थितम् ॥
सुदर्शनं महाज्वाल कोटिसूर्यसमप्रभ ॥
अज्ञानतिमिरान्धानां वैकुण्ठाध्वप्रदर्शकः ।
नमस्ते नित्यविलसद्वैष्णवस्वनिकेतनम् ॥
अवार्यवीर्यं यद्रूपं विष्णोस्तत्प्रणमाम्यहम् ॥
-स्कन्दपुराणे उत्कलखण्डे- २७/६३-६७ ।

(ख) सुदर्शनं दैत्यबलस्य हन्तृ चक्राभिधं त्वां प्रणतः सुदर्शनम् ।
-तत्रैव- २०/२४ ।

(ग) दधत्सुदर्शनं धीमान् कराग्रे दीप्तमण्डलम् ।
-ब्रह्मपुराणे- ५९/७५ ।

(घ) नमः सुदर्शनायैव सहस्रादित्यवर्चसे ।
ज्वालामालाप्रदीप्ताय सहस्राराय चक्षुषे ॥
विष्णुरूपाय शान्ताय चायुधानां धराय च ।
विष्णुशस्त्राय चक्राय नमो भूयो नमो नमः ॥
-गरुडपुराणे- ३३/८,१४ ।

५०१. (क) दिव्यसिंहासनगतो बलभद्रसुदर्शनैः ॥
सुदर्शनं तु यच्चक्रं सदा विष्णोः करे स्थितम् ।
शाखाग्रस्तम्भमध्यस्थं तद्रूपं तत्तुरीयकम् ॥

पठ्यते। भगवता श्रीजगन्नाथेन सह सुदर्शनस्य निविडसम्पर्कः अस्तीति एतावता ज्ञायते । अर्वाचीनपुराणेषु कपिलसंहिता-नीलाद्रिमहोदयादिकमित्थं प्रतिपादयति ।

ऐतिहासिकानां मतानुसारमधुना दारुस्तम्भरूपेण वर्त्तमानः सुदर्शनः एव जगन्नाथादिमूर्त्तिनिर्माणस्य प्रतीकः प्रथमस्वरूपविशिष्टश्च। तस्मात् सुभद्रा, सुभद्रातः बलभद्र, बलभद्रतः जगन्नाथः इति सुदर्शनस्य क्रमपरिणतिः । अधुना प्रचलितरथयात्रायां रथेषु विराजमानार्थमागते जगन्नाथादिदेवताचतुष्टये प्रथमतया सुदर्शनदेवस्य रत्नसिंहासनात् बहिरागमनेन सह सुभद्रादेव्या साकमेकास्मिन्नेव रथे उपवेशनमेतदनु-रोधेन युक्तिं प्रस्तौति । अपिकन्तु ब्रह्मणः निराकारत्वात् काष्ठस्तम्भे यदि तस्य आरोपः क्रियते तर्हि नास्ति प्रायतः दोषः यतः 'सर्वं ब्रह्ममयं जगत्' इति । मूलबीजरूपेण एतदेव ज्ञायते यत् प्राक्कालिके युगे शवरजातीयैः मनुष्यैः वृक्षोपासना कृताऽऽसीदिति । परवर्त्तिनि काले क्रमशः वृक्षात् काष्ठस्तम्भेन विपरिणामात् तद्रूपस्य स्तम्भस्यैव पूजाप्रचलनं जातम् । अपरे केचन प्रमुखाः [५०२]विद्वांसः सुदर्शनं श्रीजगन्नाथस्य चलत्प्रतिमात्वेन प्रतिपादयन्ति । वस्तुगत्या अधुनाऽपि

रक्तं सुदर्शनं चक्रं सुभद्रां कुङ्कुमारुणाम् ।

-स्कन्दपुराणे उत्कलखण्डे- १९/८, १७, २१ ।

(ख) ददर्श विष्णोर्वामस्थां चक्रशाखाग्रनिर्मिताम् ।
बालार्कसदृशीं तीक्ष्णधारां तेजोमयीं द्विजाः ॥

-तत्रैव- १९/४८ ।

५०२. (क) The Sudarsan "good to look at" is the name of the most important weapon of Visnu, the Chakra (disc). The Puri Sudarsana bears no chakra and this extraordinary fact had to be explained by an extra legend. The wooden pole of 84 yavas (The distance between the middle joint) wrapped in cloth can thus not originally have been the "Calanti Pratima" of the early Jagannatha-Narasingha, icon, a function which is still represent in the fact, that at certain occasions Sudarsan only is carried out of the Temple.

-The Cult of Jagannatha and the Regional Tradition of Orissa, p.185.

एतत्परिलक्ष्यते श्रीजगन्नाथमन्दिरे यत् पर्वविशेषे श्रीजगन्नाथदेवस्य प्रतिनिधित्वेन सुसज्जितः सुदर्शनः श्रीमन्दिरात् बहिरानीयते । सुदर्शनः नरसिंहः नान्यः इति ५०३विदुषामतमपि सुरुचिरं प्राप्यते । नरसिंहस्य पूजामन्त्रेण सह सुदर्शनस्य पूजामन्त्रस्य सम्पर्कात् तेषां मतं न कदाचित् अप्रासङ्गिकं भवेत् । विष्णोः क्रोधसमये सुदर्शन एव संहारचक्ररूपेण व्यवह्रियते इति अन्येषां५०४ मतम् । सुदर्शनस्तु सूर्य एव पूज्यते यतः सुदर्शनस्य पूजामन्त्रः "ॐ सहस्रार हुं फट्" इति निर्णितम् । अतएव सूर्यस्य प्रतीकतया तथा च सौरोपासनायाः अङ्गीकरणेन सुदर्शनः चक्रस्वरूपः श्रीमन्दिरे सकलशक्तेराधारत्वेन विराजते । सुदर्शनः विपुल-शक्तिसम्बलितः । भगवत्कृतौ प्रधानसहायकत्वेन प्रमुखतमस्थानधृक् शोभनदर्शनोऽयं सुदर्शनः चतुर्द्धामूर्त्तिकल्पनायां कारणमेवेति नास्ति संशयलेश इति ।

पूजाविधिः-

श्रीजगन्नाथसंस्कृतेः आलोचनावसरे एतत्सम्पृक्तदेवतानां पूजाविधेरुपरि अवश्यमेव आलोकपातः करणीयः । भगवतः

(ख) It is not like a disc, but has headless, pillar like resembling that of Subhadra. Therefore, definitely he has been conceived here as a Puri form of God.

-The Lard of Visnu, p.13.

५०३. True to its original character. Sudarsana is still considered as Narasimha. In the pratistha text of Jagannatha Temple, Sudarsana is actually referred to as representing Narasimha. While introducing the mantras etc. For the consecration of the wooden log for Sudarsana, the text uses the expression "Nrsimha Pakse" (on case of Narasimha) thus obviously identifying Sudarsana with Narasimha.

-The Cult of Jagannatha and the Regional Tradition of Orissa, p.186.

५०४. It is generally believed that Sudarsana is the embodiment of Visnu's anger as it is his powerful weapon and devotion to Sudarsana is the worship of the abstract in accordance with the Pancaratra system of worship.

-The Land of Visnu, pp.12-13.

श्रीजगन्नाथदेवस्य यदि निराकारनिर्गुणत्वादि प्रतिपादितं तथापि तस्य स्वरूपकल्पनं जातमासीदिति पुराणवचनात्[५०५] प्रतीयते । अतः वैदिककालात्परं परंब्रह्मणः प्रकृतिविकृतिरूपद्वयस्य कल्पनानन्तरं विकृत्यवस्थायां साकाररूपेण श्रीजगन्नाथादिदेवानामाराधना जाता इति ज्ञायते । [५०६]मादलापाञ्जिप्रतिपादनानुसारम् अनङ्गभीमदेवस्य राजत्वकालादारभ्य श्रीजगन्नाथमन्दिरे श्रीजगन्नाथादिदेवानां पूजाविधिः प्रचलितः जातः । श्रीजगन्नाथसंस्कृतिः कालक्रमेण शैवशाक्त-गाणपत्यादिविभिन्नसम्प्रदायसम्बलिता इति बहुत्र अस्माभिः प्रतिपादितम् । एतद्विषये विदुषां कदाचित् संशयः स्यात् यत् जगन्नाथादिदेवतानां पूजाविधौ पूर्वसम्पृक्तानां देवतानां पूजासम्पर्कः अस्ति न वा ? वस्तुतः तत्र पूजाविधौ सम्पर्कः अस्ति । तत्र श्रीजगन्नाथः याभ्यां [५०७]दशाक्षरमन्त्रेण [५०८]अष्टादशाक्षरमन्त्रेण च पूज्यते तत्र गोपालकृष्णपूजामन्त्रस्य सम्पर्कः परिलक्ष्यते एव । बलभद्रदेवस्य सुभद्रादेव्याः च पूजामन्त्रौ यथाक्रमम् [५०९]एकादशाक्षरविशिष्टः [५१०]नवाक्षरविशिष्टश्च भवतः । तत्र यथाक्रमं वासुदेवभुवनेश्वर्योः सम्पर्कः परिलक्ष्यते । तत चतुर्द्धामूर्त्तिकल्पने सुदर्शनदेवस्यापि यः [५११]सप्ताक्षरविशिष्टः पूजामन्त्रः तत्र सूर्यपूजामन्त्रस्य सम्पर्कः । एते सर्वे मन्त्राः नीलाद्रिमहोदय-नीलाद्रिपूजाविधि-दुर्गोत्सवचन्द्रिकाप्रभृतिषु ग्रन्थेषु समुपलभ्यते । श्रीजगन्नाथदेवस्य पूजापद्धतौ वैदिक-तान्त्रिक-

---

५०५. प्रकृतिर्विकृतिस्तस्य द्वे रूपे परमात्मनः ।
अलक्ष्यं तस्य तद्रूपं प्रकृतिः सा प्रकीर्त्तिता ॥
साकारा विकृतिर्ज्ञेया तस्य सर्वं जगत्स्मृतम् ।
पूजाध्यानादिकं कर्त्तुं साकारस्यैव शक्यते ॥
- विष्णुधर्मोत्तरपुराणे, भागः-३, ४६/२-३ ।

५०६. मादलापाञ्जि, पृपृ०- ३२-३३ ।

५०७. ॐ गोपीजनवल्लभाय स्वाहा।

५०८. ॐ क्लीं कृष्णाय गोविन्दाय गोपीजनवल्लभाय नमः ।

५०९. ॐ नमो भगवते वासुदेवाय ।

५१०. ॐ ह्रीं भुवनेश्वर्यै नमः ।

५११. ॐ सहस्रार हुं फट् ।

पौराणिकानां मन्त्राणां प्रसिद्धिरस्ति । वैदिकपूजापद्धतेः प्रणवमन्त्रस्य प्रचलनं, तान्त्रिकपूजाविधेः बहुविधन्यासस्य प्रचलनं तथा च मुद्राबीजमन्त्राणां प्रचलनं, पौराणिकपद्धतेः ध्यानमन्त्रस्य प्रचलनं चात्र दरीदृश्यते । दारुब्रह्म तु प्रणवरूपीति [५१२]स्कन्दपुराणे तथा च नीलाद्रिमहोदये[५१३] उल्लिखितं वर्त्तते । अतएव मिश्रपूजापद्धत्या श्रीजगन्नाथादिमूर्त्तीनां पूजा भवति । [५१४]श्रीमद्भागवतपुराणम् अपि मिश्रपूजां प्रतिपादयति ।

श्रीजगन्नाथमन्दिरे प्रतिदिनं पूजकत्रयेण प्रातः मङ्गलारतितः अनन्तरं अवकाशस्नानादिकरणानन्तरं वल्लभ-मध्याह्नधूप-सन्ध्याकालीनारति-सन्ध्याधूप-बृहच्छृङ्गारवेशरचनादि सम्पाद्यते । ततः गीतगोविन्दपाठः देवदासीनृत्यात्परं श्रीमन्दिरस्य द्वारं रुद्धं भवति। मङ्गलारतिसमयेऽपि गीतगोविन्दस्य पाठः भवति । श्रीजगन्नाथदि-देवतानां प्रतिनिधिप्रतिमाः नानालङ्कारविमण्डिताः कृत्वा सेवकाः भक्तजनाश्च नगरे परिभ्रामयन्ति । प्रतिदिनं सन्ध्यासमये विविध-छन्दोवद्धभक्तिविज्ञप्तीनां गानं भवति । अतः इदं कथयितुं शक्यते यत् श्रीमन्दिरे मूर्त्तिपूजापद्धतिः हिन्दूराजकीयतायाः [५१५]द्योतका ।

५१२. इति स्तुत्वा सुरेशानं देवं प्रणवरूपिणम् ।
प्रणतः प्रणवं मन्त्रं जजापो पुरतो हरेः ।।
-स्कन्दपुराणे उत्कलखण्डे- ८/३४ ।

५१३. सर्ववेदेषु मन्त्रेषु नायको यः परीक्षितः ।
प्रणवः प्रणतानां तु भवार्णवे विदारणः ।
त्रिमात्रा सार्द्धमात्राश्च विन्दुनादः समन्वितः ।।
-नीलाद्रिमहोदये षष्ठाध्याये ।

५१४. (क) यात्रावलिविधानं च सर्ववार्षिकपर्वसु ।
वैदिकी तान्त्रिकी दीक्षा मदीयव्रतधारणम् ।।
- श्रीमद्भागवतपुराणे- ११/११/३७ ।

(ख) वैदिकस्तान्त्रिको मिश्र इति मे त्रिविधो मखः ।
त्रयाणामीप्सितेनैव विधिना मां समर्चयेत् ।।
- तत्रैव- ११/२७/७ ।

५१५. The whole routine of the evening worship is entertainment, in which dances are include. Formerly, many temples had,

पूजापद्धतौ वैदिकमन्त्राणामुपयोगः भवति । नैवेद्यसंस्कार-न्यासादौ च तान्त्रिकमन्त्रादीनां बहुलतया प्रयोगो दृश्यते । एतादृशी पूजाशैली अन्यत्र कुत्रचित् नोपलभ्यते । अहोऽस्य पूजामाहात्म्यं यत् पूजाकालेऽपि प्रधानपूजकः श्रीजगन्नाथभावनयाभिभूतो भूत्वा श्रीजगन्नाथं प्रत्यक्षीकरोति ।

ब्रह्मपुराणे वर्णितपूजापद्धतिः प्रायशोऽद्यापि श्रीजगन्नाथस्य पूजाविधिः भवति । अत्र सप्ताक्षरमन्त्रेण भगवान् श्रीजगन्नाथो पूज्यते । पूजकः प्रथमतः आसनशुद्ध्यादिपूर्वकं स्वकायं विशोध्य सप्ताक्षरमन्त्रं (ॐ नारायणाय नमः) पठेत् । तदनन्तरं करशुद्धिं कुर्यात् । अनन्तरं आत्मानं सर्वं च वासुदेवमयं ध्यात्वा प्रणवेन कराङ्गन्यासं विधाय मण्डलपूजापूर्वकमर्घ्यसंस्कारः अत्र क्रियते । 'ॐ नारायणाय फट्' इति मन्त्रेण जलसिञ्चनं कुर्यात् । तत्र सूर्यचन्द्राग्निप्रभृतीन् अष्टदलपद्मचक्रे स्थापयित्वा मण्डलस्य मध्यभागे विष्णुं स्मृत्वा स्थापयेत् । तदनन्तरं हृदये ॐकारस्य ध्यानं कृत्वा अष्टाक्षरमन्त्रविन्यासः क्रियते । द्वादशाक्षरमन्त्रेण सनातनदेवं यजेत । अष्टदलपद्मकर्णिकायां वह्निकोटि-सूर्यसमप्रभं चतुर्भुजं भगवन्तं ध्यात्वा आवाहनं कुर्यात् । ततः क्रमशः आवाहन-संस्थापनार्घ्य-पाद्य-मधुपर्काचमनीय-स्नान-वस्त्र-विलेपनोपवीतालङ्कार-धूप-दीप-नैवेद्योपचारार्थं [५१६]तत्तन्मन्त्रानु-च्चारयेत् । अनन्तरं दक्षिणपश्चिमोत्तरदिक्षु क्रमानुसारं वासुदेवं सङ्कर्षणं,

---

of course, dedicated women dancers. The gods also goal likes the kings for periodic excursions or visits, and even set out on campaigns. The God and Goddesses also wear customers and ornaments whichever are exactly like those of Hindu royalty.

-Hinduism, p.91.

५१६. आवाहनमन्त्रः- मीनरूपी वराहश्च नरसिंहोऽथ वामनः ।
आयातु देवो वरदो मम नारायणोऽग्रतः ॥
ॐ नमो नारायणाय ।

संस्थापनमन्त्रः- कर्णिकायां सुपीठेऽत्र पद्मकल्पितमासनम् ।
सर्वं सत्त्वहितार्थाय तिष्ठ त्वं मधुसूदनः ॥
ॐ नमो नारायणाय ।

प्रद्युम्नं, अनिरुद्धं च कोणेषु आग्नेये वराहं, नैर्ऋते नरसिंहं, वायव्ये माधवं, ऐशान्ये त्रिविक्रमं चाष्टाक्षरमन्त्रेण न्यसेत् । अग्रे गरुडं, वामपार्श्वे चक्रं, दक्षिणे शङ्खं च न्यसेत् । ततः चतुर्दिक्षु इन्द्रादिदेवान् तेषामस्त्राणि च पूजयेत् । एतत्सर्वं तान्त्रिकमन्त्रेण पूजयेत् ।

अर्घ्यमन्त्रः- ॐ त्रैलोक्यपतीनां पतये देवदेवाय
हृषीकेशाय विष्णवे नमः ॥
ॐ नमो नारायणाय ।

पाद्यमन्त्रः- ॐ पाद्यं पादयोर्देव पद्मनाभ सनातन ।
विष्णो कमलनाभाय गृहाण मधुसूदनः ॥
ॐ नमो नारायणाय ।

मधुपर्कमन्त्रः- मधुपर्कमहादेवब्रह्माद्यैः कल्पितं तव ।
मया निवेदितं भक्त्या गृहाण पुरुषोत्तम ॥
ॐ नमो नारायणाय ।

आचमनमन्त्रः- मन्दाकिन्याः सितवारि सर्वपापहरं शिवम् ।
गृहाणाऽऽचमनीयं त्वं मया भक्त्या निवेदितम् ॥
ॐ नमो नारायणाय ।

स्नानमन्त्रः- त्वमापः पृथिवी चैव ज्योतिस्त्वं वायुरेव च ।
लोकेश वृत्तिमात्रेण वारिणा स्नापयाम्यहम् ॥
ॐ नमो नारायणाय ।

वस्त्रमन्त्रः- देवतत्त्वसमायुक्त यज्ञवर्णसमन्वित ।
स्वर्णवर्णप्रभो देव वाससी तव केशव ॥
ॐ नमो नारायणाय ।

विलेपनमन्त्रः- शरीरं ते न जानामि चेष्टां चैव च केशव ।
मया निवेदितं गन्धं प्रतिगृह्य विलिप्यताम् ॥
ॐ नमो नारायणाय ।

उपवीतमन्त्रः- ऋग्यजुःसाममन्त्रेण त्रिवृतं पद्मयोनिना ।
सावित्री ग्रन्थिसंयुक्तमुपवीतं तवार्पये ॥
ॐ नमो नारायणाय ।

अलङ्कारमन्त्रः- दिव्यरत्नसमायुक्त वह्निभानुसमप्रभ ।
गात्राणि तव शोभन्तु सालङ्काराणि माधव ॥
ॐ नमो नारायणाय ।

नारदपुराणस्योत्तरभागे सप्तपञ्चाशदध्याये नारायणपूजाविधिः वर्णितोऽस्ति । ब्रह्मपुराणे वर्णितपूजाविधिः नारदपुराणवर्णितपूजा-विधिना सह समानः भवति । ब्रह्मपुराणे पूजाविधौ धूपदीप-नैवेद्यादिमन्त्रान् विहाय आवाहनासनार्घ्यपाद्यमधुपर्काचमनीयस्नान-वस्त्रविलेपनयज्ञोपवीतालङ्कारमन्त्राणामुल्लेखो वर्त्तते । नारदपुराणे मण्डलस्थापनविधिर्ध्यानादिव्यवस्था ब्रह्मपुराणविधिवत् वर्त्तते ।

स्कन्दपुराणस्य वैष्णवखण्डे पुरुषोत्तममाहात्म्ये त्रिंशत्तमाध्याये पञ्चतीर्थदर्शनप्रसङ्गे तीर्थानां देवपूजाविधानस्य च विषये उल्लेखोऽस्ति । ज्येष्ठस्नानविधानप्रसङ्गे उल्लिखितमस्ति यत् ज्येष्ठशुक्लदशम्यां प्रातरुत्थाय पञ्चतीर्थस्नानं कुर्यात् । मार्कण्डेयसरसि स्नात्वा तत्र शङ्करं दृष्ट्वा [५१७]अघमर्षणसूक्तेन स्तुत्वा तदनन्तरं न्यग्रोधसमीपं गत्वा तं स्तुत्वा[५१८] अनन्तरं पुरुषोत्तमदेवतागारं त्रिवारं प्रदक्षिणीकृत्य मन्त्रराजेन

धूपमन्त्रः- वनस्पतिरसो दिव्यो गन्धाढ्यं सुरभिश्च ते ।
मया निवेदितो भक्त्या धूपोऽयं प्रतिगृह्यताम् ॥
ॐ नमो नारायणाय ।

दीपमन्त्रः- सूर्यचन्द्रसमोज्योतिर्विद्युदग्न्योस्तथैव च ।
त्वमेव ज्योतिषां देव दीपोऽयं प्रतिगृह्यताम् ॥
ॐ नमो नारायणाय ।

नैवेद्यमन्त्रः- अन्नं चतुर्विधं चैव रसैः षड्भिः समन्वितम् ।
मया निवेदितं भक्त्या नैवेद्यं तव केशव ॥
ॐ नमो नारायणाय ।

५१७. नमः शिवाय शान्ताय सर्वपापहराय च ।
स्नानं करोमि देवेश मम नश्यतु पातकम् ॥
संसारसागरमग्नं पापग्रस्तमचेतनम् ।
त्राहि मां भगनेत्रघ्न त्रिपुरारे नमोऽस्तु ते ॥
-स्कन्दपुराणे उत्कलखण्डे- ३०/१४-१५ ।

५१८. अमरत्वं सदाकल्प विष्णोरायतनं महत् ।
न्यग्रोध हर मे पापं विष्णुरूप नमोऽस्तु ते ॥
नमोऽस्त्वव्यक्तरूपाय महाप्रलयस्थायिने ।
एकाश्रयाय जगतां कल्पवृक्षाय ते नमः ॥
- तत्रैव- ३०/२६-२७ ।

पुरुषसूक्तेन वा द्वादशाक्षरमन्त्रेण वा पूजयेत् । यः कश्चित् पञ्चोपचारविधिनाऽपि [५१९]स्तोत्रगानपूर्वक परमेश्वरश्रीजगन्नाथं पूजयेत्। ततः बलभद्रं शेषमन्त्रेण एकादशाक्षरमन्त्रेण एकाग्रचित्तेन पूजयेत्[५२०] । ततः सुभद्रां भुवनेश्वरीमन्त्रेण[५२१] पूजयेत् । तदनन्तरं समुद्रस्नाननिमित्तं पुरुषोत्तमस्य श्रीजगन्नाथस्य [५२२]अनुमतिं कामयेत् । समुद्रतटे उपविश्य करांघ्रिकं प्रक्षाल्य शुचिर्भूत्वा, प्राङ्मुखः आसीनोऽग्रतो मण्डलं लिखेत्। तत्र चतुर्द्वारं चतुः स्वस्तिककोणयुक्तम् अष्टदलपद्मं विलिख्य

---

५१९. जयदेव जगन्नाथ संसारार्णवतारकः ।
भक्तानुग्राहक सदा रक्ष मां पादयोर्नतम् ॥
जयकृष्ण जगन्नाथ जय सर्वाघनाशनम् ।
जयाशेष जगद्वन्द्य पादाम्भोज नमोऽस्तुते ॥
यतस्ते चरणाम्भोजं चतुर्वर्गैकसाधनम् ॥

-स्कन्दपुराणे उत्कलखण्डे- ३०/३६-३७,४७ ।

५२०. जयाखिल जगद्भारधारणश्रमवर्जित ।
तापत्रयविकर्षाय हलं कलयसे सदा ॥
प्रपन्नदीनत्राणाय स्फुटनेत्रसरोरुह ।
त्वमेवेश पराशेष कलुषक्षालनं प्रभुः ॥
प्रपन्नकरुणासिन्धो दीनबन्धो नमोऽस्तु ते ।
चराचरफणाग्रेण धृता येन वसुन्धरा ॥
मामुद्धरास्माद्दुष्पाराद्भवाम्भोधेरपारतः ।
परापराणां परम परमेश नमोऽस्तु ते ॥

-तत्रैव- ३०/५१-५४ ।

५२१. जय देवी महादेवी प्रसीद भवतारिणी ।
वक्षस्थलस्थितां विष्णोः शम्भोरर्द्धाङ्गधारिणीम् ॥
त्वमेकाशक्तिरतुला त्वां विना सोऽपि नेश्वरः ।
त्वां सर्व लोकजननी विष्णुमायां तपस्विनीम् ॥
सुभद्रां भद्ररूपां तां मूलभूतां नमाम्यहम् ॥

-तत्रैव- ३०/५६,५८,६०,६१ ।

५२२. नमस्ते भगवान् विष्णो जगद्व्यापि चराचर ।
निर्विघ्नं सिद्धिमायातु सिन्धुस्नानं मम प्रभो ॥

- तत्रैव - ३०/६२ ।

अष्टाक्षरमन्त्रेण (ॐ नमो नारायणाय) करादिन्यासं कुर्यात् । तदनन्तरं षडङ्गन्यासादिं कृत्वा क्रमशः कुक्षौ पृष्ठे पादयोर्जङ्घयोरुर्वानाभौ बाहुयुग्मे हृदि कण्ठे ओष्ठे कर्णयोरक्ष्णोर्गण्डयोर्नासिकयोर्भ्रुललाटशिरःसु च यथाविधि मन्त्रन्यासं कुर्यात् । ततः त्रिवारं प्राणायामं कृत्वा पञ्चविंशतिवारं कवचं कृत्वा सर्वपापपनोदनार्थं पूर्वदिशि गोविन्दः दक्षिणदिशि वारिजाक्षः, पश्चिमदिशि प्रद्युम्नः, उत्तरदिशि हृषीकेशः, आग्नेयकोणे नरसिंहः, नैरृते मधुसूदनः, वायव्ये श्रीधरः, ऐशान्ये गदाधरः, ऊर्ध्वे त्रिविक्रमः, अधो वाराहरूपधृक् विष्णुः, मनसि नारायणः, चैतन्ये गरुडध्वजः, बुद्ध्यहंकारयुक्तत्रिगुणात्मनि जनार्दनः दैत्यवर्गनिकृन्तनविष्णुः सदा मे इन्द्रियाणि रक्षतु सर्वाग्रे पातु च एवं क्रमेण कवचं कृत्वा षोडशोपचारेण मनसा पुरुषोत्तमं पूजयेत् । तत् आत्मानं तीर्थराजं चिन्तयित्वा [५२३]सुदर्शनमन्त्रेण पूजयेत् । ततः तीर्थराजजलान्तिके भक्तिभावेन तं प्रणमेत् । महोदधिजले प्रविश्य [५२४]मन्त्रमुच्चारयन् स्नात्वा विधिवदाचम्य [५२५]पुनर्मन्त्रमुच्चारयेत् । तदनन्तरमुत्तराभिमुखो भूत्वा पूर्ववत् मण्डलमालिख्य मूलमन्त्रेण धूपदीपनैवेद्यादि समर्पयेत् । एवं प्रकारेण पुरुषोत्तमपूजासहितं पञ्चतीर्थदर्शनं समाचरेत् ।

---

५२३. सुदर्शन नमस्तेऽस्तु कोटिसूर्यसमप्रभ ।
अज्ञानतिमिरान्धस्य विष्णुमार्गं प्रदर्शय ॥
-स्कन्दपुराणे उत्कलखण्डे- ३०/८६-८७ ।

५२४. तीर्थराज नमस्तुभ्यं जलरूपाय विष्णवे ।
जीवनाय च जन्तूनां परनिर्वाणहेतवे ॥
अग्निश्चते योनिरिला च देहे रेतोधा विष्णोरमृतस्य नाभिः ।
उपैमि ते रूपमनन्यहेतुमानन्दसम्पन्नमनुप्रविश्य ॥
-तत्रैव- ३०/८८-९० ।

५२५. त्वमग्निर्जगतां नाथ रेतोधा कामदीपनः ।
प्रधानं सर्वभूतानां जीवानां प्रभूरव्ययः ॥
अमृतस्यारणिस्त्वं हि देवयोनिरपांपते ।
वृजिनं हर मे सर्वं तीर्थराज नमोऽस्तु ते ॥
-तत्रैव- ३०/९८-१०० ।

अधुना नीलाद्रिमहोदयोक्तपूजाविधिः श्रीजगन्नाथपुरीक्षेत्रे प्रचलत्येव । अत्र त्रिविधा पूजापद्धतिरनुसृता भवति यत्र विविधानां मन्त्राणां विनियोगः पूजाक्रमेऽनुभूयते । तत्र पूजावसरे प्रथमतः शुक्लतण्डुलचूर्णैः मण्डलानि क्रियन्ते । तानि सर्वाणि अष्टदलपद्माकाराणि चतुर्द्वारभूषितानि भवन्ति । एकहस्तपरिमितक्षेत्रमध्ये अङ्कितानामुपरि नैवेद्यद्रव्याणि संस्थाप्य पूजा आरभ्यते । पूजापद्धतौ पीठन्यासः केशादिन्यासः श्रीकण्ठादिन्यासः, स्वतन्त्रतया प्रत्येकदेवतासु न्यस्यन्ते । अधिकभावेन भ्रमरन्यासः, तत्त्वन्यासः, पदन्यास-मूर्तिपञ्जरन्यास-प्रभृतयः क्रियन्ते । षोडशमुद्राणामाचरणमपि प्रत्यहं क्रियते । अत्र पीठे चतुर्वारं पूजा विधीयते । मुख्यधूपेन सह विमलादेव्याः सम्पर्कोऽस्ति, तद्विना अन्नभोगः महाप्रसादः भवितुं न शक्नुयात् । पञ्चोपचारपूजाविधानेन वारद्वयं वारत्रयं वा सर्वजनहिताय अन्ननैवेद्यं प्रतिदिनं क्रियते । मेषसंक्रान्तिप्रभृतिदिनेषु स्वभक्तानां हनुमत्-विभीषणप्रभृतीनां प्रीतये नैवेद्यमध्ये तान्त्रिकविधानेन तण्डुलादिभिर्बलिकर्म सम्पाद्यते । तान्त्रिकमते पञ्चमकारोपासना अपि क्रियते । एवं प्रकारेण सम्प्रति श्रीमन्दिरस्य पूजा भवति इति दिङ्मात्रमालोचितम् ।

हिन्दुसाम्राज्ये श्रीजगन्नाथचेतनायाः प्रभावः-

नीलाचलाधिनायकः श्रीजगन्नाथः पुरुषोत्तमधाम्नि सुप्रतिष्ठितः । पुराणवर्णितसप्तसु मोक्षक्षेत्रेषु[५२६] पुरुषोत्तमक्षेत्रस्य प्राधान्यात् अत्रागताः बुद्ध-जैन-यीशु-कबीर-नानक-रामानुज-शङ्कराचार्य-शङ्करदेव-चैतन्यप्रभृतयः धर्मप्रचारकाः स्व स्व धर्मस्रोतांसि श्रीजगन्नाथधर्म-महास्रोतसि विलीनानि कृतवन्तः । जैनबौद्धधर्मयोः प्रभावः प्राधान्यादिविषये इतः पूर्वमालोचितम् । सम्प्रति खृष्टि-नानक-शङ्कर-चैतन्यप्रभृतिधर्ममतवादानामुपरि आलोच्यते ।

---

५२६. अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैते मोक्षदायकाः ॥

- ब्रह्माण्डपुराणे- ४/४० ।

यीशुख्रीष्टः-

ख्रीष्टधर्मस्य प्रचारकः यीशुः भारतवर्षागमनसमये पुरीमागतवान् इति किम्बदन्ती श्रूयते । तिब्बतदेशे हिमिस् (होमिय) ग्रामस्थिते मठे, यस्य प्रतिष्ठा द्विसहस्रवर्षात् पूर्वमेव जाता, रूषदेशस्य पर्यटकः नटोभिच् तत्रत्य बौद्धसन्यासि लाभात् यीशुखीष्टस्य भारतभ्रमणविषये एकस्य पुस्तकस्य सूचनां प्राप्तवान् । तत् पुस्तकं रुषभाषया अनुदितं यत्र वर्णितमस्ति यत् यीशुः पुरीमागत्य श्रीजगन्नाथदेवं[५२७]दृष्टवान् इति । स्वामी अभेदानन्द सरस्वती तिब्बतं यदा भ्रमणार्थं गतवान्, तदा होमिस (होमिय) मठे पुस्तकमिदं दृष्टवान् । पुनः पुस्तकस्यास्य अनुवादः सिलाभानलेमि नाम्ना विदुषा फरासीभाषया कृतः यत्र यीशुः जगन्नाथधाम आगत्य जगन्नाथधर्ममनुसृतवान् इति पठ्यते[५२८] ।

शङ्कराचार्यः-

शङ्कराचार्यः ७८८-८२० खीष्टाब्दमध्ये श्रीक्षेत्रमागतवान् । तदानीं बौद्धाः जगन्नाथं बुद्धदेवत्वेन मन्यमानाः बौद्धधर्मस्य प्रतिष्ठां कर्त्तुं यतन्ते स्म । शङ्करः शस्त्रीययुक्त्या तेषां मतं निरस्य श्रीजगन्नाथं ब्राह्मण्यधर्मस्य देवतेति प्रतिपादितवान् । ब्राह्मण्यधर्मस्य प्रचाराय चतुर्षु धामसु पुरुषोत्तमधाम्नि गोबर्द्धनमठं स्थापितवान् । तद्दिनारभ्य तस्य मूर्त्तिः जगन्नाथमूर्त्तेः पार्श्वे पूजिता जाता । परवर्त्तिनि काले दिव्यसिंहदेवेन सा स्थानान्तरिता ।

---

५२७. But he left the misguided admirers of Jaine (Jain) and visited Juggernath in the province of Oris where the remains of Vaissa-Krishna rest and where he received a joyous welcome from the white priest of Brahma. They tought him to read understand the vedas to heal by prayers, to teach and explain to holy scripture to cast out evil spirit from the body of the man and give him back human semblance.

-The Unknown life of Jesus-Nikolash Natovich (Russia)

५२८. Jesus was accepted as a pupil in the temple of Jagannatha and for four years altogether he abode in the temple of Jagannatha and soon began to preach the sudras and formers in parables.

-Acurian Gospel of Jesus the Christ-M.Syllavanlevy (French)

नानकः-

शिख(शिष्य)धर्मस्य प्रवर्त्तकः गुरुः नानकः जगन्नाथक्षेत्रम् आगतवान् । तस्य स्मृतिस्वरूपेण वाउलिमठ, मङ्गुमठ चेति मठद्वयं संस्थापितमासीत् । श्रीक्षेत्रे गुरु नानकः शिष्यैः सार्द्धं चतुर्विंशतिदिनानि यापयित्वा जगन्नाथदेवस्य अनुसरणं कृत्वा स्वधर्मवाणीं प्रचारितवान् ।

चैतन्यः-

१५०९ खीष्टाब्दे चैतन्यः उत्कलराज्यमागत्य 'हरे कृष्ण हरे राम' इति महामन्त्रं प्रचारितवान् । चैतन्यस्यागमनेन न केवलं पुरुषोत्तमक्षेत्रे अपि च समग्रे उत्कलराज्ये वैष्णवधर्मस्य प्रभावो विशेषभावेन परिलक्षितः । तदानीम् उत्कलगजपतिः राजा प्रतापरुद्रदेवः स्वात्मीयैः सह वैष्णवधर्मं गृहीत्वा श्रीमन्दिरे वैष्णवमतानुसारं पूजाविधिं प्रारब्धवान् । चैतन्यः श्रीमन्दिरे राधाकृष्णोपासनायाः प्रथमसोपानं स्थापितवान् । तस्य मतेन [५२९]जगन्नाथः स्वयं कृष्णः, नीलाचलस्तु नित्यवृन्दावनमेव ।

न केवलं धर्मप्रचारकाणां कृते अपि च अनेकेषां भारतीयनृपाणां कृते जगन्नाथदेवः एव प्रधानोपास्यदेवः आसीत् । विभिन्नसमये विभिन्नप्रान्तीयराजानः अत्र आगत्य स्वभक्तिपुष्पं जगन्नाथपदारविन्दयोः अर्पयामासुः । आसाम-नेपाल-वारणासी-जयपुर-कश्मीर-मालव-विकानीर-वर्द्धमान-पञ्जावप्रभृतीनां क्षेत्राणां राजानः श्रीक्षेत्रमागत्य जगन्नाथधर्मेण सह आध्यात्मिकसम्पर्कं संस्थाप्य स्वस्वराज्ये जगन्नाथधर्मप्रचारार्थं जगन्नाथमन्दिराणि निर्मितवन्तः । अधिकन्तु सिंहल-ब्रह्मदेश-बालिद्वीप-जाभाद्वीपप्रभृतिबहिर्भारतीयदेशेषु जगन्नाथमन्दिराणां दृष्टिगोचरीभूतत्वात् जगन्नाथधर्मसंस्कृतिः प्राच्यपाश्चात्यदेशेष्वपि प्रचारिता इति स्पष्टं ज्ञायते । विहारप्रदेशस्य

५२९. राधाचन्द्रावलीभ्यां वलयितवपुषं कोटिकामाभिलाष-
प्रेमानन्दैकपूर्णं विपुलतरमुदं नित्यवृन्दावनस्थम् ।
शुद्धस्निग्धेन्द्रनीलद्युतिविमलतनुं शेषपर्यङ्कलीनं
कृष्णं नीलाचलेशं सुरुचिरवदनं श्रीजगन्नाथमीडे ॥

- श्रीजगन्नाथचरितामृते- पृ०- १ ।

इन्द्रद्युम्नगडे आसामप्रदेशस्य मिणानीग्रामे च विराजितयोः जगन्नाथमन्दिरयोः दारुमूर्त्तीनां पूजा बहुपुरातनकालात् भवति । आन्ध्रप्रदेशे सप्तसंख्यकानि पश्चिमवङ्गप्रदेशे नवसंख्यकानि, विहारप्रदेशे चतुःसंख्यकानि, मध्यप्रदेशे सप्तसंख्यकानि च जगन्नाथमन्दिराणि दृश्यन्ते इति ऐतिहासिककेदारनाथमहापात्रैः [५३०]स्वप्रबन्धे प्रतिपादितम् ।

उत्कलीयनृपाणां प्रभुभावेन श्रीजगन्नाथः सिंहासने उपविष्ट सन् स्वभृत्यभावनया तेभ्यः शासितराजस्य आदेशं ददाति । अस्मात् उत्कलीयप्रजानां भगवन्तं जगन्नाथं प्रति कीदृशः भक्तिभावः अस्ति, विद्वद्भिः स एव आकलनीयः । उत्कलीयकविः स्वप्रतिमायाः परिप्रकाशार्थं सततं श्रीजगन्नाथदेवस्याशीर्वादभिक्षुः भूत्वा तदुद्देश्येन स्वैकान्तिनुरक्तिप्रेमस्नेहश्रद्धाभक्तिसकलं समर्पयति । उत्कलानां समग्रसंस्कृतसाहित्ये जगन्नाथ एव मूलाधाररूपेण भावसौष्ठवत्वेन च वर्णितः अस्ति । एतन्मूलकत्वेन इदमेव कथयितुं युज्यते यत् उत्कलीयानां संस्कृतकृतिषु जगन्नाथ एव मङ्गलाचरणे अग्राधिकारं प्राप्नोति । जगन्नाथः उत्कलीयानां जीवनयात्रया साकमोतप्रोतभावेन लिप्तः सन् तेषां कार्यारम्भे एव सर्वमङ्गल जगन्नाथ इति प्रसिद्धः । उत्कलीयानां लेखनीनिःसृतानां काव्य-नाटक-स्मृति-ज्योतिष-तन्त्रालङ्कार-सङ्गीतग्रन्थादीनां मध्ये जगन्नाथदेवस्य प्रसिद्धिः प्रतिभाति ।

[५३१]कपिलसंहितायां [५३२]पुरुषोत्तममाहात्म्ये [५३३]मुक्तिचिन्तामणौ,

---

५३०. The Jagannatha Temple in Estern India, -K.N.Mohapatra.

५३१. नीलाचलवरे विप्रा पुरा नीलाश्मरूपधृक् ।
इदानीं तु जगन्नाथो भाति दारवलीलया ॥
क्षेत्रं नीलाचलं पुण्यं दारुब्रह्मस्वरूपिणः ।
यस्मिन्क्षेत्रे त्यजन् देहं नरो वैकुण्ठमाप्नुयात् ॥
-कपिलसंहितायां तृतीयाध्याये ।

५३२. बलभद्रो जगन्नाथः सुभद्रा च सुदर्शनः ।
दारुब्रह्मस्वरूपाय चतुर्द्धामूर्त्तये नमः ॥
-Orissa State Museum Manuscript No. 19-20.

५३३. नीलाद्रौ च तदर्थिभ्यो दातुमर्थचतुष्टयम् ।
अशरीरः शरीरीव व्यक्तो यस्तं हरिन्नमः ॥
-Descriptive Catalogue of Sanskrit Manuscript, Vol- I, P. 78.

[५३४]जगन्नाथचरितामृतप्रभृतिषु मङ्गलाचरणे जगन्नाथदेवस्य प्रशस्तिः सुरुचिरा वर्णितास्ति । उत्कलीयस्मृतिकाराः योगीश्वरपात्राः [५३५]अद्भुतसागर उत्कलानां भौगोलिकस्थितिवर्णनप्रसङ्गे जगन्नाथं स्तुवन्ति । नरसिंहमिश्रवाजपेयिमहाभागाः [५३६]नित्याचारप्रदीपे कल्पद्रुमस्य वर्णनां कुर्वन्ति । गजपतिप्रतापरुद्रदेवेन विरचिते [५३७]सरस्वतीविलास ग्रन्थे नीलाद्रिशिखरमणिः जगन्नाथः इति भावितः । मन्त्रीवरगोदावरमिश्रप्रणीते [५३८]जयचिन्तामणिग्रन्थे नीलाद्रिनाथः जगन्नाथः इति वर्णना समुपलभ्यते । ख्यातनामा ज्योतिर्वित् शतानन्द

---

५३४. जकारश्च जगन्नाथो गकारो बलदेवकः ।
भद्रा नकारभावेन थकारश्च सुदर्शनम् ॥

-श्रीजगन्नाथचरितामृते सप्तदशाध्याये- पृ०- २२१ ।

५३५. ईशत्वं दधते नयेन जहति स्वाभाविकीति स्थितिः
सत्यं सर्गकृतो भवन्ति सततं ब्रह्मात्मितां बिभ्रतः ।
निघ्नन्तो नरकं तमोऽप्यमृतं तु सञ्जोपयित्वा समा
भक्त्या एवमतीव यस्य स जगन्नाथोऽक्रमनित्यं स्थितः ॥

-Descriptive Catalogue of Sanskrit Manuscript, Dh.No. 290.

५३६. शाखाभिः सकलाभिरुक्तमहिमा नीलाद्रिमूलस्थितः
पीनस्कन्दधृतप्रसूनविभवः स्वानन्दकन्दोदयः ।
यः शोणाधरपल्लवोऽथः विबुधैः सेव्यः श्रिया शोभिता
भक्तेभ्यो वितरन् फलं विजयते कोऽप्येष कल्पद्रुमः ॥

-Ibid. Vol.-VII, P. 81.

५३७. विभिन्ननीलमणिगर्भनिकायकायं
नीलाद्रिशेखरमणिं नितरां स्मरामि ।
ज्योतिर्मये वपुषि यस्य सितेतरत्वं
कञ्जेक्षणस्य गगनात्मतयैव नूनम् ॥

- सरस्वतीविलासे - श्लोकः-५ ।

५३८. वेदोद्धारकरं वहन्तमवनीं दंष्ट्राग्रराजभुवम्
लीलादारितदैत्यराजहृदयं मायावशाद् वामनम् ।
क्षत्रौघान्तकरं दशास्यदलनं ध्वस्तं प्रलम्बं कृपा-
वासं म्लेच्छविनाशनैकनिपुणं नीलाद्रिनाथं भजे ॥

-Orissa State Museum Manuscript. Dh.No. 272.

आचार्यः [५३९]शतानन्दरत्नमालायां जगन्नाथस्य स्तुतिं करोति । [५४०]ज्योतिस्तत्त्वकौमुदीग्रन्थे नीलाद्रिकन्दरनिवासी जगन्नाथः स्तूयते । [५४१]तन्त्रयामले दारुरूपिजगन्नाथस्य स्तुतिः परिलक्ष्यते । जगन्नाथ आचार्यकृते [५४२]दुर्गायजनदीपिकाग्रन्थेऽपि जगन्नाथदेवस्य स्तुतिः विद्यते । कविकरराय दिवाकरमिश्रः [५४३]अभिनवगीतगोविन्दकाव्ये नीलगिरिपतेरच्युतस्य वर्णनां करोति । कविकमललोचनखड्गराय विरचिते [५४४]भगवल्लीलाचिन्तामणिग्रन्थे आदौ जगन्नाथः स्मर्यते इति विद्वद्भिः ज्ञातमेव ।

उत्कलीयसंस्कृतसाहित्ये चम्पूकाव्यस्य उत्कर्षः एव जगन्नाथदेवमाधारीकृत्य वर्त्तते । तेषु वासुदेवरथसोमयाजिविरचिता

---

५३९. यस्य प्रभो सर्वविदः प्रसन्नः ज्ञानाञ्जनै रञ्जित लोचनश्रीः ।
त्रिकालदर्शीह कलौ नरः स्यात् तस्मै नमः श्रीपुरुषोत्तमाय ॥

- D.C.S.MSS. Vol.-IV, P. XXV.

५४०. श्रीनीलाचलकन्दरीदरगतमुन्नीद्रनीलोत्पलं
प्रेक्ष्य दैत्यगजेन्द्रदर्पदलनं सर्वासिपश्चाननम् ।
शक्ता चंवलया परितममलं पक्षीशसन्मण्डपम्
तं वन्दे हृतपारिजातमजमूं चक्रायुधं माधवम् ॥

-Ibid, Vol.- IV, P. 40.

५४१. भारते चोत्कलदेशे भूस्वर्गे पुरुषोत्तमे ।
दारुरूपी जगन्नाथो भक्तानामभयप्रदः ॥ -तन्त्रयामले प्रथमाध्याये ।

५४२. देशे च उत्कले चास्ते क्षेत्रेषु पुरुषोत्तमे ।
तीर्थे (श)स्योदधेस्तीरे देवेशो जगदीश्वरः ॥

-दुर्गायजनदीपिकायाम्- १/१ ।

५४३. नीलगिरिपतिचरणसरसिजमत्तमधुकररूपिणा
रचितमेतत्पुरुषोत्तम भूभुजामतिचारुणा ।
नमत दशविधरूपमद्भुतमखिलमुनिजनवन्दितम्
जननपालननाशकारण नीलगिरिपतिरच्युतम् ॥

-अभिनवगीतगोविन्दे प्रथमसर्गे ।

५४४. तस्यात्मजः कमललोचननामधेयः श्रीनीलशैलनिलयः कलयन्नकस्मात् ।
कौतुहलं हृदि हरिरित ईशलीलाचिन्तामणिविवृतिमारचयां चकार ॥

-Descriptive Catalogue of Sanskrit Manuscript, Vol- II, p. 187.

गङ्गवंशानुचरितचम्पूः वक्रवाकचक्रपाणिपट्टनायककृता गुण्डिचाचम्पूः कविसूर्यबलदेवरथविरचिता किशोरचन्द्रानन्दचम्पूः, हरिशर्मविरचिता माधवचरितचम्पूः, भुवनेश्वरमिश्रबडपण्डाविरचिता आनन्ददामोदर-चम्पूः, नीलाम्बरआचार्यविरचिता तथा महामहोपाध्यायसदाशिव-मिश्रविरचिता चन्द्रनयात्राचम्पूः च प्रसिद्धाः । [५४५]गङ्गवंशानुचरितचम्पू-मङ्गलाचरणे जगन्नाथस्य वर्णना उपस्थापिता । कविः वक्रवाकचक्रपाणिः गुण्डिचाचम्पूकाव्ये जगन्नाथस्य स्तुतिपूर्वकं [५४६]मङ्गलमाचरन् गुण्डिचायात्रां प्रकटयति । कविकण्ठश्रीसदाशिवमिश्र-महोदयैः [५४७]चन्दनचम्पूकाव्ये दारुब्रह्मश्रीजगन्नाथदेवस्य स्तुतिर्विहिता ।

एतद्व्यतीतमुत्कलीयैः जगन्नाथमाधारीकृत्य जगन्नाथ-शतकानामपि रचना कृता । जगन्नाथदासकृते [५४८]नीलाद्रिशतके

---

५४५. श्रीनीलाचलतुङ्गशृङ्गविहरन्मातङ्गभङ्गीभृतो
दुर्देवाततपा तप्तमनसां कादम्बिनी कन्दलः ।
पादाम्भोरुहरक्तभक्तजनता कारुण्यपाथोनिधि-
र्यः सोऽयं जगदीश्वरो वितनुतां श्रेयांसि भूयांसि वः ॥

- गङ्गवंशानुचरितचम्पूः- १/१ ।

५४६. सद्यो भिन्नजनाभकनकचयलसच्चञ्चलालिङ्गिताङ्गः
स्निग्धो गभीरनादस्त्रिजगति जनतालोचनाली विनोदः ।
भूलक्ष्मीमोदकारी त्रिदशपतिधनुर्भूषणालङ्कृतोऽसौ
पायान्नीलाद्रिनाथो नवमुदिरवरो जीवनाधारमूर्त्तिः ॥

-गुण्डिचाचम्पूः-१/१ ।

५४७. चारुस्मेरतराधरेण विलसद्गारुत्मताश्म प्रभा
पारुष्यप्रदकान्तिभक्तजनता सारुप्यसम्पादकम् ।
कारुत्वं कलय त्रिलोकघटने तारुण्यधूतस्मरं
दारुब्रह्म ममाविरस्तु हृदये कारुण्यवारांनिधिः ॥

-चन्दनचम्पूः- १/१ ।

५४८. इन्द्रद्युम्नक्षितीन्द्रप्रणयकृतमहानुग्रहोदग्रचेता
नेता वृन्दारकाणां पतितजनसमुद्धारकारुण्यसिन्धुः ।
दीनानाथैकबन्धुजलाधितटनीलशैलाग्रजाग्रनेन
सा सम्पदैव कलिकलुषकरिध्वंससिंहो नृसिंहः ॥

-नीलाद्रिनाथशतके - १ ।

जगन्नाथो नृसिंहत्वेन वर्णितः। पण्डितनित्यानन्दकृते [549]नीलाद्रिनाथशतके, विद्याकरपुरोहितविरचिते [550]नारायणशतके, कविगङ्गाधरकृते नृसिंहशतके नीलकण्ठमहापात्रकृते सम्बोधनशतके, कविराजभगवानब्रह्माकृते [551]गुण्डिचाशतके, वक्रवाकचक्रपाणिकृते हरिभक्तिसर्वस्वशतके, काशीनाथरथकृते विष्णुपादशतके, पण्डितचन्द्रशेखरकृते [552]जगन्नाथशतके च जगन्नाथदेवस्य महत्त्वपूर्णं वर्णनं नितरां वर्त्तते ।

संस्कृतनाटकसाहित्ये उत्कलीयनाटचकारो नारायणभट्टः [553]वेणीसंहारनामकनाटकस्य अन्तिमे पुरुषोत्तमस्तवदनं करोति।

---

५४९. राजच्चन्द्रकचारुकान्तिहृदयप्रद्युम्नभूषाकृतिः
सौभद्राविलसन्मतिः प्रविकशच्छूरात्मजान्तोद्गतिः ।
नागाह्वोन्मथितार्ज्जुनाहितमतिः कादम्बरीतिर्गतिः
भूयान्नीलगिरिस्थितिर्मम बलो भद्रा च लक्ष्मीपतिः ॥

-नीलाद्रिनाथशतके - ४ ।

५५०. स्वं चिद्रत्नं त्रिरत्नं यदि समुदयते नष्टमन्वेष्टुमिच्छा
श्रेयः पात्रे तदा स्वे हृदि मिलदमलस्नेहपूरस्य पूर्णे ।
आसाद्यद्योतमानं भृशमकृशदशां संहृताहः पतङ्गः
दध्यादध्यात्मपीडां दलिततममतस्तोमसीमस्य धाम ॥

-नारायणशतके - १ ।

५५१. जगत्त्रितयचित्तमोहनमनपदेशाय किं
कपोलतलचुम्बिनः कति च केचन श्रीपतेः ।
विलोचनपिधायका: कमति लुण्ठनायश्रियां
दिशन्तुमदनामयं वदनवारिपुरा हरेः ॥

-गुण्डिचाशतके - ७४ ।

५५२. जनाविषयवासना भरितमानसाः सन्ततं
निराकृतिमुपासितुं जगति न क्षमा वै कलौ ।
अतः पतितपावनी ननुममुं सुभद्रान्वितं
भजामि सबलं धरन्तमनिशं जगन्नाथमोम् ॥

- जगन्नाथशतके- १ ।

५५३. क्रोधान्धैः सकलं हतं रिपुकुलं पञ्चाक्षतेस्ते वयः
पाञ्चाल्या मम दुर्नयोपजनितस्तीर्णोनिकरार्णवः ॥

मुरारिमिश्रकृतस्य [५५४]अनर्घराघवनाटकस्य मङ्गलाचरणे जगन्नाथदेवस्य वर्णनं वर्त्तते । कृष्णमिश्रप्रणीते [५५५]प्रबोधचन्द्रोदयनाटके द्वितीये अङ्के पुरुषोत्तमक्षेत्रस्य नाम उल्लिखितमस्ति । गजपतिकपिलेन्द्रदेवेन विरचितस्य [५५६]परशुरामविजयव्यायोगस्य अभिनयः प्रथमतः श्रीक्षेत्रे अभूत् । कविडिण्डिमजीवदेवाचार्यः [५५७]भक्तिवैभवनाटके जगन्नाथस्य स्तुतिं चकार । भक्तिभागवतमहाकाव्ये अपि लक्ष्मीपति जगन्नाथः स्तूयते । एतद्व्यतिरिक्तं गजपतिरामचन्द्रदेवेन प्रणीते [५५८]श्रीकृष्ण-

---

त्वं देवः पुरुषोत्तमः सुकृतिनां मायादृतो भाषसे
किं नामान्यदतः परं भगवतो याचे प्रसन्नादहम् ॥

-वेणीसंहारनाटके - ६/४५ ।

५५४. विरमति महाकल्पे नाभीपथैकनिकेतन-
स्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः ।
किमधिकरणं कीदृक् कस्य विवस्थितिरित्यसा-
वुदरमविशद्द्रष्टुं तस्मै जगन्निधये नमः ॥

- अनर्घराघवनाटके- १/२ ।

५५५. नीलकन्दरनाथस्य महोत्सवसभासदः ।
मत्काव्याभिनयेनाद्य विनोदय कुशीलव ॥

-Descriptive Catalogue of Sanskrit Manuscript,
Vol- II, P. LXXXIX.

५५६. दोलामहोत्सवकृते पुरुषोत्तमस्य
कोलाहलैः पिकगिरां ध्वनयन् दिगन्तान् ।
लोलालकाद्बहलकुङ्कुमधूलिसिक्त-
चेलाञ्चलद्विजपटैर्मधुरुज्जिहीते ॥

- Ibid, P. IC.

५५७. अस्ति प्रशस्तिललितो लवणाब्धितीरे
नीलाचलाञ्चलतटीमुकुटायमानः ।
एकस्त्रिमूर्त्तिकुहनाकृतचित्रमूर्त्ति-
र्लक्ष्मीपतिः सकलदैवतवन्दनीयः ॥

-Descriptive Catalogue of Sanskrit Manuscript,
Vol- II, P. 75.

५५८. श्रीकृष्णभक्तिवात्सल्यनाटके - पृ०- १ ।

भक्तिवात्सल्यनाटके, परमानन्ददासकृते [559]चैतन्यचन्द्रोदयनाटके स्थलविशेषे जगन्नाथदेवस्य प्रसिद्धिविषये उक्तिरस्ति ।

जगन्नाथनारायणदेवविरचिते [560]सङ्गीतनारायणग्रन्थे लक्ष्मीपतेः जगन्नाथस्य स्तुतिःवर्णिता । [561]त्रिकाण्डशेषनामधेये अभिधानग्रन्थे पुरुषोत्तमदेवः जगन्नाथदेवस्योल्लेखं कृतवान् । अमरकोश ग्रन्थस्योपरि महामहोपाध्यायेन दैत्यारिदासेन हरिप्रियानामकटीकाकरणावसरे [562]मङ्गलाचरणे जगन्नाथः एव स्मर्यते । ग्रन्थान्तरेष्वपि जगन्नाथदेवस्य गाथा वर्णिताऽस्ति । विस्तरभयात् सर्वासां तासामुल्लेखः नात्र कृतः ।

***

---

५५९. चैतन्यचन्द्रोदयनाटके- पृ०पृ०- १-२ ।

५६०. नीलाद्रिकन्दरानन्दं मन्दरालयवन्दितम् ।
वन्दे वन्दारुमन्दारमिन्दिरामन्दिरं महः ॥
-सङ्गीतनारायणे - १ ।

५६१. त्रिकाण्डशेषे- २/९२ ।

५६२. श्रीनीलाचलवासिनो भगवतः पादारविन्दद्वयो-
र्माश्रित्यामरसिंहकोषविषयं व्याख्यानमारभ्यते ।
श्रीपञ्चाननः सत्कवीश्वरसुतश्रीशङ्करस्यात्मजः
श्रीदैत्यारि कविः कवीन्द्रपरिषन्मुक्तालतानायकः ॥
- अमरकोषटीकायां मङ्गलाचरणे ।

तृतीयपरिच्छेदः

श्रीजगन्नाथतत्त्वप्रतिपादकानि पुराणानि-

श्रीजगन्नाथदेवस्य तत्त्वसकलमष्टादशपुराणान्तर्गतेषु ब्रह्म-स्कन्द-गरुड-कूर्म-मत्स्य-वामनाग्नि-विष्णुपुराणेषु प्रतिपाद्यते । क्रमानुसारं एकस्यैकस्योपरि आलोकपातः क्रियते ।

ब्रह्मपुराणम्-

ब्रह्मपुराणे द्विचत्वारिंशाध्यायात् आरभ्य एकोनसप्तत्यध्यायं यावत् श्रीपुरुषोत्तमक्षेत्रस्य श्रीजगन्नाथदेवस्य च विषयिणी चर्च्चा समुपलभ्यते । तदेव विषयवस्तु संक्षिप्ततया अत्र समुपस्थाप्यते ।

कृतयुगे मालवदेशे इन्द्रद्युम्ननामधेयः प्रख्यात एको नरपतिर्बभूव। तदानीं भगवतः विष्णोर्निराकारोपासना केवलं प्रचलिता आसीत् । विष्णुभक्तिविह्वलितहृदयोऽयं साकारविष्णोः पूजाऽऽराधनानिमित्त-मिच्छन् चिन्तितो जातः । ततः तदुद्देश्येन विभिन्नानि क्षेत्राणि तीर्थानि च परिभ्रमन् अन्तिमे श्रीपुरुषोत्तमक्षेत्रे स एव नरपतिरुपस्थितो बभूव । देवायतनत्वेन तस्यैव पुरुषोत्तमक्षेत्रस्य हृदयाह्लादकापूर्वपरिवेशं परिलक्ष्य अवश्यमेव अस्मिन् क्षेत्रे भगवान् विष्णुः साकाररूपेण विद्यमान इति मनसि निधाय तद्दर्शनलाभोद्देश्येन तत्र राजा इन्द्रद्युम्नः तपः आचरितवान् ।

पुरुषोत्तमक्षेत्रे नीलशैलोपरिभागे भगवान् विष्णुः प्रथमतः प्रतिमारूपेण साक्षाद्विराजमानः आसीत् । तस्य संदर्शनेन न केवलं साधवः भक्ताः अपि च पापिनोऽपि मोक्षमलभन्त। फलतः संसारेऽस्मिन् पापकर्माचरणात् भीतिः दूरीभूता जाता। साधूनां भक्तानां च महत्त्वं स्वतो विलुप्तं जातम् । एतद्दृष्ट्वा धर्मराट् यमः चिन्ताकुलितः सन् अस्य प्रतिकारार्थं विष्णवे निवेदितवान् । निवेदनस्याभिप्रायमवगम्य भगवान् विष्णुः प्रबलबालुकावातच्छलेन स्वप्रतिमाम् अपहृतवान् । तस्मादारभ्य तत्र सर्वजनदृष्टिगोचरीभूता सा भगवत्प्रतिमा अदृश्यतामगच्छत् ।

इन्द्रद्युम्नः तत्र महता यत्नेन तपस्यां कृत्वा एकदा स्वप्ने भगवद्दर्शनं लब्धवान् । ततः कथं तत्र भगवतः प्रतिमास्थापनं भवेत् इति मनसि विचिन्तयन्राजा इन्द्रद्युम्नः प्रथमतः भगवन्मन्दिरनिर्माणार्थ-मुत्कलीयैः राजभिः सह आलोच्य सम्मील्य च प्रयासं कृतवान् । तदनन्तरं तेषां राज्ञां सहायेन विन्ध्याचलात् प्रस्तरखण्डानि आनीय मन्दिरनिर्माणकार्यमारब्धवान्। तदवसरे सः निर्विघ्नेन स्वकार्यसिद्ध्यर्थ-मश्वमेधयज्ञं कृतवान् । यज्ञं मन्दिरनिर्माणकार्यं च समाप्य तत्र भगवत्प्रतिमानां प्रतिष्ठार्थं राजा स्थिरनिश्चितो बभूव । किन्तु भगवतः प्रतिमानामप्राप्तित्वात् किंकर्त्तव्यविमूढोऽयं राजा तदभीष्ट-सिद्ध्यर्थं कुशशय्यायामनाहारेण तपश्चकार । तेन तपसा सन्तुष्टो भगवन् पुनरेकदा रात्रौ स्वप्नमाध्यमेन राज्ञः इन्द्रद्युम्नस्य सम्मुखे आविर्भूतो भूत्वा अकथयत्, हे राजन् ! सन्निकटमहोदधितीरे दृश्यमानारण्यमध्ये साक्षात्समुद्रजलस्य स्पर्शं कुर्वन् शङ्खचक्रादिचिह्नितः सुलक्षणसम्पन्नः एकः वृक्षः वर्त्तते । स एव वृक्षो भगवद्दारुविशेषः, तेन वृक्षकाष्ठेन भगवत्प्रतिमानिर्माणं कर्त्तुं शक्यते इति । स्वप्नभङ्गानन्तरमागते प्रभाते नरनाथः इन्द्रद्युम्नः स्वकीयैः राजपुरुषैः प्रजाभिः च सह सन्निकटसमुद्रतटस्थारण्यमध्यं गत्वा तत्र तल्लक्षणलक्षितं तं महाद्रुमं परशुना शातयामास । ततः आनयनवेलायां द्रुमस्यास्य द्वैधीकर्त्तुमिच्छन् यदा राजा तं निरीक्षते स्म तदा तत्र विप्रवेशधारी भगवान् विष्णुः आविर्भूतो भूत्वा इन्द्रद्युम्नात् सर्ववृत्तान्तं श्रुतवान् । तेन विप्रेण सह अन्यः कश्चिदपि विप्र आविर्भूतः आसीत् । सः विश्वकर्मा। विप्रः स्वसङ्गिनः श्रेष्ठशिल्पित्वेन परिचयं दत्त्वा स एव एकाकी भगवत्प्रतिमानिर्माणं सहसा करिष्यतीति बोधितवान् । विष्णुः इन्द्रद्युम्नेन सह तत्प्रान्तीयवृक्षच्छायायां विश्रामच्छलेन धर्मालोचनां कृतवान् । स्वल्पसमये विश्वकर्मणा क्रमानुसारं धवलवर्णयुक्तस्य बलभद्रस्य, कृष्णवर्णविशिष्टस्य जगन्नाथस्य, स्वर्णवर्णयुक्तायाः सुभद्रायाः च प्रतिमानां निर्माणं सम्पादितमिति दृष्ट्वा आश्चर्यान्वितः राजा इन्द्रद्युम्नः विनम्रतापूर्वकं विप्रवेशधारिणोः तयोः परिचयजिज्ञासां कृतवान् । सन्तुष्टभगवान् विष्णुः इन्द्रद्युम्नस्य सम्मुखे तयोरुभयोः परिचयप्रदानच्छलेन स्वाविर्भाववृत्तान्तं कथयित्वा

इन्द्रद्युम्नाय अभीष्टसिद्ध्यर्थं वरं दत्तवान् । ईदृशमहत्तमकार्यसम्पादनात् युगचतुष्टये इन्द्रद्युम्नस्य ख्यातिः प्रसारिता भविष्यतीति भगवता तत्र उद्घोषितम् । एतत्कार्यसम्पादने राज्ञा इन्द्रद्युम्नेन यः खलु यज्ञमण्डपो निर्मितः प्रसिद्धेऽस्मिन् यज्ञमण्डपे प्रतिसंवत्सरं आषाढमासे भगवत्प्रतिमानामवस्थितिः परममङ्गलदायिनी भविष्यति तथा च तद्दर्शनेन पापिनोऽपि जनाः मुक्तिं प्राप्स्यन्ति, तत्रस्थ यज्ञकुण्डं इन्द्रद्युम्नसरोवरत्वेन प्रसिद्धिं प्राप्य महातीर्थरूपेण सर्वैः समादृतं भविष्यतीति सर्वम् विष्णुः प्रकाशितवान् । ततः परं विप्रवेशधारिणौ तौ विश्वकर्माविष्णुश्चान्तर्हितौ जातौ । भगवतोः अन्तर्द्धानानन्तरं राजा इन्द्रद्युम्नः स्वमन्त्रिपारिषदवर्गप्रजाप्रभृतिभिः सह सुशोभितविमानेन तत्प्रतिमात्रयं निर्द्धारितदेवस्थानमानीतवान् । ततः शुभकाले निर्मितेऽस्मिन् प्रासादे प्रतिमात्रयं संस्थाप्य यथाविधि पूजोपचारादिकरणार्थं व्यवस्थासकलं कृतवान् ।

प्रसङ्गेऽस्मिन् मार्कण्डेयमुनेः आख्यानवर्णनावसरे तस्य वटवृक्षदर्शनं तथा च भगवत्कुक्षौ प्रवेशादीनि बहूनि तथ्यानि समुपस्थापितानि सन्ति । मार्कण्डेयमुनेः नामानुसारं प्रसिद्धा मार्कण्डपुष्करिणी अधुनाऽपि श्रीजगन्नाथदेवस्थानस्य उत्तरस्यां दिशि वर्त्तमाना सती जनान् पुनाति । क्षेत्रस्यास्य समधिकप्रसिद्धिप्रकटने अत्र तत्कालादारभ्य इदानीं यावत् वर्त्तमानानाम् अक्षयवटेन्द्रद्युम्नसरोमार्कण्डेयसरःश्वेतगङ्गारोहिणीकुण्डानां पञ्चानां तीर्थानां विषये ब्रह्मपुराणे निहिता समुपस्थापना नितरां भूयसी एव । अधिकन्तु नृसिंह-श्वेतमाधव-मत्स्यमाधवमाहात्म्य-तीर्थराज-स्नानविधि-द्वादशयात्राविधिप्रभृतीनि अत्र समधिकतया वर्णितानि सन्तीति ।

स्कन्दपुराणम्-

स्कन्दपुराणस्य वैष्णवखण्डे पुरुषोत्तममाहात्म्यवर्णनार्थं निर्दिष्ट एको भागोऽस्तीति विद्वद्भिः ज्ञातमेव । तत्रेदं विषयवस्तु प्रतिपादितमस्ति ।

महाप्रलयात् परं ब्रह्मा सर्वं सृष्ट्वा भगवन्तं विष्णुं भूवासिनां

मुक्त्युपायं पृष्टवान् । तदुत्तरेण भगवान् पुरुषोत्तमक्षेत्रे नीलाद्रौ भगवान् स्वयं विष्णुः नीलमाधवरूपेण विराजते । तस्य सन्दर्शनेन सायुज्यमुक्तिर्लभ्यते इति । कलियुगे अहरहः पापान् आचरन्तोऽपि पापिनः नीलमाधवदर्शनेन मुक्तिमलभन्त । तस्मात् भयह्रासो जातः । यमस्याधिकाररक्षार्थं यमराजस्य स्तुत्या च सन्तुष्टः भगवान् नीलमाधवः ततः अन्तर्हितो जातः । अवसरेऽस्मिन् साक्षाद्भगवन्मूर्त्तिदर्शनार्थ-मत्यन्तमाग्रही सत्ययुगीयः अवन्तीनरेशः इन्द्रद्युम्नः पण्डितान् आहूय विमर्शं कृतवान् । तदा परिव्राजको वृद्धतपस्वी एकः उपस्थितो भूत्वा उड्रदेशस्थनीलाद्रौ नीलमाधवरूपेण स्वयं भगवान् पुरुषोत्तमः शवरैः पूजितः सन् विराजते यस्य च संदर्शनेन मोक्षलाभो भवति इति राज्ञे निवेदितवान् । ततः इन्द्रद्युम्नः विद्यापतिनामानं ब्राह्मणमेकं भगवन्नीलमाधवदर्शनार्थं प्रेषितवान् । विद्यापतिः तत्र उड्रदेशे नीलमाधवस्य पूजकेन विश्वावसुना सह सम्पर्कं संस्थाप्य भगवतो नीलमाधवस्य दर्शनं लब्धवान् । यदा स राजानं प्रतिवेदयितुम् आगतवान् तदा तस्मात् नीलमाधवोऽन्तर्हितो बभूव । विद्यापतिः मालवदेशे भगवतः आज्ञामालं राज्ञः कण्ठे समारोप्य पुरुषोत्तमक्षेत्रमाहात्म्यं वर्णितवान् । ततः राजा इन्द्रद्युम्नः नीलाद्रिस्थभगवद्दर्शने समुत्सुको भूत्वा सकलनागरिकैः साकं नारदस्योपदेशेन शुभमुहूर्त्ते ओड्रदेशं प्रति जगाम । पथि चर्च्चिकादेव्याः आराधनापूर्वकम् एकाम्रवनं प्रति आजगाम । ततः परम् ओड्रनृपतिना तस्य स्वागतं सम्पादितम् । मिथः सम्भाषणावसरे प्रचण्डवातेन नीलमाधवमूर्त्तेरन्तर्द्धानप्रसङ्गः ओड्रनरपतिना तदा प्रकाशितः । तच्छ्रुत्वा इन्द्रद्युम्नो भृशं दुःखितः सन् नीलाचलम् आगतवान् । दुःखस्यास्य निवारणार्थं नारदेन तस्मै सान्त्वना प्रदत्ता यत् अविलम्बेन भगवान् चतुर्द्धामूर्त्तिं धृत्वा आविर्भविष्यति । ततो नारदेन सह इन्द्रद्युम्नः नीलपर्वतोपरि देवं द्रष्टुं नीलकण्ठसकाशात् निर्गत्य प्रथमतः तत्र नरसिंहदर्शनं कृत्वा स्तुतिं चकार । स्तुत्या सन्तुष्टो भगवान् अशरीरवाण्या अश्वमेधयज्ञकरणार्थमिन्द्रद्युम्नमादिदेश । एतद्द्वारा कथञ्चिदाश्वस्तः इन्द्रद्युम्नः अश्वमेधयज्ञं चकार । ततः मण्डपादीनां निर्माणानन्तरं तत्र नरसिंहमूर्त्तिर्नारदेन स्थापिता ।

अवसरेऽस्मिन् स्वप्ने नीलमाधवः भगवत्प्रतिमानां लाभसम्बन्धे इन्द्रद्युम्नमुपदिष्टवान् । आगते प्रभाते स्वप्नानुसारमेकं महादारु महासमुद्रे भासमानं विराजते इति सेवकेभ्यः श्रुत्वा राजा इन्द्रद्युम्नः समुद्रतटं गत्वा तद्दारुदर्शनं कृतवान् । ततः महादारुमानीय यज्ञवेद्यां संस्थाप्य राजा केन प्रकारेण ततः मूर्त्तिनिर्माणं भविष्यति इति यदा विचिन्तयति स्म तदा स्वयं जगन्नाथः स्वतः एव महावेद्याम् आविर्भविष्यति इति दैवीवाणीं श्रुतवान् । एतेन सह यः शस्त्रधारी वृद्धबर्द्धकी उपस्थितो भविष्यति सः खलु केवलं तत्र महावेद्यां प्रविश्य मूर्त्तिचतुष्टयनिर्माणं करिष्यति । तस्य प्रवेशानन्तरमाच्छादितायाः महावेद्याः बहिर्पार्श्वे वाद्यनिनादो भविष्यति पञ्चदशदिनानि यावत् इत्यपि दैवीवाणी आसीत् । एतदनुसारं कार्यसम्पन्ने जाते तत्र पञ्चदशदिनान्तरं महावेद्यां भगवतः मूर्त्तिचतुष्टयम् आविर्भूतम् । पुनरपि तदानीं मन्दिरनिर्माणं कृत्वा मूर्त्तिसंस्थापनार्थं दैवीवाणी जाता । मन्दिरनिर्माणानन्तरं मन्दिरस्य प्रतिष्ठानिमित्तं नारदस्य परामर्शं स्वीकृत्य ब्रह्मणः स्वागतकरणार्थं यदा इन्द्रद्युम्नः ब्रह्मलोकं प्रति गतवान् तदवसरे गालनामधेयः कश्चन नरपतिः तन्मन्दिरे माधवमूर्त्तिं संस्थाप्य पूजितवान्। ब्रह्मलोकादागत्य एतद्दृष्ट्वा राजा इन्द्रद्युम्नः नारदस्याज्ञया विश्वकर्मणा निर्मिते स्यन्दनत्रये मूर्त्तिचतुष्टयमानीय मन्दिरे स्थापितवान् । तन्मन्दिरात् गालेन प्रतिष्ठितमाधवमूर्त्तिं स्थानान्तरीकृत्य अन्यस्मिन् मन्दिरे स्थापितवान् । एतदवसरे स्वराष्ट्रे अपरस्य राज्ञः अवाञ्छितप्रवेशात् ससैन्यः गालनृपतिः विरोधमनोभावप्रकटनार्थं इन्द्रद्युम्नस्य सम्मुखे उपस्थितो जातः । किन्तु इन्द्रद्युम्नं स्वपूर्वपुरुषमेव ज्ञात्वा तत्सम्पादितान् इत्थं दुर्लभसम्भारान् दृष्ट्वा आश्चर्याभिभूतः गालनृपतिः स्वयं इन्द्रद्युम्नं स्वराज्यसिंहासने पुनरभिषिच्य तदाज्ञावशवर्त्ती बभूव । अनन्तरं ब्रह्मा ब्रह्मलोकादागत्य यथाविधि अत्र श्रीमन्दिरे जगन्नाथादिमूर्त्तिचतुष्टयं प्रतिष्ठापितवान् । तद्दिनादारभ्य तत्र पूजोपासनानिमित्तं व्यवस्था जाता । अन्तिमे च राजा इन्द्रद्युम्नः गालनृपतये राज्यभारं समर्प्य ब्रह्मलोकं गतवान् ।

पद्मपुराणम्-

पद्मपुराणस्य पातालखण्डे सप्तदशाध्यायात् द्वाविंशत्यध्यायं

यावत् भगवतः जगन्नाथस्य विषये अपूर्ववर्णनं यत् प्राप्यते- तस्य सारवस्तु यथा- गङ्गासागरसङ्गमे गण्डकीनदीतीरे पुरुषोत्तमक्षेत्रस्यास्य अवस्थितिः प्रदर्शिता । अस्मिन्नेव क्षेत्रे नीलपर्वतो विद्यते यत्र शङ्खचक्र-गदापद्मधारी चतुर्भुजविशिष्टः हरिः पूज्यते इति रामचन्द्रस्याश्वमेधयज्ञ-सम्पादनावसरे अश्वेन सह गच्छन्तं भरतं सुमतिरुक्तवान् । पुनः तदा तस्मिन् पर्वते भगवतः हरेः चतुर्भुजविशिष्टां मूर्त्तिं दृष्ट्वा यथा सर्वे चतुर्भुजत्वं लेभिरे तत् वर्णितवान् । अनन्तरं काञ्चिदेशस्य राजा रत्नग्रीवः चतुर्भुजधारिणं ब्राह्मणमेकं दृष्टवान् । परेद्युः राजसभायां स एव द्विजः प्रविश्य स्वचतुर्भुजप्राप्तिकारणं नीलपर्वते विराजमानस्य पुरुषोत्तमस्य माहात्म्यं च वर्णयामास । तच्छ्रुत्वा राजा ससैन्यः नीलगिरिं प्रति चलितः । गङ्गायां स्नानं समाप्य सः हरिं द्रष्टुं पर्वतारोहणं कृतवान् । तत्र हरेः अन्तर्धानं दृष्ट्वा दुःखितः सन् तद्दर्शनलाभाय आराधयामास । एवं प्रकारेण दिवसपञ्चके गते स्वयं भगवान् संन्यासिरूपेण दर्शनं दत्त्वा श्वो मध्याह्ने नीलरूपी भगवान् पुरुषोत्तमः अवश्यमेव तव दृष्टिगोचरीभूतो भविष्यतीति सान्त्वयन् अन्तर्हितो बभूव । परस्मिन् दिवसे राजा रत्नग्रीवो नीलवर्णं भगवन्तं दृष्ट्वा चतुर्भुजधारी सञ्जातः । अन्तिमे सः वैकुण्ठभुवनं प्राप्तवान् इति ।

पद्मपुराणस्यास्य क्रियासारयोगखण्डे पुरुषोत्तममाहात्म्यं प्रतिपादितमस्ति । वस्तुतः श्रीपुरुषोत्तमजगन्नाथचेतनायाः विकाशः अस्मिन्नेव पुराणे प्रदर्शितः ।

नारदपुराणम्-

नारदपुराणस्योत्तरभागे एकपञ्चाशदध्यायात् द्विषष्ट्यध्यायं यावत् पुरुषोत्तमक्षेत्रस्य माहात्म्यं वर्णितमस्ति । अत्र कथावस्तु ब्रह्मपुराणकथावस्तुना सह समानं भवतीति हेतो पुराणस्यास्य विस्तृतालोचनं नावश्यमकमिति मत्वा केवलं प्रतिपादनशैली-माधारीकृत्य सक्षेपतः तथ्यमिदमुपन्यस्यते ।

मोहिनी पुरोहितवसुं मोक्षदायकपुरुषोत्तमक्षेत्रस्य माहात्म्यविषये पृष्टवती । ततः पुरोहितः ब्रह्मकथितं पुरुषोत्तमक्षेत्रमाहात्म्यं वर्णयामास । तद्यथा- भारतवर्षस्य विरजोमण्डलात् दक्षिणोदधितटं यावत् विस्तृतस्य

उत्कलप्रदेशस्य महत्त्वमधिकमस्ति । अत्र सकलपापनाशकं मुक्तिप्रदायकं गुह्यस्थानं पुरुषोत्तमक्षेत्रं वर्त्तते, यस्य भूभागः बालुकामयः । पुरुषोत्तमक्षेत्रमिदं दशयोजनं यावत् विस्तृतम् । सत्ययुगे इन्द्रतुल्यपराक्रमी कार्यदक्षः सौभाग्यशाली सत्यप्रतिज्ञः सर्वगुणसम्पन्नः राजा इन्द्रद्युम्नः आसीत् । एकदा स विष्णोः आराधनाप्रसङ्गे चिन्तितवान् यत् कुत्र कस्मिन् क्षेत्रे चाहं विष्णुपूजने समर्थः भविष्यामीति । एतत् मनसि विचारं कृत्वा इतस्ततः परिभ्रम्य अन्तिमे मुक्तिदायकपुरुषोत्तमक्षेत्रे उपस्थितो जातः । तत्र विधिपूर्वकम् अश्वमेधयज्ञं सम्पाद्य प्रभूतदानदक्षिणादि च दत्त्वा बृहत्कायमन्दिरं निर्माय तन्मध्ये श्रीकृष्ण-बलभद्र-सुभद्रामूर्त्तित्रयस्य संस्थापनं कृतवान् । प्रत्यहम् इन्द्रद्युम्नः विधिपूर्वकं पञ्चतीर्थस्नानदानजप-होमादिकं कुर्वन् आस्ते । ततः भक्तिपूतेन चित्तेन भगवन्तं समाराध्य अन्तिमे जगन्नाथदेवस्य प्रसादेन मोक्षं प्राप्तवानीति ।

एतद्व्यतिरेकेण गरुडमत्स्यकूर्मवामनाग्निविष्णुपुराणेषु जगन्नाथ-देवमाधारीकृत्य पूर्वप्रतिपादनवत् किमपि सविशेषवर्णनं नोपलभ्यते ।परन्तु स्थलविशेषे तीर्थवर्णनप्रसङ्गे श्राद्धदानप्रसङ्गे च श्रीजगन्नाथदेवस्य पुरुषोत्तमस्य वा नामोल्लेखमात्रं वर्त्तते । अतएव जगन्नाथपुरुषोत्तमयोः नामोल्लेखः यत्र यत्र वर्त्तते प्रसङ्गसाहचर्येण तत् तत् उपन्यस्यते ।

गरुडपुराणम्-

सम्पूर्णेऽस्मिन् गरुडपुराणे केवलमेकवारं[५६३] जगन्नाथस्य नाम श्रूयते । सर्वतीर्थमाहात्म्यप्रसङ्गे नीलगिरिसम्बन्धिवर्णनमपि [५६४]वारमेकं दृश्यते । पुरुषोत्तमनाम अपि [५६५]वारचतुष्टयमत्र प्राप्यते ।

---

५६३. अर्वाग्विसर्जनाद् द्रव्यं नैवेद्यं सर्वमुच्यते ।
विसर्जिते जगन्नाथे निर्माल्यं भवति क्षणात् ॥
-गरुडपुराणे पूर्वार्द्धे- १३७/८ ।

५६४. गङ्गाद्वारे कुशावर्त्ते विन्ध्यके नीलपर्वते ।
स्नानं कनखले तीर्थे स भवेन्न पुनर्भवे ॥ -तत्रैव- ८१/२८ ।

५६५. (क) विरजस्तु महातीर्थं तीर्थं श्रीपुरुषोत्तमः ।
महेन्द्रपर्वततीर्थं कावेरी च नदी परा ॥ -तत्रैव- ८१/१६ ।

गयामाहात्म्यवर्णनप्रसङ्गे पुरुषोत्तमस्य तीर्थत्वेन पुरुषोत्तमदेवत्वेन[५६६] च वर्णना समुपलभ्यते । तत्सिन्निकर्षतया फलप्राप्तिप्रसङ्गेऽपि बलभद्रसुभद्रयोः वर्णनं वर्त्तते । पुराणेऽस्मिन् पुरुषोत्तमशब्दः एकत्र तीर्थत्वेन[५६७] जगन्नाथदेवत्वेन च प्रतिपादितः । अतोऽधुनोपलब्धे गरुडपुराणे वारसप्तकं पुरुषोत्तमशब्दस्य व्यवहारः उपलभ्यते । एतद्व्यतीतं वारद्वयं बलभद्रशब्दस्य सुभद्राशब्दस्य च व्यवहारोऽस्मिन् पुराणे[५६८] परिलक्ष्यते ।

मत्स्यपुराणम्-

मत्स्यपुराणे पुरुषोत्तमशब्दस्य व्यवहारः समुपलभ्यते । प्रथमतः त्रयोदशाध्याये दैवीशक्तेः विमर्शणावसरे विमलादेव्याः विराजमान-स्थलीरूपेण पुरुषोत्तमक्षेत्रस्य[५६९] प्रसिद्धिः प्रकटिता अस्ति ।

(ख) तदा गदाधरं देवं माधवं पुरुषोत्तमम् ।
तं प्रणम्य प्रयत्नेन न भूयो जायते नरः ॥
-गरुडपुराणे पूर्वार्द्धे- ८३/७ ।

(ग) अनघं वामनं शौरिं वैकुण्ठं पुरुषोत्तमम् ।
वासुदेवं हृषीकेशं माधवं मधुसूदनम् ॥ -तत्रैव- १३१/१० ।

(घ) अच्युतानन्द गोविन्द प्रसीद यदभीप्सितम् ।
तदक्षयममेयात्मन् कुरुष्व पुरुषोत्तमम् ॥
- तत्रैव- १३७/१२ ।

५६६. जगन्नाथं येऽर्चयन्ति सुभद्रां बलभद्रकम् ।
ज्ञानं प्राप्य श्रियं पुत्रान् व्रजति पुरुषोत्तमम् । -तत्रैव- ८६/१८ ।

५६७. पुरुषोत्तमराजस्य सूर्यस्य च गणस्य च ॥
सर्वान् कामानवाप्नोति सम्पूज्य पुरुषोत्तमम् ।
नारायणं तु सम्पूज्य नाराणामधिपो भवेत् ॥
-तत्रैव- ८६/१९,२७ ।

५६८. बलभद्रं समभ्यर्च्य बलारोग्यमवाप्नुयात् ।
सुभद्रां पूजयित्वा तु सौभाग्यं परमाप्नुयात् ॥
-तत्रैव- ८६/२६ ।

५६९. गङ्गायां मङ्गला नाम विमला पुरुषोत्तमे ।
विपाशायाममोघाक्षी पाटला पुण्ड्रवर्द्धने ॥
- मत्स्यपुराणे- १३/३५ ।

[५७०]द्वाविंशाध्याये श्राद्धार्थं तीर्थनिर्णयप्रसङ्गे पुरुषोत्तमस्य प्रसिद्धिः श्रूयते । त्रिनवतितमाध्याये वैशम्पायनमुखेन यज्ञविषयवर्णनप्रसङ्गे श्रीजगन्नाथनामोच्चारणं[५७१] प्राप्यते । [५७२]एकविंशत्यधिकशततमेऽध्याये सूतमुखेन जम्बुद्वीपवर्णनप्रसङ्गे इन्द्रद्युम्नसरसः नामोच्चारितत्वात् तदेव श्रीजगन्नाथक्षेत्रं सूचयति इति तर्कयितुं शक्यते ।

अग्निपुराणम्-

अग्निपुराणे गयामाहात्म्ये गयायात्रावर्णनप्रसङ्गे सर्वकामसिद्ध्यर्थं सुभद्राबलभद्रपुरुषोत्तमानां प्रपूजनार्थम् उपन्यासः [५७३]परिलक्ष्यते । यद्यपि अत्र पुरुषोत्तमशब्दमात्रस्य व्यवहारो जातः तथापि पुरुषोत्तमजगन्नाथयोः एकदेववाचकत्वे नास्ति भिन्नत्वम् । केवलं प्रसिद्धिदृष्ट्या भवतु अथवा छन्दोविन्यासनिमित्तं भवतु तत्र पुरुषोत्तमशब्दो व्यवहृत इति कथयितुं युज्यते ।

एकोनविंशत्यधिकद्विशततमेऽध्याये अभिषेकमन्त्रप्रस्तावावसरे अभिषेचनार्थं येषां नाम्नामुल्लेखो वर्त्तते तेषु [५७४]नीलपर्वतस्य नाम

---

५७०. गोकर्णं गजकर्णं च तथा च पुरुषोत्तमः ।
द्वारका कृष्णतीर्थं च तथाऽर्बुदसरस्वती ॥
-मत्स्यपुराणम्- २२/३८ ।

५७१. सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ।
वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ।
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते ॥
- तत्रैव- ९३/५१ ।

५७२. ततस्तु नलिनी चापि प्राचीमेव दिशं ययौ ।
कुपथान् प्लावयन्ती सा इन्द्रद्युम्न सरांस्यपि ॥
- तत्रैव - १२१/५५ ।

५७३. सुभद्रां बलभद्रं च प्रपूज्य पुरुषोत्तमम् ।
सर्वकामसमायुक्तः कुलमुद्धृत्य नाकभाक् ॥
-अग्निपुराणे- ११६/१९ ।

५७४. गङ्गाद्वारकुशावर्त्तौ विन्ध्यको नीलपर्वतः ।
वराहपर्वतश्चैव तीर्थं कनखलं तथा ॥
- तत्रैव- २१९/६६ ।

अस्ति । जगन्नाथदेवस्य प्रतिष्ठायां तदानीमेव नीलपर्वतस्य प्रख्यातिः जाता । न केवलमेतत् तदवसरे तीर्थत्वेन [५७५]पुरुषोत्तस्य परिगणनात् पुरुषोत्तमो जगन्नाथः तदानीमेव सुप्रसिद्धः आसीत् इत्यपि निश्चीयते । देवदेवीनां स्वातन्त्र्यं निधाय अनेकेषां नाम्नां परिकल्पना विद्वज्जनगोचरीभूता एव । तत्र कुत्रचित् सहस्रपरिमितानि कुत्रचित् शतपरिमितानि कुत्रचित् वा अष्टोत्तरशतपरिमितानि नामानि परिलक्ष्यन्ते । किन्तु विशिष्टेऽस्मिन् अग्निपुराणे पञ्चाधिक-त्रिशततमेऽध्याये विष्णोः पञ्चपञ्चाशन्नामानि वर्णितानि भवन्ति । पुराणेऽस्मिन् यत्र यत्र विष्णोः नामानि पठ्यन्ते तत्र तत्र सन्निकर्षतया पुरुषोत्तमक्षेत्रस्य[५७६] उड्रदेशस्य च व्यवहारः समुपलभ्यते ।

अन्तिमे सप्ताधिकत्रिशततमेऽध्याये [५७७]त्रैलोक्यमोहनमन्त्रवर्णन-प्रसङ्गे एकाधिकवारं पुरुषोत्तमनाम्नः उच्चारणात् मन्त्रपरिसरे प्रसिद्धिं गतस्य पुरुषोत्तमस्य जगन्नाथस्य वा बहुकालादेव उपासना प्रचलिता आसीत् इति ज्ञायते ।

वामनपुराणम्-

पुराणेऽस्मिन् प्रह्लादतीर्थयात्राप्रसङ्गे विविधेषु तीर्थेषु परिभ्रमता प्रह्लादेन भगवन्तमुद्दिश्य याः याः स्तुतयः कृताः तासु जगन्नाथशब्दः परिलक्ष्यते । प्रह्लादः विरजातीर्थे उपासनादि स्वकर्म समाप्य ततः पुरुषोत्तमदर्शनार्थं गतवान् इति तत्र स्पष्टं [५७८]प्रतिभाति ।

---

५७५. द्वारका श्रीगिरिस्तीर्थं तीर्थं च पुरुषोत्तमः ।
शालग्रामोऽथ वाराहः सिन्धुसागरसङ्गमः ॥
-अग्निपुराणे- २१९/६८ ।

५७६. सर्वपापहरं विन्ध्य ओड्रे तु पुरुषोत्तमम् ।
आत्मानं हृदये विद्धि जपतां भुक्तिमुक्तिदम् ॥ - तत्रैव- ३०५/१३ ।

५७७. (क) ओं श्रीं ह्रीं हुं ओं नमः पुरुषोत्तमः पुरुषोत्तमप्रतिरूप....
(ख) ॐ पुरुषोत्तम त्रिभुवनमदोन्मादकर हूं फट् हृदयाय नमः........
- तत्रैव- ३०७/१ ।

५७८. स्नात्वा विरजसे तीर्थे दत्त्वा पिण्डं पितृंस्तथा ।
दर्शनार्थं ययौ श्रीमान् अजितपुरुषोत्तमम् ॥
-वामनपुराणे- ५७/९ ।

ब्रह्मपुराणस्कन्दपुराणादिवर्णनानुसारं विरजाक्षेत्रतः दक्षिणपार्श्वे एव श्रीपुरुषोत्तमक्षेत्रं यत्र महाप्रभुः श्रीजगन्नाथः चिरकालात् विराजते इति यत् अस्माभिः प्रागेव प्रतिपादितं तत् अस्मिन् वामनपुराणे प्राप्यते । अतः अत्र वामनपुराणवर्णितः श्रीपुरुषोत्तमः श्रीजगन्नाथदेवात् अभिन्न इति अत्र नास्ति सन्देहः । स्तुतिप्रसङ्गे[५७९] प्रह्लादेन भगवतः यानि नामानि उच्चारितानि तेषु जगन्नाथनाम्नः श्रवणात् न केवलं वामनपुराणस्य प्रसिद्धिकालेऽपि च ततः प्रागेव जगन्नाथदेवस्य जगन्नाथसंस्कृतेर्वा ख्यातिः सुमहती आसीत् इति ज्ञायते । अस्मिन् पुराणे विष्णुपञ्जरस्तोत्रे विष्णोः नामकथनावसरे [५८०]जगन्नाथस्य नाम एव आगच्छति । जगन्नाथपुरुषोत्तमं समाराध्य [५८१]विष्णुलोकप्राप्तिः भवतीति तत्रैव वर्णितमस्ति । पुनः महेश्वरकथितपापप्रशमनस्तोत्रे[५८२] जगन्नाथ-पुरुषोत्तमनामादिकं वर्त्तते । जगन्नाथः [५८३]चतुर्मूर्त्त्यात्मक इति

---

५७९. नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावनः ।
नमस्ते जगदाधार नमस्ते पुरुषोत्तम ॥
नारायणजगन्मूर्त्ते जगन्नाथ गदाधर ।
पीतवास श्रियः कान्त जनार्द्दन नमोऽस्तुते ॥
-वामनपुराणे- ६२/३७-३८ ।

५८०. ओं हरिं कृष्णं हृषीकेशं वासुदेवं जनार्द्दनम् ।
प्रणतोऽस्मि जगन्नाथं स मे पापं व्यपोहतु ॥ - तत्रैव- ८६/६६ ।

५८१. अनेनैव जगन्नाथं त्वमाराधय केशवम् ।
ततः शापापनोदं तु स्तुते लप्स्यसि केशवे ॥
समाराध्य जगन्नाथं स तत्र पुरुषोत्तमम् ।
सर्वपापविनिर्मुक्तो विष्णुलोकमवाप्तवान् ॥
-तत्रैव- ८६/११४, ११९ ।

५८२. नमस्तेऽस्तु जगन्नाथ देवदेव नमोऽस्तु ते ।
वासुदेवनमस्तेऽस्तु बहुरूप नमोऽस्तु ते ॥
वरेण्य विष्णो वैकुण्ठ नमस्ते पुरुषोत्तम ॥
- तत्रैव - ८७/१, ५ ।

५८३. धर्माद्यैर्भगवान् विष्णुरखण्ड इति विश्रुतः ।
चतुर्मूर्त्तिर्जगन्नाथः पूर्वमेव प्रतिष्ठितः ॥
-तत्रैव- ८९/२१ ।

प्रह्लादतीर्थयात्राप्रसङ्गे प्रतिपादितम् । एकोननवतितमाऽध्याये हरिस्तुत्यवसरे ब्रह्मादयः [५८४]जगन्नाथं पुरुषोत्तमं ध्यायन्ति ।

कूर्मपुराणम्-

कूर्मपुराणे श्रीजगन्नाथतत्त्वमाधारीकृत्य अवतारणा साक्षान्नोपलभ्यते । किन्तु इन्द्रद्युम्ननामकः कश्चनः द्विजातिप्रवरः पूर्वजन्मनि राजा आसीदिति दृष्टिगोचरीभूतत्वात्[५८५] स विष्णुभक्तः इन्द्रद्युम्नः इति कथयितुं शक्यते । यदि च स्वयमेव भगवता मुनीनां सविधे कस्यचन इन्द्रद्युम्नस्य अवतारणा कृता, तर्हि जगन्नाथसंस्कृतेः उद्भवार्थं स एव इन्द्रद्युम्नः कथं वा न भवेत् ? अतः जगन्नाथदेवसम्बन्धे स्पष्टं प्रतिपादनं यद्यपि कूर्मपुराणे न प्राप्यते तथापि तत्र जगन्नाथतत्त्वम् उपन्यस्तमिति कथयितुं युज्यते । अधिकन्तु [५८६]तीर्थयात्राप्रसङ्गे पुराणेऽस्मिन् पुरुषोत्तमस्य उदाहरणात् पुरुषोत्तमप्रसिद्ध्या श्रीजगन्नाथस्य प्रसिद्धिरवश्यमेव स्वीकार्या । अतो जगन्नाथचेतनायाः कल्पना तदानीमेव नितरां प्रकटिता आसीत् इति ।

विष्णुपुराणम्-

पुराणेऽस्मिन् भगवतः जगन्नाथस्य विषये अधिकं सुविस्तृतं च तथ्यं प्रतिपादितं स्यात् इति विद्वद्भिः कदाचित् चिन्त्यते । किन्तु ब्रह्मस्कन्दादिपुराणेषु श्रीजगन्नाथदेवमाधारीकृत्य सुविस्तृततया यथा वर्णनमस्ति तथा अस्मिन् पुराणे नोपलभ्यते । केवलमेकवारं

---

५८४. नमस्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।
नमस्ते जगदाधार नमस्ते पुरुषोत्तम ॥
नारायण जगन्मूर्त्ते जगन्नाथ गदाधर ।
पीतवास श्रियः कान्त जनार्द्दन नमोऽस्तुते ॥
-वामनपुराणे- ८९/३७-३८ ।

५८५. अस्ति द्विजातिप्रवर इन्द्रद्युम्नः इति श्रुतः ।
पूर्वजन्मनि राजसावधृष्य शङ्करादिभिः ॥
-कूर्मपुराणे पूर्वार्द्धेः - १/४२-४३ ।

५८६. तीर्थं नारायणस्यान्यन्नम्ना तु पुरुषोत्तमम् ।
तत्र नारायणः श्रीमानास्ते परमपुरुषः ॥
- तत्रैव - ३४/२७ ।

श्रीपुरुषोत्तमायतनस्य [५८७]दक्षवंशवर्णनाप्रसङ्गे श्रवणात् तदेव श्रीपुरुषोत्तमक्षेत्रं जगन्नाथक्षेत्रमिति निश्चीयते ।

एतद्व्यतीतं विष्णुपुराणेऽस्मिन् प्रथमे अंशे [५८८]वारद्वयं, पञ्चमे अंशे [५८९]वारचतुष्टयं जगन्नाथशब्दोच्चारणं दृश्यते। प्रथमांशे [५९०]वारसप्तकं

---

५८७. स चापि भगवान् कण्डुः क्षीणे तपसि सत्तमः ।
पुरुषोत्तममाख्यातं विष्णोरायतनं ययौ ॥
तत्रैकाग्रमतिर्भूत्वा चकाराराधनं हरेः ।
-विष्णुपुराणे प्रथमे अंशे- १५/५२-५३ ।

५८८. (क) देवदेव जगन्नाथ परेश पुरुषोत्तम ।
- तत्रैव - १/१२/३३ ।

(ख) सर्वभूतात्मके तात जगन्नाथे जगन्मये ।
परमात्मनि गोविन्दे मित्रामित्रकथा कुतः ॥
- तत्रैव - १/१९/३७ ।

५८९. (क) जगत्यर्थं जगन्नाथो भारावतरणेच्छया ।
अवतीर्णोऽसि मर्त्येषु तवांशश्चाहमग्रज ॥
- तत्रैव - ५/७/३८ ।

(ख) भूवनेश जगन्नाथ महापुरुष पूर्वज । - तत्रैव - ५/७/५८ ।

(ग) देवदेव जगन्नाथ कृष्ण विष्णो महाभुज ।
- तत्रैव - ५/३१/८ ।

(घ) कृष्ण कृष्ण जगन्नाथ जाने त्वां पुरुषोत्तमम् ।
परेश परमात्मानमनादिनिधनं हरिम् ॥
- तत्रैव - ५/३३/४१ ।

५९०. (क) मूर्त्तामूर्त्तमदृश्यं च दृश्यं च पुरुषोत्तमः ।
यच्चोक्तं यच्च नैवोक्तं मयात्र परमेश्वरः ।
तत्सर्वं त्वं नमस्तुभ्यं भूयो भूयो नमो नमः ॥
- तत्रैव - १/४/२४ ।

(ख) ब्रह्माक्षरमजं नित्यं यथासौ पुरुषोत्तमः ।
तथा रागादयो दोषाः प्रयान्तु प्रशमं मम ॥
-विष्णुपुराणे प्रथमे अंशे- १/१५/५८ ।

(ग) नमस्ते पुण्डरीकाक्ष नमस्ते पुरुषोत्तम'।
- तत्रैव- १/१९/६४ ।

पञ्चमे अंशे [589]वारमेकं, षष्ठे अंशे [592]वारत्रयं च पुरुषोत्तमशब्दोच्चारणं समुपलभ्यते । अतः श्रीजगन्नाथसंस्कृतिप्रसारे विष्णुपुराणस्य आवश्यकता नितरां वर्त्तते ।

श्रीजगन्नाथतत्त्वप्रतिपादकपुराणानां विश्लेषणम्-

श्रीजगन्नाथतत्त्वसकलम् अष्टादशपुराणान्तर्गतेषु ब्रह्म-स्कन्द-नारद-पद्मपुराणेषु सुविस्तृतमेव सन्निवेशितमस्ति । तत्र ब्रह्मपुराणे द्विचत्वारिंशाध्यायात् एकोनसप्तत्यध्यायं यावत् श्रीजगन्नाथदेवस्य पुरुषोत्तमक्षेत्रस्य भौगोलिकस्थित्यादीनां च वर्णना तथा च सप्तसप्तत्यधिकैकशततमाध्यायाष्टसप्तत्यधिकैकशततमाध्याययोः श्रीपुरुषोत्तमक्षेत्रस्य माहात्म्यसम्बन्धि तथ्यं प्रतिपादितम् । स्कन्दपुराणस्य वैष्णवखण्डे पुरुषोत्तममाहात्म्यं प्रथमाध्यायतः आरभ्य एकोनपञ्चाशदध्यायपर्यन्तं तथा च नारदपुराणस्य उत्तरार्द्धे द्विपञ्चाशदध्यायात् एकषष्ठ्यध्यायपर्यन्तं, पद्मपुराणस्य पातालखण्डे सप्तदशाध्यायात् द्वाविंशत्यध्यायं यावत् एतत् जगन्नाथविषयकं तथ्यं समुपलभ्यते । एतेष्वेव पुराणेषु श्रीजगन्नाथः बलभद्रसुभद्राभ्यां सह

(घ) किमप्यचिन्त्यं तव रूपमस्ति तस्मै नमस्ते पुरुषोत्तमाय ।
-विष्णुपुराणे प्रथमे अंशे- १/१९/७५।

(ङ) यः स्थूल सूक्ष्मः प्रकटप्रकाशो यः सर्वभूतो न च सर्वभूतः ।
विश्वं यतश्चैतदविश्वहेतोर्नमोऽस्तु तस्मै पुरुषोत्तमाय ॥
- तत्रैव- १/२०/१३।

(च) तत्रैव- १/१२/३३।

(छ) तत्रैव- ५/३३/४१।

५९१. यज्ञेषु यज्ञपुरुषः पुरुषैः पुरुषोत्तमः ।
इज्यते योऽखिलाधारस्तं द्रक्ष्यामि जगत्पतिम् ॥
- तत्रैव- ५/१७/६ ।

५९२. (क) यदा यदा न यज्ञानामीश्वरः पुरुषोत्तमः ।
इज्यते पुरुषैर्यज्ञैस्तदा ज्ञेयं कलेर्बलम् ॥
- तत्रैव- ६/१/४८।

(ख) ऋग्यजुस्सामभिर्मार्गैः प्रवृतैरिज्यते ह्यसौ ।
यज्ञेश्वरो यज्ञपुमान् पुरुषैः पुरुषोत्तमः ॥ -तत्रैव- ६/५/४२।

उत्कलेषु बहुकालादेव प्रतिष्ठापितः सन् प्रपूजितो भवति ।

ब्रह्मपुराणे प्रथमतः उत्कलक्षेत्रस्य वर्णनाप्रसङ्गे वैतरणीनद्याः पार्श्वे विरजादेव्याः क्षेत्रं समुपदिष्टमस्ति । तत् क्षेत्रस्य दक्षिणे सागरस्य उत्तरस्यां दिशि च मध्यवर्त्तिस्थाने पापनाशकं मुक्तिदं क्षेत्रम् आसीत् यत् खलु [५९३]वालुकाकीर्णत्वेनापि विविधैः द्रुमैः लताप्रभृतिभिः परिपूर्णमासीत् । तत्क्षेत्रं परमदुर्लभं तथा च तस्मिन्नेव क्षेत्रे उत्कलमर्यादां वर्द्धयन् पुरुषोत्तम जगन्नाथः प्रतिष्ठितः इति [५९४]ऋषीणां सविधे ब्रह्मणा उद्घोषितम् । अपि च तत्र उत्कलक्षेत्रस्य उत्कलीयानां च प्रशंसा [५९५]उद्घोष्यते । किन्तु स्कन्दपुराणे महर्षिणा

(ग) नाम्नोऽस्ति यस्य न च यस्य समुद्भवोऽस्ति
वृद्धिर्न यस्य परिणाम विवर्जितस्य ।
नापक्षयं च समुप्यैत्यविकारिवस्तु
यस्तं नतोऽस्मि पुरुषोत्तममीशमीड्यम् ॥
-विष्णुपुराणे प्रथमे अंशे- ६/८/५९ ।

५९३. (क) समुद्रस्योत्तरतीरे तस्मिनूदेशे द्विजोत्तमाः ।
आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ॥
सर्वत्र बालुकाकीर्णं पवित्रं सर्वकामदम् ।
दशयोजनविस्तीर्णं क्षेत्रं परमदुर्लभम् ॥
-ब्रह्मपुराणे- ४२/१३-१४ ।

(ख) आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ।
-नारदपुराणे- ५२/११ ।

५९४. एवं सर्वं गुणोपेतं क्षेत्रं परमदुर्लभम् ॥
आस्ते तत्र मुनिश्रेष्ठा विख्यातः पुरुषोत्तमः ।
यावदुत्कलमर्यादा दिक्क्रमेण प्रकीर्त्तिता ॥
तावत् कृष्णप्रसादेन देशः पुण्यतमो हि सः ।
यत्र तिष्ठति विश्वात्मा देशे च पुरुषोत्तमः ॥
जगद्व्यापी जगन्नाथस्तत्र सर्वं प्रतिष्ठितम् ।
अहं रुद्रश्च शक्रश्च देवश्चाग्नि पुरागमाः ॥ -तत्रैव- ४२/३४-३७ ।

५९५. (क) ये वसन्त्युत्कले क्षेत्रे पुण्ये श्रीपुरुषोत्तमे ।
सफलं जीवितं तेषामुत्कलानां सुमेधसाम् ॥
-ब्रह्मपुराणे- ४२/४६ ।

जैमिनिना ऋषीणां सविधे पुरुषोत्तमतत्त्वं प्रस्तूयते । महर्षिः जैमिनिः सागरस्योत्तरतीरे महानद्याः दक्षिणे भगवतः जगन्नाथस्य पवित्रस्थानमिति ५९६भगवदुक्तेः उद्धारं कृतवान् । सैव महानदी चित्रोत्पलेति ५९७प्रतिपादिता । श्रीक्षेत्रनिर्णये निर्दिष्टं स्थानं क्रमशः इतः सूच्यते । एतत्क्षेत्रवास्तव्यानां पुण्यत्वनिर्धारणप्रसङ्गे एकाम्रकाननदक्षिणोदधितीरयोर्मध्यवर्त्तिस्थानं यत्र पृथिव्याः एकस्तनरूपेण नीलाचलो विराजते तत्र श्रीक्षेत्रमिति ब्रह्मपुराणप्रतिपादनात् ५९८स्कन्दपुराणप्रतिपादनं स्पष्टतरं भवति ।

ब्रह्मपुराणस्य त्रिचत्वारिंशाध्याये चतुश्चत्वारिंशाध्याये च अवन्तीकावर्णनप्रसङ्गे एव पुरुषोत्तमक्षेत्रस्य वर्णना ब्रह्मणा कृत । किन्तु स्कन्दपुराणे उत्कलखण्डे प्रथमाध्यायात् आरभ्य अन्तिमं यावत् पुरुषोत्तमस्य वर्णना समुपलभ्यते । तत्र द्वितीयाध्याये भगवतो ५९९नीलमाधव-

---

(ख) वृहन्नारदीयपुराणे - ५२/३७ अप्येवम् ।

५९६. सागरस्योत्तरे तीरे महानद्यास्तु दक्षिणे ।
स प्रदेशः पृथिव्यां हि सर्वतीर्थफलप्रदः ॥
-स्कन्दपुराणे उत्कलखण्डे- १/३१ ।

५९७. नदी तत्र महापुण्या विन्ध्यपादविनिर्गता ।
चित्रोत्पलेति विख्याता सर्वपापहरा शुभा ॥
- रघुनन्दनभट्टाचार्यकृतपुरुषोत्तमतत्त्वे- पृ०-५ ।

५९८. (क) नाल्पपुण्याः प्रजायन्ते नाभक्ता मयि पद्मज ।
एकाम्रकाननाद्यावद्दक्षिणोदधितीरभूः ॥
पदात्पदाच्छ्रेष्ठतमः क्रमात्परमपावनः ।
सिन्धुतीरे तु यो ब्रह्मन्राजते नीलपर्वतः ॥
-स्कन्दपुराणे उत्कलखण्डे- १/३३/३४ ।

(ख) नीलाचलेन महता मध्यस्थेन विराजितम् ।
एकस्तनमिव पृथ्व्याः सुदूरात् परिभावितम् ॥
-तत्रैव- १/१२ ।

५९९. नीलाख्यं माधवं दृष्ट्वा किं चकार पितामहः ॥ १२ ॥
तद्दर्शने क्षणान्नष्टदेहबन्धं च वायसम् ॥ १३ ॥
नीलाद्रौ माधवं दृष्ट्वा साष्टाङ्गं प्रणिपत्य च ॥ १५ ॥

स्वरूपं तथा च ⁶⁰⁰नीलाश्मविग्रहविषयः प्रतिपाद्यते । ब्रह्मपुराणे मूलतः एव ⁶⁰¹इन्द्रद्युम्ननृपस्य गुणावली तथा च तस्य ⁶⁰²शासितदेशस्य वर्णना

तुष्टाव स जगन्नाथं स्वाधिकारदृढस्थितौ ॥ १६ ॥

- स्कन्दपुराणे उत्कलखण्डे द्वितीयाध्याये ।

६००. तममुं नीलमेघाभं नीलाश्ममणिविग्रहम् ॥

- स्कन्दपुराणे उत्कलखण्डे - २/२५ ।

६०१. पुरा कृतयुगे विप्राः शक्रतुल्यपराक्रमः ।
बभूव नृपतिः श्रीमानिन्द्रद्युम्नः इति श्रुतः ॥
सत्यवादी शुचिर्दक्षः सर्वशास्त्रविशारदः ।
रूपवान् सुभगः शूरो दाता भोक्ता प्रियंवदः ॥
यष्टा समस्तयज्ञानां ब्रह्मण्यः सत्यसङ्गरः ।
धनुर्वेदे च वेदे च शास्त्रे च निपुणः कृती ॥
वल्लभो नरनारीणां पौर्णमास्यां यथा शशी ।
आदित्य इव दुष्प्रेक्ष्यः शत्रुसंघ भयङ्करः ॥
वैष्णवः सत्यसम्पन्नो जितक्रोधो जितेन्द्रियः ।
अध्येता योगसांख्यानां मुमुक्षुर्धर्मतत्परः ॥

- ब्रह्मपुराणे- ४३/१-५ ।

६०२. (क) अवन्तीनामनगरी मालवे भुवि विश्रुता ।
बभूव तस्य नृपतेः पृथिवी कुकुदोपमा ॥

- तत्रैव- ४३/२४ ।

(ख) देवायतनैर्दिव्यैः शोभिता सा महापुरी ।
तत्राऽऽस्ते भगवान्देव त्रिपुरारिस्त्रिलोचनः ॥
महाकालेति विख्यातः सर्वकामप्रदः शिवः ॥

- तत्रैव- ४३/६५-६६ ।

(ग) आस्ते तत्र नदी पुण्या श्रिप्रा नामेति विश्रुता ।
तस्यां स्नातस्तु विधिवत्संन्तर्प्य पितृदेवताः ॥

- तत्रैव- ४३/७५ ।

(घ) इतिहासपुराणानि शास्त्राणि विविधानि च ।
काव्यालापाः कथाश्चैव श्रुयन्तेऽहर्निशं द्विजाः ॥
एवं मया गुणाढ्या सा तदु(सौज्य)यिनी समुदाहृता ।
यस्यां राजाऽभवत्पूर्वमिन्द्रद्युम्नो महामतिः ॥

- तत्रैव- ४३/८८-८९ ।

समुपलभ्यते । विशेषतः चतुश्चत्वारिंशाध्याये उज्जयिन्याः प्रजापतिः स एव [६०३]इन्द्रद्युम्नः [६०४]दक्षिणसागरतीरं गत्वा तत्र त्रैलोक्यपूजितं सुमहत्स्थानं [६०५]ददर्श इति तत्र [६०६]स्कन्दपुराणे प्रतिपादितम्' । ब्रह्मपुराणस्य पञ्चचत्वारिंशाध्याये पुरुषोत्तम-क्षेत्रवर्णनप्रसङ्गे तत्क्षेत्रं किं भगवत्प्रतिमा पूर्वतो न स्थिता इति मुनीनां [६०७]प्रश्नस्योत्तरं ददन् ब्रह्मा यत् कथयति तत्र सारमिदं यथा- सुमेरोः काञ्चनशृङ्गे एकदा [६०८]भगवन्तं

---

६०३. स्वपुरात्स तु निष्क्रान्त उज्जयिन्याः प्रजापतिः ।
बलेन महता युक्तः सभृत्यः स पुरोहितः ॥

- ब्रह्मपुराणे- ४४/१६ ।

६०४. एवं गत्वा स नृपतिर्दक्षिणस्योदधेस्तटम् ।
सर्वैस्तैर्दीर्घकालेन बलैरनुगतः प्रभुः ॥
ददर्श सागरं रम्यं नृत्यन्तमिव च स्थितम् ।
अनेकशतसाहस्रैरूर्मिमिश्च समाकुलम् ॥ - तत्रैव-४४/४३-४४ ।

६०५. एवं सर्वैः समुदितैः शोभितं सुमनोहरैः ।
ददर्श स महीपाल स्थानं त्रैलोक्यपूजितम् ॥
दशयोजनविस्तीर्णं पञ्चयोजनमायतम् ।
नानाश्चर्यसमायुक्तं क्षेत्रं परमदुर्लभम् ॥

-तत्रैव०-४४/७८-७९ ।

६०६. ईदृशं तत्र गत्वैव दक्ष्यसे मां पितामह ।
नीलाद्रेरन्तरभूवि कल्पन्यग्रोध मूलतः ॥
वारुण्यां दिशि यत्कुण्डं रोहिण्यं नाम विश्रुतम् ।
तत्तीरे निवसन्तं मां पश्यन्तश्चर्मचक्षुषा ॥

-स्कन्दपुराणे उत्कलखण्डे- १/३८-३९ ।

६०७. तस्मिन् क्षेत्रवरे पुण्ये वैष्णवे पुरुषोत्तमे ।
किं तत्र प्रतिमा पूर्वं न स्थिता वैष्णवी प्रभो ॥

- ब्रह्मपुराणे - ४५/१ ।

६०८. सुमेरोः काञ्चनशृङ्गे सर्वाश्चर्यसमन्विते ।
सिद्धविद्याधरैः यक्षैः किन्नरैरुपशोभिते ॥ ५ ॥
तत्र स्थितं जगन्नाथं जगत्स्रष्टारमव्ययम् ॥ १६ ॥
सर्वलोकविधातारं वासुदेवाख्यमव्ययम् ।
प्रणम्य शिरसा देवी लोकानां हितकाम्यया ॥ १७ ॥

- तत्रैव- ४५/५/१६-१७ ।

जगन्नाथं मर्त्यवासिन अस्मात् संसारसागरात् कथं मुच्यते इति लक्ष्मीः [609]पप्रच्छ । लक्ष्म्याः प्रश्नस्य उत्तरं जगन्नाथः संक्षेपेण एवं दत्तवान् यत् दक्षिणसागरतीरे कल्पवटमूले वर्त्तमानां देवनिर्मिताम् अविनश्वरीं प्रतिमां दृष्ट्वा नराः मुक्तिं [610]प्राप्नुवन्ति । एतद्दृष्ट्वा एकदा धर्मराट् अस्य प्रतिकारार्थं भगवतः प्रसादं [611]प्रार्थयामास । ततः मया स्वप्रतिमा गोपिता[612] इति । स्कन्दपुराणे इतः किञ्चिद्विलक्षणं तथ्यं प्रतिभाति यत् भगवतः प्रतिमासन्दर्शनेन मर्त्यवासिनामनायासमुक्तिप्राप्तिं परिलक्ष्य स्वाधिकारस्थितौ यम एकदा एतद्व्यापारसंहरणार्थं भगवन्तं

---

६०९. ब्रूहि त्वं सर्वलोकेश संशयं हृदि मे स्थितम् ।
मर्त्यलोके महाश्चर्ये कर्ममूलो सुदुर्लभे ॥
लोभमोहग्रहग्रस्ते कामक्रोधमहार्णवे ।
येन मुच्येत देवेश अस्मात्ससांरसागरात् ॥
-ब्रह्मपुराणे - ४५/१८-१९ ।

६१०. न्यग्रोधस्योत्तरे किञ्चिद् दक्षिणे केशवस्य तु ।
प्रासादस्तत्र तिष्ठेतु पदं धर्ममयं हि तत् ॥
प्रतिमां वै दृष्ट्वा तत्र स्वयं देवेन निर्मिताम् ।
अनायासेन वै यान्ति भूवनं मे ततो नराः ॥
- तत्रैव- ४५/५७-५८ ।

६११. (क) अस्मिन्नायतने पुण्ये विख्याते पुरुषोत्तमे ।
इन्द्रनीलमयी श्रेष्ठा प्रतिमा सर्वकामिकी ॥
तां दृष्ट्वा पुण्डरीकाक्षभावेनैकेन श्रद्धया ।
श्वेताख्यभवनं यान्ति निष्कामाश्चैव मानवाः ॥
अतः कर्तुं न शक्नोमि व्यापारमरिसूदन ।
प्रसीद सुमहादेव संहर प्रतिमां विभो ॥
- तत्रैव- ४५/७१-७३ ।

(ख) नारदपुराणे (५२/८४) अप्येवम् ।

६१२. (क) श्रुत्वा वैवस्वतस्यैतद्वाक्यमेतदुवाच ह ।
यम ! तां गोपयिष्यामि सिकताभिः समन्ततः ॥
ततः सा प्रतिमा देवि वल्लिभिर्गोपिता मया ।
यथा तत्र न पश्यन्ति मनुजाः स्वर्गकाङ्क्षिणः ॥
-ब्रह्मपुराणे - ४५/७४-७५ ।

प्रार्थयामास । ततः भगवतो जगन्नाथस्यादेशेन श्रीः यमं सम्बोधयति यत् पुरुषोत्तमक्षेत्रमिदं भगवता [६१३]अत्याज्यामिति । स्कन्दपुराणे उत्कलखण्डे तृतीयाध्याये श्रीक्षेत्रमाहात्म्यवर्णनप्रसङ्गे मार्कण्डेयमुनिविषयः श्रिया यमस्य सविधे कथितः । चतुर्थाध्यायेऽपि तद्वृन्तान्तेन सह विविधानां क्षेत्राणां वर्णनं कृतमस्ति । ततः सत्ययुगे इन्द्रद्युम्ननामधेयः कश्चन नरपतिः एतत्क्षेत्रम् आगत्य भगवतः दारुमूर्त्तिचतुष्टयस्य निर्माणं करिष्यति, तथा च तासामेव मूर्त्तीनां प्रतिष्ठाता त्वमेव भविष्यसि इति ब्रह्माणं श्रीः [६१४]कथितवती । देव्याः वचनेन सन्तुष्टः ब्रह्मा स्वपुरं गतः इति कथयित्वा महर्षिः जैमिनिः ऋषीणां सविधे दारवीमूर्त्तीनां प्रसङ्गमुत्थाप्य तासां देवतानां [६१५]माहात्म्यं

(ख) नारदपुराणे (५२/८७-८८) अप्येवम् ।

६१३. अत्याज्यमावयोरेतत्क्षेत्रं श्रीपुरुषोत्तमम् ॥ -ब्रह्मपुराणे- २/३३ ।

६१४. इन्द्रद्युम्नो नाम राजा युगे सत्ये भविष्यति ।
वैष्णवः सर्वयज्ञानामाहर्त्ता शास्त्रकोविदः ॥
अत्रागत्य महाभक्तिं करिष्यति नृपोत्तमः ।
भगवत्प्रीतये येन वाजिमेधसहस्रकम् ॥
करिष्यते प्रजानाथ तदनुग्रहकारणात् ।
एकदारुसमुत्पन्नश्चतुर्द्धा सम्भविष्यति ॥
दारवप्रतिमानानि विश्वकर्मा घटिष्यति ।
प्रतिष्ठापयिता त्वं हि इन्द्रद्युम्नप्रसादतः ॥
अस्माकं सदृशानां च प्रतिमानां पितामह ।
तद्रूपका प्रतिष्ठा हि घटना च भविष्यति ॥
-स्कन्दपुराणे उत्कलखण्डे - ४/५८-६२ ।

६१५. ब्रह्मणः श्रुतिवागाहेत्येतदत्रानुभूयते ।
द्यति संसारदुःखानि ददाति सुखमव्ययम् ॥
तस्माद्दारुमयं ब्रह्म वेदान्तेषु प्रगीयते ।
न हि काष्ठमयीं मोक्षं ददाति प्रतिमा क्वचित् ॥
अधिष्ठानं विना ब्राह्म्यमैश्वर्यं नोपलभ्यते ।
रहस्यमेतत् परमं विष्णोः स्थानमनुत्तमम् ॥
अलौकिकी सा प्रतिमा लौकिकीति प्रकाशिता ॥
- तत्रैव - ५/७३-७७ ।

प्रकटितवान् । दारुमयवपुर्धारिणा भगवता इन्द्रद्युम्नाय तत्र तीर्थस्थापनादिनिमित्तं "६१६वरः दत्तः । पुण्डरीका-म्बरीषकनाम्नोः "६१७कुरुक्षेत्रसमुद्भूतयोर्ब्राह्मणक्षत्रिययोः "६१८मुक्तिपथशङ्कानिराकरणार्थं वैष्णवमुखेन श्रीक्षेत्रप्रसङ्ग "६१९उपस्थापितः" । पञ्चमाध्याये वैष्णवोक्त्यनुसारं तौ ब्राह्मणक्षत्रियौ श्रीक्षेत्रं गत्वा भगवत्स्तुतिं कृतवन्तौ ।

---

६१६. इन्द्रद्युम्नाय स वरं तदा दारुवपुर्ददौ ।
दीनानाथैकशरणं तरणं भववारिधेः ॥
चराचरसदावन्द्यचरणं तं परायणम् ।
नारायणं जगद्योनिं सृष्टिसंहृतिकारणम् ॥
मोक्षणं सर्वपापानां दारणं सकलापदाम् ।
विभूतीनां विसरणं वरणं सर्वयोगिनाम् ॥
भरणं सर्वजन्तूनां धरणं जगतामपि ।
भाषणं सर्वभाषाणां दूषणं सर्वदुष्कृताम् ॥
शोषणं सर्वपङ्कानां नीलाद्रिशरणं हरिम् ।
शरणं प्रयात मुनयो ह्यनन्यशरणं विभूम् ॥
निश्चेष्टो दारुवर्ष्मापि दिव्यलीलाविलासकृत् ।
क्षमते स्वल्पभक्त्यापि सोऽपराधशतं नृणाम् ॥

-स्कन्दपुराणे उत्कलखण्डे - ५/७८-८३ ।

६१७. कुरुक्षेत्रे समुद्भूतौ ब्राह्मणक्षत्रियावुभौ ।
सखायौ जग्मतु प्रीत्या एकाहारविहारिणौ ॥
संस्मरतां स्वजातिं तौ पुण्डरीकाम्बरीषकौ ।
निन्दन्तौ दुश्चरित्रं स्वं परस्परमभाषताम् ॥

- तत्रैव - ४/ ८५,९१ ।

६१८. प्रणिपातप्रपन्ना वै पृच्छावोऽत्र च निष्कृतिम् ॥
इति निश्चित्य तौ विप्रानभिवाद्याभ्यपृच्छताम् ।
यथावत्कल्मषं स्वं स्वं विज्ञाप्य च मुहुर्मुहुः ॥

- तत्रैव- ४/९४-९५ ।

६१९. भो द्विज क्षेत्रदायाद पापराशेः सुदारुणात् ।
मुक्तिं चेद्वाञ्छतस्तूर्णं गच्छतं पुरुषोत्तमम् ॥
क्षेत्रोत्तमं दारुमयो यत्रास्ते पुरुषोत्तमः ।
इन्द्रद्युम्नस्य राजर्षेर्भक्त्यानुग्रहकृद्विभुः ॥

तत्र अम्बरीषकृतस्तुतौ भगवत्प्रतिमानां [६२०]प्रतिष्ठास्थलादीनि प्रतिपादितानि । अन्तिमे भगवन्नामग्रहणेन तयोर्मुक्तिलाभप्रसङ्गो वर्णितः । षष्ठाध्याये पवित्रं पुरुषोत्तमाख्यं सुमहत्क्षेत्रं कुत्रेति ऋषीणां प्रश्नस्योत्तरं दत्त्वा महर्षिजैमिनिः भूस्वर्गत्वेन उत्कलदेशस्य प्रसिद्धिं [६२१]प्रख्याप्य तत्र स्थितानां जनानां सदाचारादिनिपुणत्वं महत्त्वं च [६२२]प्रतिपादितवान् । तथ्यमिदं ब्रह्मपुराणस्य षट्चत्वारिंशाध्यायेऽपि

तमाराध्य जगन्नाथं शङ्खचक्रगदाधरम् ।
पापक्षयं वा मुक्तिं वा स्वेच्छया प्राप्स्यथ ध्रुवम् ॥
सुपुण्ये चोत्कलदेशे दक्षिणार्णवतीरगे ।
नीलाद्रिशिखरावासं व्रजतं शरणं विभुम् ॥
सोऽभीष्टसिद्धिं वा देवः प्रदास्यति कृपानिधिः ॥

-स्कन्दपुराणे उत्कलखण्डे - ४/१००-१०२ , १०५-१०६ ।

६२०. दक्षपार्श्वस्थितं तस्य ददृशाते हलायुधम् ।
विभर्त्ति येन ब्रह्माण्डं बलेन महतां विभुः ॥
तं बलं नागराजानं फणासप्तकमण्डितम् ।
कैलासशिखरोतुङ्गं धवलं कुण्डलोज्ज्वलम् ॥
विचित्रवनमालाढ्यं दिव्यनीलनिचोलिनम् ।
सततं वारुणीक्षीव घूर्णोन्नयनपङ्कजम् ॥
निम्नपृष्ठोन्नतोरस्कं कुण्डलीकृतविग्रहम् ।
शङ्खचक्रगदापद्मं समुज्ज्वलचतुर्भुजम् ॥
नानालङ्काररुचिरं नतकल्मषनाशनम् ।
तयोर्मध्ये स्थितां भद्रां सुभद्रां कुङ्कुमारुणाम् ॥
सर्वलावण्यवसतिं सर्वदेवनमस्कृताम् ।
लक्ष्मीं लक्ष्मीशहृदयपङ्कजस्थां पृथक्स्थिताम् ।
वामपर्श्वपस्थितं विष्णोरद्राष्टां चक्रमुत्तमम् ॥
चतुर्द्धावस्थितं विष्णुं दृष्ट्वा तौ द्विजवाहुजौ ॥

-तत्रैव- ५/५९-६७ ।

६२१. भूस्वर्गः साम्प्रतं ह्येषः कथितः पुरुषोत्तमः ।

-तत्रैव- ६/२८ ।

६२२. दक्षिणस्योदधेस्तीरे स तु देशः प्रतिष्ठितः ।
यत्र स्थिता वै पुरुषाः सदाचारनिदर्शनाः ॥

[६२२]परिलक्ष्यते । अधिकन्तु उभयोः पुराणयोर्मध्ये एतद्यावत् आलोचितविषये इदमेव पार्थक्यं परिलक्ष्यते यत् अवन्तीनगराधीशः

वृत्ताध्ययनसम्पन्ना यज्वानो यत्र भूसुराः ।
सृष्ट्यादौ क्रतवो वेदा वेदशास्त्रप्रवर्त्तकाः ॥
अष्टादशानां विद्यानां निधानं सम्प्रकीर्त्तितम् ।
गृहे गृहे निवसति लक्ष्मीर्नारायणाज्ञया ॥
लज्जाशीला विनीताश्च आधिव्याधिविवर्जिताः ।
पितृमातृरताः सत्यवादिनो वैष्णवा जनाः ॥
दीर्घायुषस्तत्र जनाः स्त्रियश्च पतिदेवताः ।
सुशीला धर्मशीलाश्च त्रपाचारित्रभूषिताः ॥
रूपयौवनगर्वाढ्याः सर्वालङ्कारभूषिताः ।
कुलशीलवयोवृत्तानुरूपाचारचञ्चवः ॥
स्वकर्मनिरतास्तत्र प्रजारक्षणदीक्षिताः ।
क्षत्रिया दानशौण्डाश्च शास्त्रशस्त्रविशारदाः ॥
यजन्ते क्रतुभिः सर्वे सततं भूरिदक्षिणैः ।
वैश्याश्च कृषिवाणिज्यगोरक्षावृत्तिसंस्थिताः ॥
शूद्राश्च धार्मिकास्तत्र स्नानदानक्रियारताः ।
कर्मणा मनसा वाचा धनैश्च द्विजसेवकाः ॥
येऽन्ये सङ्करजातास्ते स्वे स्वे धर्मे प्रतिष्ठिताः ॥

-स्कन्दपुराणे उत्कलखण्डे - ६/३-१५ ।

६२३. गङ्गातुल्या महास्रोता दक्षिणार्णवगामिनी ।
महानदीति नाम्ना सा पुण्यतोया सरिद्वरा ॥
हृष्टपुष्टजनाकीर्णा वस्त्रालङ्कारभूषिताः ।
ब्राह्मणाः क्षत्रिया वैश्या शूद्रास्तत्र पृथक् पृथक् ।
स्वधर्मनिरताः शान्ता दृश्यन्ते शुभलक्षणाः ॥
वेदपूर्णमुखा विप्राः सषडङ्गपदक्रमाः ।
सर्वशास्त्रार्थकुशला यज्वानो भूरिदक्षिणाः ॥
स्त्रियस्तद्देशवासिन्यो रूपयौवनगर्विताः ।
सम्पूर्णलक्षणोपेता विस्तीर्णश्रोणीमण्डलाः ॥
कुण्डलैरत्नसंयुक्तैः कर्णपुरैर्मनोहरैः ।
देवयोषित्प्रतीकाशा दृश्यन्ते शुभलक्षणाः ॥
दिव्यगीतवरैर्धन्यैः क्रीडमाना वराङ्गनाः ।

इन्द्रद्युम्न विभिन्नक्षेत्रपरिदर्शनक्रमेण पुरुषोत्तमक्षेत्रं गत्वा तत्र कल्पवटादीन् दृष्ट्वा भगवता स्वकीया इन्द्रनीलमणिमयी प्रतिमा अत्र गोपिता इति विभाव्य एतत् मम मानसक्षेत्रमिति च स्थिरीकृत्य तत्र देवालयनिर्माणनिमित्तं सङ्कल्पं कृतवान् इति [६२४]ब्रह्मपुराणे परिलक्ष्यते । किन्तु स्कन्दपुराणे अस्मिन् विषये भिन्नं प्रतिपाद्यते ।

ब्रह्मपुराणे सप्तचत्वारिंशाध्याये प्रतिपादितं यथा- राजा इन्द्रद्युम्नः पुरुषोत्तमक्षेत्रे भगवतः प्रासादनिर्माणार्थं शास्त्रपारङ्गतान् गणकब्राह्मणान्, अमात्यान्, वास्तुविद्याविशारदान् च आहूय तैः सह आलोच्य भूमिनिर्द्धारणपूर्वकं तस्याः संस्कारं कृतवान् । ततः परं भक्त्या अर्घ्यं प्रदाय स एव राजा कलिङ्गोत्कलकोशलानाम् [६२५]अधिपतीन् आहूय शिलाकर्मविशारदैः सह विन्ध्याचलं गत्वा ततः

वीणावेणुमृदङ्गैश्च पणवश्चैव गोमुखैः ॥
एवमादि तथाऽन्येकगीतवाद्यविशारदाः ।
दिवारात्रौ समायुक्ताः कामोन्मत्ता वराङ्गनाः ॥
भिक्षुवैखानसैः सिद्धैः स्नातकैर्ब्रह्मचारिभिः ।
मन्त्रसिद्धैस्तपसिद्धैर्यज्ञसिद्धैर्निषेवितम् ॥
इत्येवं ददृशे राजा क्षेत्रं परमशोभनम् ॥ - ब्रह्मपुराणे - ४६/३-२४ ।

६२४. इदं तन्मानसं तीर्थं ज्ञात मे पुरुषोत्तमम् ।
कल्पवृक्षो महाकायन्यग्रधो यत्र तिष्ठति ॥
प्रतिमा चेन्द्रनीलाख्या स्वयं देवेन गोपिता ।
न चात्र दृश्यते चान्या प्रतिमा वैष्णवी शुभा ॥
वैष्णवायतनविन्यासे प्रारम्भं च करोम्यहम् ॥
- तत्रैव - ४६/२६-२७, ३० ।

६२५. दत्त्वैवमर्घ्यं विधिवदानाय्य स महीपतिः ।
कलिङ्गाधिपतिं शूरमुत्कलाधिपतिं तथा ।
कोशलाधिपतिं चैव तानुवाच तदा नृपः ॥
गच्छध्वं सहिताः सर्वे शिलार्थे सुसमाहिता ।
गृहीत्वा शिल्पिमुख्यांश्च शिलाकर्मविशारदान् ॥
विन्ध्याचलं सुविस्तीर्णबहुकन्दरशोभितम् ।
निरूप्य सर्वसानूनि च्छेदयित्वा शिलाः शुभाः ॥
- तत्रैव - ४७/७-९ ।

मन्दिरनिर्माणार्थं समुचितशिलाखण्डानामानयनार्थमादिदेश । अतः तदानीन्तनकाले स्वातन्त्र्येण प्रसिद्धा च कलिङ्गोत्कलकोशलसंज्ञका अत्रत्याः त्रयः देशाः परिचिताः आसन् येषां च देशानां परवर्त्तिनि काले सांस्कृतिकसमन्वयः जात इति ज्ञायते । प्रासादनिर्माणाश्वमेधयज्ञयोः समाप्त्यनन्तरमष्टचत्वारिंशाध्याये कथं तत्र देवप्रतिमाः सर्वसाक्षाद्भूताः भविष्यन्ति इत्यत्र [६२६]महाचिन्ताग्रस्तेन इन्द्रद्युम्नेन भगवतः तुष्टिनिमित्तं पञ्चरात्रविधानेन पूजापूर्वकं [६२७]स्तुतिः कृता । एकोनपञ्चाशदध्याये इन्द्रद्युम्नेन कृतायां भगवतः स्तुतौ आदौ अन्ते च [६२८]वासुदेवस्य नामोच्चारणं वर्त्तते । अतः श्रीजगन्नाथसंस्कृतौ वासुदेवः कृष्णवासुदेवो मूलाराध्यदेवः इति ज्ञायते । पञ्चाशदध्याये भगवतः स्तुतिकरणानन्तरम् इन्द्रद्युम्नो भगवतः साक्षाद्दर्शनलाभार्थं भूतले [६२९]कुशशय्यायां सुस्वाप । ततः तस्य तपसा सन्तुष्टेन भगवता स्वप्ने तस्मै स्वरूपदर्शनं दत्त्वा आगामिनि प्रभाते सन्निकटसमुद्रकूलस्यारण्यमध्ये दृश्यमानेन यथा निर्द्दिष्टशुभलक्षणयुक्तेन पादपेन भगवत्प्रतिमानां निर्माणार्थम् उपायः [६३०]कथितः । निद्राभङ्गानन्तरम् अपगतायां क्षपायाम् अश्वारोह्यादि-

---

६२६. चिन्ता तस्य बभूवाथ प्रतिमार्थमहर्निशम् ।
न वेद्मि केन देवेशं सर्वेशं लोकपावनम् ।
सर्गस्थित्यन्तकर्त्तारं पश्यामि पुरुषोत्तमम् ॥
- ब्रह्मपुराणे - ४८/ ४-५ ।

६२७. पञ्चरात्रविधानेन सम्पूज्य पुरुषोत्तमम् ।
चिन्ताविष्टो महीपालः संस्तोतुमुपचक्रमे ॥
- तत्रैव- ४८/१२ ।

६२८. वासुदेव नमस्तेऽस्तु नमस्ते मोक्षकारणम् ।
साङ्गं भवतु तत्सर्वं वासुदेव नमोऽस्तु ते ॥ - तत्रैव- ४९/१, ५९ ।

६२९. चिन्ताविष्टो महीपालः कुशानास्तीर्य भूतले ।
वस्त्रं च तन्मना भूत्वा सुष्वाप धरणीतले ॥
कथं प्रत्यक्षमभ्येति देवदेवजनार्द्दनः ।
मम चाऽऽर्त्तिहरो देवस्तदाऽसाविति चिन्तयन् ॥
- ब्रह्मपुराणे - ५०/२-३ ।

६३०. गतायामथ शर्वर्यां निर्मले भास्करोदिते ।
सागरस्य जलस्यान्ते नानाद्रुमविभूषिते ॥

सैनिकान् विना राजा इन्द्रद्युम्नः एकाकी एव स्वप्ननिर्दिष्टस्थानं गतवान् इति यत् वर्णितमस्ति ततः तदानीं राज्ञः इन्द्रद्युम्नस्य सेनामध्ये अश्वारोहि-पदातिक-गजारोहिप्रभृति-विविधसैनिकाः आसन्, येन तस्य राज्ञः राष्ट्ररक्षणे प्रभूतं सामर्थ्यम् आसीत् इति [६३१]सुस्पष्टं भवति । स्वप्नवृत्तान्तानुसारं सागरजलान्तिके राजा विलक्षणसम्पन्नः सान्द्रमाजिष्ठवर्णाभः एकः महाद्रुमः [६३२]अवलोकितः । तस्य महाद्रुमस्य शातनसमये परशुना विप्ररूपधारिणो विश्वकर्मा विष्णुश्च तत्र उपस्थाय तन्निहितमुद्देश्यं [६३३]दृष्टवन्तौ । वृतान्तसकलस्य अवगत्यनन्तरं विप्रवेशधारिणा विष्णुना इन्द्रद्युम्नस्य इप्सितप्रतिमानां तत्क्षणं निर्माणे स्वसहायकस्य परमसामर्थ्यं [६३४]सूचयन् निकटस्थवृक्षच्छायायां क्लान्तोपनोदनार्थं राजा प्रवोधितः । वृक्षच्छायायाम् आगते राजनि

जलं तथैव वेलायां दृश्यते तत्र वै महत् ।
लवणस्योदधे राजस्तरङ्गैः समभिलुप्तम् ॥
कुलान्ते हि महावृक्षः स्थितः स्थलजलेषु च ।
वेलाभिर्हन्यमानश्च न चासौ कम्पते द्रुमः ॥
परशुमादाय हस्तेन उर्मेरन्तस्ततो व्रज ।
एकाकी विहरन्राजन् त्वं पश्यसि पादपम् ॥
ईदृक् चिह्नं समालोक्य छेदयत्वमशङ्कितः ।
छेदमानं तु तं वृक्षं प्रातरद्भुतदर्शनम् ॥
दृष्ट्वा तेनैव संचिन्त्य ततो भूपालदर्शनात् ।
कुरुतां प्रतिमां दिव्यां जहि चिन्ताविमोहिनीम् ॥

– ब्रह्मपुराणे - ५०/१०-१५ ।

६३१. न चाश्वो न पदातिश्च न गजो न च सारथिः ।
एकाकी स महावेलां प्रविवेश महीपतिः ॥ – तत्रैव - ५०/२० ।

६३२. महोत्सेधं महाकायं प्रसुप्तं च जलान्तिके ।
सान्द्रमांजिष्ठवर्णाभं नामजातिविवर्जितम् ॥ –तत्रैव- ५०/२२ ।

६३३. तावच्चतुर्महाराज किमत्र त्वं करिष्यसि ।
किमर्थं च महावाहो शक्तिश्च वनस्पतिः ॥ – तत्रैव - ५०/२७ ।

६३४. अयं मम सहायस्तु आगतः शिल्पिनां वरः ।
विश्वकर्मसमः साक्षान्निपुणः सर्वकर्मसु ।
मयाऽऽदिष्टां तु प्रतिमां करोत्येष तटं त्यज ॥ –तत्रैव - ५०/४० ।

भगवता विप्रवेशधारिणा स्वसहायकं प्रति शङ्खचक्रायायुधयुक्तस्य कृष्णस्य, लाङ्गलधरस्य गौराङ्गस्य बलभद्रस्य अनन्तस्य वा, रुक्मवर्णायाः वासुदेवस्य भगिन्याः सुभद्रायाः च मूर्त्तिनिर्माणार्थं [६३५]आज्ञादिता । आज्ञानुसारे तत्क्षणमेव यथानिर्दिष्टप्रतिमानां [६३६]निर्माण सम्पादितम् । इत्थम् अद्भुतकर्मणा राजा तयोः शरणं गतः इति [६३७]उपलभ्यते । एकपञ्चाशदध्याये विप्रवेशधारिणा भगवता विष्णुना स्वपरिचयदानानन्तरमिन्द्रद्युम्नाय वरयाचनार्थं [६३८]बोधितव्यम् । तदा भगवत्पदप्राप्तिनिमित्तमिन्द्रद्युम्नस्याभिलाषं ज्ञात्वा भगवान् श्रीजगन्नाथः तस्मै तद्वरं दत्तवान् । तदवसरे यज्ञाङ्गदानसम्भवस्य सरसः इन्द्रद्युम्नसरः इति नाम [६३९]सूचितम् । तत्र पिण्डदानादिना पितृलोकानां शक्रलोकलाभः भविष्यति इति भगवता तदवसरे उद्घोषितम् ।

---

६३५. ततस्तस्मै स विश्वात्मा ददावाज्ञां द्विजाकृतिः ॥
शिल्पिमुख्याय विप्रेन्द्राः कुरुष्व प्रतिमा इति ।
कृष्णरूपधरं शान्तं पद्मपत्रायतेक्षणम् ॥
श्रीवत्सकौस्तुभधरं शङ्खचक्रगदाधरम् ।
गौराङ्गं क्षीरवर्णाभं द्वितीयं स्वस्तिकाङ्कितम् ॥
लाङ्गलास्त्रधरं देवमनन्ताख्यं महाबलम् ।
देवदानवगन्धर्वयक्षविद्याधरगैः ॥
न विज्ञातो हि तस्यान्तस्तेनानन्त इति स्मृतः ।
भगिनीं वासुदेवस्य रुक्मवर्णां सुशोभनाम् ॥
तृतीया वै सुभद्रां च सर्वलक्षणलक्षिताम् ॥
- ब्रह्मपुराणे - ५०/४२-४७ ।

६३६. तत्क्षणात्कारयामास प्रतिमाः शुभलक्षणाः ॥
- तत्रैव - ५०/४८ ।

६३७. न वेद्मि सत्यसद्भावौ मायारूपेण संस्थितौ ।
युवां गतोऽस्मि शरणमाला तुं मे प्रकाश्यताम् ॥
- तत्रैव - ५०/५९ ।

६३८. निर्गुणं निर्मलं शान्तं यत्पश्यन्ति मनीषिणः ।
तत्पदं गन्तुमिच्छामि त्वत्प्रसादात्सुदुर्लभम् ॥ -तत्रैव - ५१/२१ ।

६३९. (क) इन्द्रद्युम्नसरोनाम तीर्थं यज्ञाङ्गसम्भवम् ।
यत्र नीत्वा सकृत्लोकः शक्रलोकमवाप्नुयात् ॥

इन्द्रद्युम्नसरसः दक्षिणपार्श्वस्थवटवृक्षस्याधः स्थितमण्डपे आषाढशुक्लपक्षे मघानक्षत्रयुक्तायां पञ्चम्यां तिथौ तासामेव प्रतिमानां सप्तदिनात्मकं प्रतिष्ठाकर्मसमाप्य ततः नूतने मण्डपे स्थापनार्थं भगवतोद्घोषितम् । तद्दर्शनेन नराः मोक्षं प्राप्स्यन्ति इत्यपि भगवता स्वयं तत्र [६४०]कथितम् । ततः विश्वकर्मणा सह भगवतः अन्तर्धानानन्तरं राजा इन्द्रद्युम्नः पुरोहितादिभिः स्वकीयराजपुरुषैः च सह प्रतिमात्रयं विमानसन्निभैः रथैः आनीय शुभकाले एव पूर्वनिमिते प्रासादे [६४१]स्थापितवान् इति तथ्यं तत्र प्रकटितमस्ति ।

स्कन्दपुराणस्य वैष्णवखण्डे पुरुषोत्तममाहात्म्यस्य सप्तमाध्याये

दापयिष्यति यः पिण्डांस्तटेऽस्मिन्सरसः शुभे ।
कुलैकविंशमुद्धृत्य शक्रलोकं गमिष्यति ॥

-ब्रह्मपुराणे - ५१/२९-३० ।

(ख) नारदपुराणे (५४/१००) अप्येवम् ।

६४०. सरसो दक्षिणभागे नैऋत्यां तु समाश्रिते ।
न्यग्रोधस्तिष्ठते तत्र तत्समीपे तु मण्डपः ॥
आषाढस्य सितेपक्षे पञ्चम्यां पितृदैवते ।
ऋक्षे नेष्यन्ति नस्तत्र नीत्वा सप्तदिनानि वै ॥
मण्डपे स्थापयिष्यति................ ॥

-तत्रैव - ५१/३२,३६-३७ ।

६४१. ततः कृष्णं च रामं सुभद्रां च वरप्रदाम् ।
रथैर्विमानसंकाशैर्मणिकाञ्चनचित्रितैः ॥
संवाह्य तास्तदा राजा महामङ्गलनिःस्वनैः ।
आनयामास मतिमान् सामात्यः सपुरोहितः ॥
नानावादित्रनिर्घोषैर्नानावेदस्वनैः शुभैः ।
संस्थाप्य च शुभदेशे पवित्रे सुमनोहरे ॥
ततः शुभे तिथौ काले नक्षत्रे शुभलक्षणे ।
प्रतिष्ठां कारयामास सुमुहूर्ते द्विजैः सह ॥
कृत्वा प्रतिष्ठां विधिवत्प्रासादे भवनोत्तमे ।
स्थापयामास तान्सर्वान्विधिदृष्टेन कर्मणा ॥

-तत्रैव - ५१/४८-५१, ५४ ।

किं तावत्क्षेत्रं यत्र जगन्नाथस्य [६४२]साक्षाद्दर्शनं मिलिष्यति इति राजा इन्द्रद्युम्नकृतस्य प्रश्नस्य उत्तरं ददन् तीर्थपर्यटकः कथयति यत् दक्षिणसागरतीरे भारतवर्षे ओड्रदेशे नीलगिरौ कल्पवटरोहिणी-कुण्डयोर्मध्ये भगवतो [६४३]मूर्त्तिर्विराजिता इति । तस्य पश्चिमस्यां दिशि शवरालयवेष्टितः शवरदीपक इति प्रसिद्धः [६४४]आश्रमश्रेष्ठः आस्ते । तत्र एकवर्षात्मकव्रतकरणावसरे[६४५] एका पौराणिकी कथा तेन श्रुता यत् तृषार्त्तः वायसः जलपानार्थं रोहिणीकुण्डम् आगत्य तत्र पतितः । स्वप्राणविसर्जनात् वायसः मुक्तिं [६४६]लब्धवान् इति उक्त्वा स एव परिव्राजकः अन्तर्द्धानं गतः[६४७] । इतः स्पष्टमेव भेदोऽयं परिलक्ष्यते यत्

---

६४२. आदृतो व्याजहारेदं ज्ञायतां क्षेत्रमुत्तमम् ।
यत्र साक्षाज्जगन्नाथं पश्यामोऽनेन चक्षुषा ॥
- स्कन्दपुराणे उत्कलखण्डे - ७/१८ ।

६४३. ओड्रदेश इति ख्यातो वर्षे भारतसंज्ञिते ।
दक्षिणस्योदधेस्तीरे क्षेत्रं श्रीपुरुषोत्तमम् ॥
यत्र नीलगिरिर्नाम समन्तात् काननावृत्तः ।
तस्योत्सर्गे कल्पवृक्षः समन्तात्क्रोशसंमित्तः ॥
तस्य पश्चाद्दिशि ख्यातं कुण्डं रोहिणसंज्ञितम् ।
तस्य प्राकटमास्थाय नीलेन्द्रमणिनिर्मिता ॥
तनुः श्रीवासुदेवस्य साक्षात्मुक्तिप्रदायिनी ॥
- तत्रैव- ७/२३-२७ ।

६४४. तत्रास्ते आश्रमश्रेष्ठः ख्यातः शबरदीपकत्र ।
पश्चिमस्यां दिशि विभोर्वेष्टितः शवरालये ॥
-तत्रैवे - ७/२८-२९ ।

६४५. तत्रोषितं मया राजन्वर्षं श्रीपुरुषोत्तमे ।
तुष्ट्यर्थं देवदेवस्य व्रतिना वनवासिना ॥
-तत्रैव- ७/३१ ।

६४६. तृषार्त्तो रौहिणो कुण्डे जलं पातुं समागतः ॥
त्यक्त्वा कालवशात्प्राणान्विष्णुसारूप्यमाप्तवान् ॥
-तत्रैव- ७/३५-३६ ।

६४७. एवमुक्त्वा तु जटिलः सर्वेषां पश्यतां तदा ।
अन्तर्द्धानं जगामाशु राजा परमविस्मयम् ॥ -तत्रैव- ७/४० ।

ब्रह्मपुराणे स्वयमेव राजा पुरुषोत्तमक्षेत्रमागत्य क्षेत्रमाहात्म्यं सर्वं ज्ञातवान् । किन्तु स्कन्दपुराणीयतथ्यानुसारं दैववाणीतः एव राजा इन्द्रद्युम्नः सर्वमेतत् ज्ञातवान् इति ।

राज्ञः उद्देशस्य सफलीकरणार्थं पुरोहितेन स्वभ्राता विद्यापतिः अन्यैर्देशभ्रमणाभिज्ञैः चारैः सह प्रेषित इति राजपुरोहितयोः [६४८]संवादात् ज्ञायते । ततो विद्यापतिर्दक्षिणदिशं प्रति अग्रसरो भूत्वा बहुदिनान्यतीत्य महानदीं समुत्तीर्य एकाम्रकाननं च [६४९]विलंघ्य अन्तिमे नीलाचलं प्रविवेश । तत्र नीलाचलस्य यादृशं वर्णनं सन्निवेशितं तत्र कल्पवृक्षसुशोभितः एको [६५०]गिरिरासीत् इति परिलक्ष्यते । नीलाचलस्योपत्यकायां गम्यमानेऽपि मुकुन्दालोकनोत्सुकेन विद्यापतिना अग्रसरो भवितुं पन्थानं न प्राप्य भृशं दुःखितमनसा यदा भूमौ कुशान् आस्तीर्य शयनं कृतं तदा मिथसम्भाषणं कुर्वतां भगवद्भक्तिविषयं संलापमनुसृत्य उत्थाय चलता तेन कियद्दूरे द्विजपरिवेष्टितः शबरदीपकः इति [६५१]आश्रमो दृष्टः, यत्र शंखचक्रगदाधराः विष्णुभक्ताः विश्वावसुनामधेयः शवरश्च विराजमानाः आसन् । विद्यापतिं दृष्ट्वा अतिथिपरायणेन विश्वावसुना तत्कृते

---

६४८. भ्राता विद्यापतिर्नाम कनीयान्मे व्रजिष्यति ।
देशभ्रमणशीलैश्च चारैः सह तवाधुना ॥
-स्कन्दपुराणे उत्कलखण्डे - ७/४८ ।

६४९. विलंघ्यैकाम्रकवनं यावदायाति स द्विजः ॥
- तत्रैव- ७/७४ ।

६५०. अपश्यत्काननाकीर्णं कल्पन्यग्रोधभूषितम् ।
नीलाचलं लिखन्तं स्वं पश्यतां पापनाशनम् ॥
अत्यद्भुतं निवसर्तिं साक्षात्तनुभृतो हरेः ॥
- तत्रैव- ७/७८-७९ ।

६५१. ददर्श शबरागारैर्वेष्टितं परितो द्विजाः ।
क्षेत्रस्य द्वीपसंस्थानं ख्यातं शबरदीपकम् ॥
ददर्श विष्णुभक्तांस्ताञ्छङ्खचक्रगदाधरान् ॥
प्रणम्य शिरसा विप्रस्तथौ बद्धाञ्जलिस्तदा ।
ततो विश्वावसुर्नाम शबरः पलिताङ्कः ॥ -तत्रैव- ७/८३-८५ ।

आसनादि [६५२]उपहृतम् । आगमनस्य कारणं यदा विश्वावसुना पृष्टं तदा साक्षान्नीलमाधवदर्शनलाभार्थं स [६५३]प्रेषितः इति विद्यापतिना उत्तरितम् ।

अष्टमाध्याये विद्यापतेः अभिप्रायं ज्ञात्वा [६५४]पुरातनजनप्रवादं संस्मरन् इन्द्रद्युम्ननामधेयस्य कस्यचन नरपतेः क्षेत्रमिदं प्रति दूतप्रेषणावसरे भगवान् अन्तर्द्धानं गमिष्यतीति विभाव्य ब्राह्मणातिथेः मनस्कामनापूर्त्तिरवश्यं कर्त्तव्या इति निश्चित्य च विश्वावसुः तस्मै सकलवृत्तान्तं विनिवेद्य शैलवर्त्मना तं [६५५]विद्यापतिं चालितवान् । पथि रौहिण्यकुण्डस्य सविधे उपस्थाय तं महातीर्थत्वेन प्रशंसय ततः पूर्वभागे कल्पवटमन्तरा जगन्नाथं साक्षाद्रष्टुं विश्वावसु [६५६]विद्यापतिमुक्तवान् । सुयोगं प्राप्य विद्यापतिः रौहिण्यकुण्डेऽस्मिन्

---

६५२. पाद्यमासनमर्घ्यं च दत्वा विश्वावसुर्द्विजम् ।
उवाच प्रश्रयागिरा प्रस्तुतं प्रतिपादयन् ॥
-स्कन्दपुराणे उत्कलखण्डे - ७/९० ।

६५३. यदर्थमागतं दुरात् साधु तत्सफलं कुरु ।
इन्द्रद्युम्नस्य नृपतेरवन्तिपुरवासिनः ॥
पुरोहितोऽहं संप्राप्तो विष्णोर्दशनलालसः ।
राज्ञाग्रे तैर्थिकानां हि समाजावसरे श्रुतम् ॥
प्रेषितोऽहं हरिं द्रष्टुमन्त्रस्थं नीलमाधवम् ।
दृष्ट्वा यावन्नरपतेर्वार्त्तां नेष्यामि सोऽप्यहम् ॥
निराहारो ध्रुवं साधो ! तन्मां विष्णुं प्रदर्शयः ॥
-तत्रैव- ७/९४-९५, ९८-९९ ।

६५४. अस्मिन्नन्तर्हिते देवे भूम्यन्तर्लीनमाधवे ।
इन्द्रद्युम्नो नरपतिः शक्रतुल्यपराक्रमः ॥
मनुष्यवपुषा यो वै ब्रह्मलोकं व्रजेदपि ।
सोऽस्मिन् प्रजाभिरागत्य वाजिमेघशतेन च ॥
इष्टवा दारूमयं विष्णुं चतुर्द्धा स्थापयिष्यति ॥
-तत्रैव- ८/५-७ ।

६५५. उपर्युपर्युपारुह्य शिला विषभवर्त्मनि ॥ -तत्रैव- ८/१३ ।

६५६. एतयोरन्तरे ब्रह्मनिकुञ्जाभ्यन्तरे स्थितम् ।
पश्य साक्षाज्जगन्नाथं वेदान्तप्रतिपादितम् ॥
- तत्रैव - ८/१८ ।

स्नानं समाप्य जगन्नाथं दृष्टवान् । ततः प्रणतिपूर्वकं तस्य स्तुतिं विधाय विद्यापतिः आत्मानं यदा कृतार्थं मनुते स्म तदा रात्र्यागमनं सूचयन् हिंस्रप्राणिभ्यः सुरक्षानिमित्तम् आकाशे भानोर्विराजमानावस्थायामेव अवश्यं गृहं [६५७]प्रत्यावर्त्तनीयम् इति संबोध्य विश्वावसुः सायाह्ने एव निजालयं विद्यापतिना सह [६५८]प्रविवेश । तत्र विविधैः नैवेद्यैः विप्रः विद्यापतिः विश्वावसुना [६५९]परितोषितः । तादृशभोज्यानां सन्निधानात् विस्मयोपागतं विद्यापतिं श्रीजगन्नाथदेवस्य पूजनाय शक्रादयो देवाः प्रतिदिनं यानि वस्तूनि आनयन्ति तानि [६६०]एतान्येवेति विश्वावसुः सम्बोधितवान् । विश्वावसोः विष्णुभक्तिभावेन सह सख्यभावं परिलक्ष्य तेन सह मित्रतास्थापनार्थं [६६१]विद्यापतिः इप्सितवान् । तदवसरे भगवतः

---

६५७. कृतार्थस्त्वं प्रभुं दृष्ट्वा साम्प्रतं द्विजपुङ्गव ।
दिनान्तोऽभूद् गृहं यावः क्षुधितोऽसि श्रमान्वितः ॥
वासोऽप्यरण्ये हिंस्राणां नास्माकमुचिता स्थितिः ।
यावद्भानोर्भान्ति भासस्तावद्यामो निजालयम् ॥
-स्कन्दपुराणे उत्कलखण्डे - ८/३६-३७ ।

६५८. एवं व्रजन्तौ तौ विप्रशवरौ शवरालयम् ।
सायाह्ने तमनुप्राप्तौ वैष्णवाग्र्यौ तु भो द्विजः ॥
-तत्रैव- ८/४१ ।

६५९. तत्रातिथिमनुप्राप्तं ब्राह्मणं शवरोत्तमः ।
भक्ष्यभोज्यविधानैश्च विविधैः समपूजयत् ॥
-तत्रैव- ८/४२ ।

६६०. शक्रादयो देवगणाः समायान्त्यन्वहं द्विज ।
दिव्योपचारानादय पूजनाय जगत्पतेः ॥
पूजयित्वा जगन्नाथं स्तुत्वा नत्वा च भक्तितः ।
गीतवादित्रनृत्यैश्च सन्तोष्य पुरुषोत्तमम् ॥
पुनः प्रयान्ति सततं त्रिदिवं सुरसत्तमाः ।
दिव्यान्येतानि वस्तूनि निर्माल्यानि जगत्पतेः ॥
-तत्रैव- ८/५४-५६ ।

६६१. पुनः प्रोवाच शवरं मयि ते चेदनुग्रहः ।
साधो सख्यं त्वया कार्यमिति मे निश्चयो महान् ॥
-तत्रैव- ८/६४ ।

समाराधनस्थलादिनिर्णयार्थं राज्ञा ६६२इन्द्रद्युम्नेन स विद्यापतिः प्रेषित इत्यादि सकलवृत्तान्तं ज्ञात्वा विश्वावसुः तत्र श्रुतं ६६३पुराणवचनं प्रतिपादितवान् । इन्द्रद्युम्नः साक्षान्माधवं कदाचित् द्रष्टुं न ६६४पारयिष्यति इति तत्र विश्वावसुवचनात् परिलक्षितम् । ततः परं स एव विद्यापतिः अवन्तीनगराभिमुखेनागतः ।

नवमाध्याये विद्यापतेः प्रत्यागमनानन्तरं नीलगिरौ प्रखरवालुकावातः सञ्जातः येन इन्द्रनीलमणिमयी देवप्रतिमा वालुकाराशौ अन्तर्हिता । देवदर्शनार्थम् आगतैः सुरैस्तत्र अनुभूतमेतत् इति स्पष्टं ६६५प्रतिभाति । तत्र जगन्नाथदर्शनाभावात् दुःखिताः देवाः 'इतः परं भगवतः प्रतिमायाः दर्शनं दुर्लभं भविष्यति' इति दैववाणीं

---

६६२. इन्द्रद्युम्नो नरपतिर्मयि प्रत्यागते सखे ॥
भगवन्तं समाराद्धुमिहैव स निवत्स्यति ।
प्रासादं विपुलं चात्र चिकिर्षुर्भगवत्प्रियम् ॥
सहस्रमुपचाराणां पूजनाय जगत्पतेः ।
रचयिष्यामीति महत्प्रतिज्ञासीन्महीपतेः ॥
-स्कन्दपुराणे उत्कलखण्डे- ८/६९-७१ ।

६६३. सखे पुरातनी वार्त्ता प्रसिद्धैवात्र तादृशी ॥
त्वया यथैव कथित इन्द्रद्युम्नसमागमः ॥
- तत्रैव- ८/७३-७४ ।

६६४. केवलं माधवं तत्र न द्रक्ष्यति महीपतिः ॥
अचिरादेव भगवान्स्वर्णवालुकयावृतः ।
प्रतियज्ञे यमायैतदन्तर्द्धानं गमिष्यति ॥
- तत्रैव - ८/७४-७५ ।

६६५. प्रत्यागते ततो विप्रे सायाह्ने सुरसङ्कुले ।
माधवार्च्चनवेलायां वातचण्डगतिर्विभौ ॥
सुवर्णवालुकाश्वासौ विचकार च सर्वशः ।
तेनाकुलदृशो देवा न शेकुरवलोकने ॥
श्रीकान्तस्य तदा विप्रा दध्युस्ते पुरुषोत्तमम् ।
यावद्ध्यानस्थिरदृशो मुहूर्त्तं ते दिवौकसः ॥
ध्यानान्ते वालुकाराशिं ददृशुस्ते न माधवम् ॥
-तत्रैव- ९/१-४ ।

श्रुत्वा ततः स्वयम्भुवः समीपं गत्वा यमानुरोधवृत्तान्तं दारुब्रह्मण अवतारकथां च ६६६समाकर्ण्य स्वस्वपुरं गता । विद्यापतिरपि हृष्टमनसा रथमारुह्य अवन्तीनगरीमागतवान् । तत्र राज्ञः इन्द्रद्युम्नस्य सविधे विद्यापतिः वृत्तान्तसकलं विनिवेद्य स्वानीतभगवदाज्ञामालां राज्ञः गले आमुमोच । राजाऽपि तेन अत्यन्तं आनन्दितश्च ६६७कृतार्थश्च ज़ातः । तदवसरे विद्यापतिना श्रीक्षेत्रमाहात्म्यमपि किञ्चित् ६६८उपन्यस्तम् ।

दशमाध्याये पुरुषोत्तमक्षेत्रलब्धविषये भगवत्प्रतिमा-सन्दर्शनलाभादिविषये विद्यापतिः पूर्वोक्तवृत्तान्तसकलं उत्थाप्य भगवत्प्रतिमाया स्थितिस्वरूपादिविषये तथ्यं ६६९प्रतिपादितवान् । ततः

---

६६६. एवं प्रलयतां तत्र सर्वेषां त्रिदिवौकसाम् ।
अशरीरा तदा वाणी पुनः प्रादुर्बभूव ह ॥
अत्रार्थे भोः सुरा यत्नं कर्त्तुमर्हथ नो वृथा ।
अद्य प्रभृतिदेवस्य दर्शनं दुर्लभं भुवि ॥
अत्र स्थानेऽपि तं नत्वा तद्दर्शनफलं लभेत् ।
स्वयम्भुवोऽन्तिकं गत्वा हेतुं ज्ञास्यथ निश्चितम् ॥
तच्छ्रुत्वा त्रिदशाः सर्वे ब्रह्मणोऽन्तिकमागताः ।
यमानुग्रहवृत्तान्तमवतारं च दारुणः ॥

-स्कन्दपुराणे उत्कलखण्डे - ९/१७-२० ।

६६७. इत्युच्चरन्नरपतेरामुमोच गले स्रजम् ।
सोऽप्युत्थाय क्षितिपतिर्मालां हृदयलम्बिनीम् ॥
दृष्ट्वा मेने श्रियः कान्तं साक्षाद् हृदयगामिनम् ।
निधाय पाणीशिरसि दरमिलितलोचनः ॥
आनन्दाश्रुजलक्लिन्नवदनस्तुष्टुवे हरिम् ॥

-तत्रैव- ९/४५-४७ ।

६६८. भुक्तिर्मुक्तिश्च वै राजन्द्वे तत्र युगपत्स्थिते ।
न जरारोगशोकादिदुःखं तत्र हि विद्यते ॥
यत्र साक्षाज्जगन्नाथः प्रसन्नवदनो विभुः ।
फुल्लेन्दीवरपत्राक्षः प्रपन्नामृतमुक्तिदः ॥

-तत्रैव- ९/६८-६९ ।

६६९. इन्द्रनीलमयो देव आस्ते चक्रगदाधरः ।
एकाशित्युङ्गलमितः स्वर्णपद्मोपरि स्थितः ॥

कृतकृत्यो राजा इन्द्रद्युम्नः श्रीपुरुषोत्तमक्षेत्रं गत्वा तत्र उपोष्य यज्ञादिभिः भगवतः सन्तोषार्थं यदा [६७०]ऐच्छत् तदानीमेव देवर्षेर्नारदस्य [६७१]उपस्तितिर्जाता । तत्र नारदः इन्द्रद्युम्नस्य तपस्याचरणादि साफल्यसकलमुक्त्वा विष्णुभक्तेः [६७२]माहात्म्यं प्रतिपादितवान् । विष्णुभक्तिविषये प्रभूतजिज्ञासायां नारदः तामसी राजसी सात्त्विकी चेति [६७३]त्रिविधाभक्तिं सूचयन् सात्त्विक्याः [६७४]सर्वोत्तमत्वं प्रतिपादितम् । वैष्णवलक्षणानि प्रतिपाद्य वासुदेवभक्तानां विलक्षणसम्पन्नानि

अष्टमीचन्द्रसकलशोभाविजयिभालभूः ।
स्मेरेन्दीवरयुग्मश्रीधिक्कारोद्यतलोचनः ॥

-स्कन्दपुराणे उत्कलखण्डे - १०/१८-१९ ।

६७०. सर्वात्मनाहं यास्यामि राज्येन सुसमृद्धिना ।
तत्रावासं करिष्यामि पुरदुर्गाणि चैव हि ॥
क्रतुना ह्यमेधेन यक्ष्ये प्रीत्यै मुरद्विषः ।
शतोपचारैः श्रीनाथं पूजयिष्ये दिने दिने ॥

-तत्रैव- १०/५०-५१ ।

६७१. नारदस्तत्र सम्प्राप्तो भूवनालोककौतुकी ॥

-तत्रैव- १०/५४ ।

६७२. समूह ऐषामेकत्र गुणितः कोटिकोटिभिः ।
विष्णुभक्तेः सहस्रांशसमोऽसौ नहि कीर्त्तितः ॥

-तत्रैव- १०/७४ ।

६७३. कामक्रोधभिभूतानां दृष्ट्वा यान्यं न पश्यताम् ।
लब्धये चाभिचाराय भक्तिः स्यानृप तामसी ॥
यशसे चातिरिक्ताय परस्य स्पर्द्धयापि वा ।
प्रसङ्गात्परलोकस्य भक्तिः सा राजसी स्मृता ॥
आमुषिकं स्थिरतरं दृष्ट्वा भावान्विनश्वरान् ।
पश्यताश्रमवर्णोक्तान्धर्मान्नेव जिहासता ॥
आत्मज्ञानाय या भक्तिः क्रियते सा तु सात्त्विकी ॥

- तत्रैव- १०/८३-८६ ।

६७४. तामसो राजसीं कुर्याद्राजसः सात्त्विकीं तथा ।
सात्त्विको मुक्तिमाप्नेति कृत्वा चाद्वैतभावनाम् ॥

-तत्रैव- १०/९० ।

[675]लक्षणानि अपि नारदेन प्रतिपादितानि ।

एकादशाध्याये नीलमाधवस्य अर्च्चनार्थं व्याकुलितहृदयस्य इन्द्रद्युम्नस्य कार्त्तज्ञवचनं श्रुत्वा देवर्षिः नारदः सन्तुष्टः सन् नीलमाधवस्य संदर्शनार्थं रथेन पुरुषोत्तमक्षेत्रभ्रमणार्थं च एकमतः [676]जातः । राज्ञः इन्द्रद्युम्नस्य इच्छानुसारं भगवान् [677]चतुर्द्धामूर्त्ति-विशिष्टं भविष्यति इति सूचितवान् नारदः । ततः परस्मिन्नेव दिवसे ज्येष्ठशुक्लपक्षस्य पञ्चम्यां तिथौ बुधवासरे उत्तमलग्नसंयुते पुष्यानक्षत्रे नीलाद्रिगमनार्थं व्यवस्थां कारयामास राजा [678]इन्द्रद्युम्नः ।

---

६७५. प्रशान्तचित्ताः सर्वेषां सौम्याः कामजितेन्द्रियाः ।
कर्मणा मनसा वाचा परद्रोहमनिच्छवः ॥
दयार्द्रमनसो नित्यं स्तेयहिंसापराङ्मुखाः ।
गुणेषु परकार्येषु पक्षपातमुदान्विताः ॥
सदाचारासदाताश्च परोत्सवनिजोत्सवाः ।
पश्यन्तः सर्वभूतस्थं वासुदेवममत्सराः ॥
-स्कन्दपुराणे उत्कलखण्डे - १०/१००-१०२ ।

६७६. त्वत्सन्निधानाद्भगवंस्तमो मे नाशमभ्यगात् ।
यन्मे त्वरयते चित्तमर्चितुं नीलमाधवम् ॥
वेत्सि ब्रह्माण्डवृत्तान्तं पर्यटन् सार्वलौकिकः ।
तदाऽऽवां रथमास्थाय पश्यावो नीलमाधवम् ॥
-तत्रैव- ११/४-५ ।

६७७. तवानुग्रहतः शीघ्रं चतुर्द्धा संव्यवस्थितम् ॥
-तत्रैव- ११/८ ।

६७८. एवं कथान्ते तौ प्रीतावहः कृत्यं समाप्य च ॥
यात्रानुकूलं निर्णीय पञ्चम्यां बुधवासरे ।
ज्येष्ठकृष्णेतरेपक्षे पुष्यर्क्षे लग्न उत्तमे ।
एकत्र शयितौ रात्रिं निन्यतुर्नृपनारदौ ॥
ततः प्रभाते विमल इन्द्रद्युम्नो नृपोत्तमः ।
घोषणां कारयामास राज्यस्य सहबन्धुभिः ॥
यथा विभवतः सैन्ये नीलाद्रिगमनं प्रति ।
यावज्जीवं तत्र वासं करिष्यामो विनिश्चितम् ॥
-तत्रैव- ११/९-१२ ।

अवसरेऽस्मिन् राजा [६७९]दुर्गानृसिंहयोः शुभदर्शनं कृत्वा पुरोहितमाध्यमेन देवमालां गले [६८०]स्वीकृत्य पुरुषोत्तमक्षेत्रं प्रति सकलैः स्वराज्याधिवासिभिः सह चलितवान् । उत्कलदेशस्य सीमाप्रदेशे मुण्डमालाविभूषिता-देवीचर्च्चिकादर्शनं[६८१] तेन लब्धम् । भगवतः नीलाद्रिनाथस्य सन्दर्शनार्थं मङ्गलकारिणी भवतु सा देवी चर्च्चिका इति स्तुतिं[६८२] कृतवान् राजा तत्र । ततः आगत्य सायंकाले उपस्थितो चित्रोत्पलानदीतीरे [६८३]सायंकालीनकर्म समाप्य स्वप्रजावर्गैः सह सम्मिलितो जातः राजा इन्द्रद्युम्नः । ततो भगवच्चरितालोचनावसरे

---

६७९. तथा मङ्गलगीतानि जयशब्दांश्च भूपतिः ।
ततो विवेश प्रासादं नृसिंहमवलोकितुम् ॥
यं स्मृत्वा जायते मर्त्यः सर्वकल्याणभाजनम् ।
दृष्ट्वा स दुरान्नृहरिं दिव्यसिंहासनस्थितम् ॥
प्रणम्य साष्टावयवं सन्तोष्योपनिषद्गिरा ।
ददर्श पार्श्वस्थितान् दुर्गां सर्वदुर्गतिमोचिनीम् ॥

-स्कन्दपुराणे उत्कलखण्डे - ११/५८-६० ।

६८०. ततः पुरोधा देवाङ्गादवरोप्य शुभां स्रजम् ॥
असंजयामास गले सुगन्धेनान्वलेपयत् ।
नीराजयामास राज्ञः शिरश्चावेष्टयन्मुदा ॥

- तत्रैव- ११/६२-६२ ।

६८१. सीमामुत्कलदेशस्य विभजन्तीं वनान्तरे ।
मार्गस्थां चर्च्चिकां प्राप चर्च्चितां मुण्डमालया ॥

-तत्रैव- ११/३३ ।

६८२. चराचरगुरुदेवं नीलाचलनिवासिनम् ।
अनुगृह्णीष्व मां देवि यथा पश्ये स्वचक्षुषा ॥

-तत्रैव- ११/९७ ।

६८३. ततः प्रतस्थे तरसा स राजा श्रान्तवाहनः ।
चित्रोत्पलमहानद्यास्तीरे विरलकानने ॥
पश्चिमाद्रिं ततो याते विवस्वति विशां पतिः ॥
सायं विधिं समाप्यासु शीतभानौ समुद्यते ।
अनुजीविविशां नाथः सभामध्ये उपाविशत् ॥

-तत्रैव- ११/९९,१०४-१०५ ।

[६८४]उत्कलदेशनरपतेरूपस्थितिः सेवकेन सूचिता । दूतमाध्यमेन उत्कलदेशनरपतेः स्वागतकरणानन्तरं सभामध्ये प्रविश्य इन्द्रद्युम्नस्य [६८५]पादवन्दनं कृतवान् । ततः स्वागतसम्भाषणादिपूर्वकम् आसनादीन् समर्प्य कुशलजिज्ञासायां 'ओड्रपते' इति राजा इन्द्रद्युम्नेन यत् [६८६]सम्बोधितं ततः एव ओड्रोत्कलयोः मध्ये देशान्तरत्वं नासीत् तदानीम्, उभयोः संज्ञयोः एकदेशवाचकत्वं चेति निश्चप्रचम् । इन्द्रद्युम्नकृतकुशलप्रश्नस्योत्तरेण तस्य वैष्णवराज्यस्य समुपस्थिताअ सर्वत्र कुशलं स्यात् इति प्रशंसां कृत्वा[६८७] प्रचण्डवातेन नीलाद्रीशस्य भगवतो वालुकान्तर्हितत्वात् उत्कलराज्ये दुर्भिक्षमरकादि जातं यस्य च उपशमः इन्द्रद्युम्नागमनेन सम्भवेदिति उत्कलनरपतिना [६८८]सूचितम् । भगवतः जगन्नाथस्य अन्तर्द्धानविषय-श्रवणेन भृशं दुःखितं राजानम् इन्द्रद्युम्नं देवर्षिनारदः सान्त्वयन् प्रारब्धकार्यस्य सफलीकरणार्थं

---

६८४. प्रविवेश नृपं द्वाःस्थ उत्कलेशप्रसेवकः ।
उवाच देवद्वारान्ते तिष्ठत्युत्कलभूमिपः ॥
सोपायनो देवपादपद्मं द्रष्टुं समौलिकः ॥
- स्कन्दपुराणे उत्कलखण्डे- ११/११५-११६ ।

६८५. विवेशोड्रपतिस्तूर्णं सचिवैर्वैष्णवैः सह ।
ननामांघ्रियुगं वन्द्यमिन्द्रद्युम्नस्य सादरम् ॥
- तत्रैव- ११/१२१ ।

६८६. राजन्सर्वत्र कुशली भवानोड्रपते किल ।
अपि देवो विजयते नीलाद्रिशिखरालयः ॥
- तत्रैव- ११/१२३ ।

६८७. स्वामिन्सर्वत्र कुशलं त्वत्पादानुग्रहान्मम ।
सूर्ये तपत्यन्धकारः कथं वा प्रभविष्यति ॥
-तत्रैव- ११/१२६ ।

६८८. दक्षिणोदधितीरेऽस्ति नीलाद्रिः काननावृतः ।
न तत्र लोकसंचारस्तत्रास्ते साऽपि देवता ॥
वात्यया वालुकाकीर्णः साम्प्रतं श्रूयते तु सः ।
तद्वशान्मम राज्येऽपि दुर्भिक्षमरकादिकम् ॥
त्वयागते तु सर्वस्मिन् कुशलं मे भविष्यति ॥
-तत्रैव- ११/१३३-१३५ ।

[689]देवतानाम् उद्देश्यं च [690]सूचितवान् ।

द्वादशाध्याये चित्रोत्पलानदीतीरे प्रातःकर्म समाप्य जगन्नाथं मनसा संपूज्य राजा इन्द्रद्युम्नः तामेव नदीं [691]सन्तातार । तत्र एकाम्रवने शीततोयां गन्धवहाभिधां नदीम् अतिक्रम्य पूर्वाह्ले [692]काहालमृदङ्गादिध्वनिं श्रुत्वा राजा इन्द्रद्युम्नः अस्य कारणं यदा नारदं पृष्टवान् तदा नीलगिरितः योजनत्रयात्मकदूरे महेश्वरस्य क्षेत्रमिदं [693]एकाम्रकं वनम् इति नारदेन सविस्तरम् उत्तरितम् । तदनन्तरं शङ्करेण वाराणस्यां क्षेत्रस्थापनं, काशीराजेन शिवतो वरलाभाय श्रीकृष्णेन सह युद्धं, श्रीकृष्णप्रेरितेन सुदर्शनेन काशीराजस्य शिरच्छेदनं, काशीनगरीदाहः, ततः रुष्टेन शिवेन श्रीकृष्णस्योपरि पाशुपतास्त्रप्रयोगः,

---

६८९. न कार्यो विस्मयस्तेऽत्र भाग्यवान्वैष्णवोत्तमः ।
वैष्णवानां न वाञ्छा हि विफला जायते क्वचित् ॥
अवश्यं प्रेक्षसे राजन् विभ्रतं पार्थिवं वपुः ।
कारणं जगतामादिं नारायणमनामयम् ॥
त्वदनुग्रहहेतोर्वै क्षितावतवतरिष्यति ।
जगच्चराचरं सर्वं विष्णोर्वशमुपागतम् ॥
- स्कन्दपुराणे उत्कलखण्डे- ११/१३८-१४० ।

६९०. पितामहोऽप्यत्र कार्ये भवतो मां नियुक्तवान् ।
सर्वं ते कथयिष्यामि प्राप्ते क्षेत्रोत्तमे नृप ॥
- तत्रैव- ११/१४९ ।

६९१. ततः प्रभाते विमले नित्यं कर्म समाप्य वै ॥
पूजयित्वा जगन्नाथं संततार महानदीम् ॥
-तत्रैव- १२/६-७ ।

६९२. एकाम्रवनकं क्षेत्रमभियातो बलान्वितः ।
स गत्वा किञ्चिदध्वानं प्राप्य गन्धवहाभिधाम् ॥
नदीं वेगवतीं शीततोयामाक्रम्य वेगवान् ।
पूर्वाह्नपूजासमये कोटिलिङ्गेश्वरस्य वै ॥
-तत्रैव- १२/८-९ ।

६९३. संवर्त्तते नीलगिरेर्योजने तु तृतीयके ।
इदं त्वेकाम्रकवनं क्षेत्रं गौरिपतेर्विभोः ॥
-तत्रैव- १२/१७ ।

पाशुपत्यं विजित्य श्रीकृष्णेन काशीपुरदहनम्, भीतशङ्करकृता श्रीकृष्णस्तुतिः, स्तुत्या सन्तुष्टेन विष्णुना पुरुषोत्तमक्षेत्रस्थापनार्थं शङ्कराय आदेशप्रदानम्, शङ्करेण पुरुषोत्तमक्षेत्रस्थापनम् इत्यादिकं सकलं नारदेन तदा वर्णितम् । वृत्तान्तसकलमिदं ज्ञात्वा राजा इन्द्रद्युम्नः नारदेन सह [६९४]मध्याह्नसमये एकाम्रवने उपस्थितोऽभवत् । तत्र विन्दुतीर्थे स्नात्वा राजा इन्द्रद्युम्नः तत्तीरस्थपुरुषोत्तमस्य पूजां [६९५]कृतवान् इति यत् अत्र सूच्यते तत् वस्तुगत्या लिङ्गराजाभिप्रायकं न तु जगन्नाथविषयकमिति मन्यते । एवमपि तत्र परिकल्पयितुं शक्यते यत् तत्र विन्दुसागरस्य तीरे अनन्तवासुदेवः विराजते, तस्यैव पुरुषोत्तमव्यञ्जकत्वम् । राजा तत्र कोटिलिङ्गेशस्य स्तुतिं चकार । कोटिलिङ्गेशः तत्र पुरुषोत्तमक्षेत्रं [६९६]अष्टधा स्थापित इति स्पष्टीकृतमस्ति । अपि च नीलमाधवस्य अन्तर्द्धानानन्तरं नरसिंहस्य क्षेत्रत्वेन अस्य पुरुषोत्तमक्षेत्रस्य प्रसिद्धिः तथा च तदा चतस्रः प्रतिमाः सृष्टाः अभवम् इति च तत्र [६९७]श्रूयते । तस्मिन् अध्यायेऽपि

६९४. ततस्तौ मुनिभूपालौ मध्याह्नसमये द्विजाः ।
प्रापतुः सबलौ क्षेत्रमेकाम्रवनसंज्ञकम् ॥
- स्कन्दपुराणे उत्कलखण्डे- १२/९४ ।

६९५. बिन्दुतीर्थे नृपः स्नात्वा तीरस्थं पुरुषोत्तमम् ।
संपूज्य विधिवद्यातः कोटीश्वरमहालयम् ॥
-तत्रैव- १२/९५ ।

६९६. विष्णोः कलेवरे तस्मिन् क्षेत्रे श्रीपुरुषोत्तमे ।
अन्तर्वेदी महापुण्या विष्णोर्हृदयसन्निभा ।
तस्याः संरक्षणायाहं स्थापितो विष्णुनाष्टधा ॥
- तत्रैव- १२/१०३-१०४ ।

६९७. अन्तर्हितः खल्विदानीं नीलरत्नतनुर्हरिः ।
तत्र श्रीनरसिंहस्य क्षेत्रं कुरु मदाज्ञया ॥
तत्र नः सन्निधौ वाजिमेधेन यजताभयम् ।
सहस्रेण नृपश्रेष्ठस्तदन्ते तरुमद्भुतम् ॥
दर्शयेनं द्विजश्रेष्ठ ब्रह्मरूपमकल्मषम् ।
चतस्रः प्रतिमास्तेन विश्वकर्मा घटिष्यति ॥
- तत्रैव- १२/१०६-१०८ ।

कोटिलिङ्गेशेन राज्ञः इन्द्रद्युम्नस्य वैष्णवत्ववर्णनं, अन्तिमे च भगवद्विषयचिन्तनं कुर्वतः इन्द्रद्युम्नस्य नारदेन सह रथमारुह्य भगवत्सन्निधौ गमनमिति समुपलभ्यते ।

त्रयोदशाध्याये कपोतवेशं गृहीतेन शिवेन भगवतः प्रसादात् कपोतेश्वरस्थापनम्, तथा च पातालवासिदैत्यानां संहारनिमित्तं विल्वफलं संस्थाप्य भगवतः शङ्करस्याराधनां कृत्वा तस्य प्रसादात् दैत्यान् विजित्य अनन्तरं श्रीकृष्णेन विल्वेश्वरक्षेत्रं स्थापितमिति वर्णितमस्ति ।

चतुर्दशाध्याये विद्यापतिना सह नीलकण्ठदेवस्य क्षेत्रं रथमारुह्य गच्छतो इन्द्रद्युम्ननारदयोः मिथः संलापावसरे भगवतः ६९८सान्निध्यादिलाभे अशुभलक्षणानि दृष्ट्वा विषादग्रस्तमिन्द्रद्युम्नं प्रति नानाविधवचनेन सम्बोध्य विद्यापतेः आगमनानन्तरं भगवान् तस्मात् अन्तर्हितो जात इति नारदः ६९९प्रतिपादितवान् । ततो राजा इन्द्रद्युम्नोऽत्यन्तं दुःखितो जातः । नीलमाधवदर्शनं विना मम ७००जीवनधारणमसम्भवमिति तेन इन्द्रद्युम्नेन देवर्षेः नारदस्य सविधे

---

६९८. दुर्निमित्तमभून्मार्गे व्रजतोऽस्य महीक्षितः ।
वामाक्षि भूजयोः स्पन्दः स्फुरणं च मुहुर्मुहुः ॥
- स्कन्दपुराणे उत्कलखण्डे-१४/३ ।

६९९. मा मूद्विषादस्ते भूप सविघ्नं प्रायशः शुभम् ।
विघ्नान्ते च शुभं पुंसा पुनर्भाग्यवतां नृपः ॥
सत्यं त्वं सार्वभौमोऽसि क्षेत्रं विष्णोर्वपुस्त्विदम् ।
यात्र तेऽत्र यदर्थेऽयं सोऽन्तर्द्धानमुपागतम् ॥
एष विद्यापतिर्विप्रो दिने यस्मिन् ददर्श तम् ।
सायंकाले ततोऽन्येद्युः स्वर्णवालुकावृतः ॥
ययौ पातालनिलयं मर्त्यलोके सुदुर्लभः ॥
- तत्रैव- १४/८-१० ।

७००. प्राणान् न धारयिष्यामि द्रक्ष्यामि यदा हरिम् ।
एवं मे निश्चयो ब्रह्मन् मयि नष्टे कुतः प्रजाः ॥
आयुशेषं करिष्यामि सफलं क्षेत्रसंस्थितः ॥
-तत्रैव- १४/२५-२६ ।

विलपितम् । तत्र इन्द्रद्युम्नं सान्त्वयन् देवर्षिनारदो भगवतः अन्तर्द्धानप्रसङ्गे किं किं जातम्, तथा च केन प्रकारेण भगवद्भिः त्रिभिः नीलाद्रिक्षेत्रं प्रति आगतेन तेन भगवतोऽन्तर्द्धानात् न कदाचित् दुःखानुभवः करणीयः इति प्रबोधनार्थं सः प्रचोदितः सर्वं तत्र नारदेन [701]समुपन्यस्तम् । तदवसरे नीलाद्रिनाथस्य दर्शनम् अवश्यं नारदेन कल्पयिष्यते इति सुस्पष्टम् ।

पञ्चदशाध्याये नारदेन सह सविप्रस्येन्द्रद्युम्नस्य नीलपर्वतोपरि नरसिंहदर्शनं वर्णितमस्ति । तदवसरे नरसिंहस्य विलक्षणसम्पन्नं स्वरूपं [702]प्रकाशितम् । ततः कृतकृत्येन इन्द्रद्युम्नेन भविष्यकार्यसम्पादने

---

७०१. तिस्रोऽपि मूर्तयस्तस्य त्वदनुग्रहबुद्धयः ।
चराचराणां स्रष्टा यः साक्षाल्लोक पितामहः ।
मामुवाच व्रजाशु त्वमिन्द्रद्युम्नस्य चान्तिकम् ॥
नीलाचलं प्रत्यात्येषो दिदृक्षुर्नीलमाधवम् ।
अन्तर्द्धानं गतो ह्येषः यमेन प्रार्थितो विभुः ॥
न तत्र शोकः कर्त्तव्यः शक्यते तत्र नान्यथा ।
वाच्यो मद्वचनाद्राजा पञ्चमी मम सन्ततिः ॥
तत्कृते परमात्मानं प्रसाद्य पुरुषोत्तमम् ।
श्वेतद्वीपान्नयिष्यामि सहस्रान्ते महाक्रतो ॥
इन्द्रद्युम्नस्य स इदानीं क्षेत्रे श्रीपुरुषोत्तमे ।
अश्वमेधसहस्रैस्तु याजन्विष्णुं स तिष्ठतु ॥
तदन्ते दारवतनुं विष्णुं द्रक्ष्यति चक्षुषा ।
सोऽवतारो हरेः ख्यातिं तस्य द्वारा गमिष्यति ॥
तदानु तनवो विष्णो प्रतिष्ठाप्या मया ध्रुवम् ।
पुरा स्म मणिमूर्त्तिस्तु चतुर्द्धावस्थितो हरिः ॥
दृष्ट्वा पुरोधसा तस्य साक्षादग्रे निवेदितः ।
दिव्यदारुवपुर्भूयश्चतुर्द्धावतरिष्यति ॥

-स्कन्दपुराणे उत्कलखण्डे- १४/३७-४४ ।

७०२. सर्वापदभ्यः संहर्त्ता दिव्यसिंहवपुर्विभुः ॥
यं दृष्ट्वा ब्रह्महत्याया लीयन्ते कोटयनृणाम् ।
व्यत्तास्यं भीमदशनमापिङ्गलसटाकुलम् ॥
उग्रं त्रिनेत्रं दैत्यस्य स्वोरावुत्तानशायिनः ।

विश्वासो लब्धः[७०३] । अतः श्रीक्षेत्रे प्रथमतः भगवान् नरसिंहः विराजते इति निश्चीयते । कस्मिन्स्थले भगवतः पुरुषोत्तमस्य इन्द्रीलमणिमयी प्रतिमा विराजिता आसीत् इति [७०४]इन्द्रद्युम्नप्रश्नात् नारदेन भगवतः पुरुषोत्तमस्य विराजमानस्थलप्रदर्शनेन सह समग्रेऽस्मिन् जम्बूद्वीपे स्थानमिदं भगवतः कर्मभूमिरिति स्थानस्यास्य गुरुत्वं [७०५]प्रकटितम् । ततः तत्र इन्द्रद्युम्नेन भगवतः पूर्ववत् पुनः विराजमानार्थं

वक्षःस्थलं दारयन्तं नखैर्वज्रदारुणैः ॥
अरुणाभं लसज्जिह्वं साट्टहासमुखं विभुम् ।
शङ्खचक्रलसद्बाहुं किरीटमुकुटोज्ज्वलम् ॥
नेत्रोच्छलद्वह्निकणसंत्रासितदिगन्तरम् ।
प्रचण्डाघातभूम्यन्तं प्रविष्ट पदपङ्कजम् ॥
- स्कन्दपुराणे उत्कलखण्डे-१५/८-१२ ।

७०३. इन्द्रद्युम्नोऽपि तं दृष्ट्वा नारदोक्तौ विशस्वसे ।
भावि कार्ये प्रत्ययावानिदमाह महामुनिम् ॥
महर्षे कृतकृत्योऽस्मि त्वं हि ज्ञाननिधिपरम् ॥
- तत्रैव- १५/१४-१५ ।

७०४. यस्य नीलमयिमूर्त्तिः कृपासिन्धोः स्थिता तु वै ॥
कस्मिन्स्थले मुनिश्रेष्ठ दर्शनाद्याविमुक्तिदा ।
तन्मे दर्शय विप्रेन्द्र यन्मे मुक्तिप्रदं मतम् ॥
-तत्रैव- १५/१८-१९ ।

७०५. पश्यैतं योजनायामं योजनद्वयमुच्छ्रितम् ।
कल्पान्तस्थायिनं भूप न्यग्रोधं मुक्तिदं नृणाम् ॥
छायया क्रमाणाद्यस्य मुच्यते पापकम्बुकात् ।
अस्य मूले नरः प्राणास्त्यजन्मुक्तिमवाप्नुयात् ॥
न्यग्रोधरूपं दृष्ट्वाऽपि नारायणमकल्मषम् ।
निष्पापो जायते मर्त्यः किमुत पूजयन्स्तुवन् ॥
अस्य मूलात् प्रतीच्यां हि नृसिंहस्योत्तरे नृप ।
अतिष्ठन् माधवो यत्र चतुर्मूर्त्तिधरो विभुः ॥
अनुगृहीतं त्वामेव पुनरत्रोद्भविष्यति ।
जम्बूद्वीपे कर्मभूमौ निजं स्थानमिदं स्मृतम् ॥
- तत्रैव - १५/२१-२६ ।

[705]स्तुतिः कृता । स्तुत्या प्रसन्नेन भगवता अन्तरीक्षवाण्या नारदवचनानुरूपेण वाजिमेघादियज्ञसम्पादनार्थं[707] इन्द्रद्युम्नः उपदिष्टः । ततः अन्तिमे इन्द्रद्युम्नकृताश्वमेधसम्भारवर्णनं समुपलभ्यते ।

षोडशाध्याये शुभकर्मसम्पादनेन [708]शुभफलं मिलतीति संसूच्य नीलकण्ठेश्वरस्य दक्षिणदिग्भागे [709]धनुःशतान्तरे चन्दनद्रुमस्याधः यज्ञानुष्ठानं कृत्वा नृसिंहमूर्त्तिस्थापनार्थं देवर्षिनारदेन इन्द्रद्युम्नः [710]आदिष्टः । अनुज्ञां प्राप्य राजा इन्द्रद्युम्नः यदा चन्दनद्रुमस्यान्तिकं चलितवान् तदा देवशिल्पी नरसिंहालयं स्वयमेव विधास्यति इति [711]कथितवान् । श्रुत्वेदं वचनं प्रहृष्टमना राजा प्रतीचीवदनं

---

७०६. देवदेव जगन्नाथ प्रणतार्त्तिविनाशन ।
त्राहि मां पुण्डरीकाक्ष पतितं भवसागरे ॥
तिरश्चो मुक्तिदामूर्त्तिः स्थिता ते याऽत्रतां पुनः ।
अनेन चक्षुषा पश्यामीश नान्यत्प्रयोजनम् ॥

-स्कन्दपुराणे उत्कलखण्डे - १५-३७,४६ ।

७०७. ततोऽन्तरीक्षगा वाणी सामसुस्वरभाषिणी ।
उच्चचार नभोमध्ये इन्द्रद्युम्नस्य शृण्वतः ॥
मा चिन्ता व्रज भूपाल व्रजिष्ये त्वद्दृशोः पथम् ।
पैतामहं वचः प्राह नारदो यत्कुरुष्व तत् ॥

-तत्रैव- १५/४८-४९ ।

७०८. व्यवसाये सुकृतिनां देवा यान्ति सहायताम् ।
तत्रोदाहरणं त्वं हि यत्सहायश्चतुर्मुखः ॥

-तत्रैव- १६/२ ।

७०९. हस्तचतुष्कमेव धनुः परिमाणम् । तद्यथा कालसर्वस्वे - पृ- ३४७ ।
"चतुर्विंशाङ्गुलहस्तस्तच्चतुष्कं धनुः स्मृतम्" ।

७१०. दक्षिणे नीलकण्ठस्य यो महांश्चन्दनद्रुमः ।
धनुः शतान्तरे राजंश्चिररूढस्तु तिष्ठति ॥
तस्य पश्चिमदेशस्थं क्षेत्रं राजन् भविष्यति ।
वाजिमेधसहस्रेण तस्याग्रे यजतां भवान् ॥

-स्कन्दपुराणे उत्कलखण्डे - १६/७-८ ।

७११. मनुष्यरूपमास्थाय शस्त्रसूत्रधरं स्थितम् ।
राजानं स तु दृष्ट्वा वै चिकीर्षतं सुरालयम् ॥

नरसिंहदेवालयं [७१२]यथाशीघ्रं निर्मातुं सूचयामास । निर्मितेऽस्मिन् देवालये देवर्षिणा नारदेन ज्येष्ठमासस्य स्वातीनक्षत्रयुक्तायां द्वादश्यां तिथौ नरसिंहमूर्त्तिः [७१३]स्थापिता । इष्टसाधनार्थं राज्ञा इन्द्रद्युम्नेन नरसिंहदेवस्य स्तुतिः [७१४]कृता । वैशाखशुक्लचतुर्द्दशीप्रदोषकाले नरसिंहदेवस्य आविर्भावो जात इति तत्र [७१५]प्रतिपादितम् ।

सप्तदशाध्याये अश्वमेधसम्पादनादिविषयः प्रतिपादितः । भगवद्दर्शननिमित्तं राज्ञः इन्द्रद्युम्नस्य प्रबलामिच्छां ज्ञात्वा देवगणाः तस्मै शान्त्वनां प्रदाय स्वयमेव भगवान् भूतले अवश्यं प्रादुर्भविष्यति इति [७१६]कथितवन्तः । देवताभ्यः दृढां प्रतिश्रुतिं प्राप्य राजा

कृताञ्जलिपुटः प्रोचे देवाहं शिल्पशास्त्रवित् ।
नरसिंहालयं तेऽथ घटयिष्यामि शोभनम् ॥

-स्कन्दपुराणे उत्कलखण्डे - १६/१३-१४ ।

७१२. तदाशु घटयास्याद्य सप्राकारं सतोरणम् ।
प्रासादं नरसिंहस्य प्रतीचीवदनं शुभम् ॥

-तत्रैव- १६/१९ ।

७१३. ज्येष्ठशुक्लद्वादशी या स्वातीनक्षत्रसंयुता ॥
तस्यां प्रतिष्ठितक्षेत्रे दिव्यसिंहमहर्षिणा ॥

- तत्रैव- १६/५६-५७ ।

७१४. हयमेधसहस्रान्ते यथा त्वां चर्मचक्षुषा ।
दिव्यरूपं प्रपश्यामि तथानुक्रोशय प्रभो ॥

-तत्रैव- १६/४९ ।

७१५. वैशाखस्य चतुर्द्दश्यां सौरिवारेऽनिलर्क्षके ।
आद्यावतारः सिंहस्य प्रदोषसमये द्विजाः ॥
तस्यां सम्पूज्य विधिवन्नरसिंहं समाहितैः ।
जन्मकोटिसहस्रैस्तु पापराशिः सुसञ्चितः ।
दह्यते तत्क्षणादेव तूलराशिरिवाग्निना ॥

-तत्रैव- १६/६२-६३ ।

७१६. इन्द्रद्युम्न महात्मासि सत्यं सत्यव्रतो भुवि ॥
त्वचेष्टितं पुरास्माभिरन्वभावि भविष्यम् ।
सहायास्ते भविष्यामः कार्ये त्रैलोक्यपावने ॥
स्रष्टा स जगतां यत्र उद्युक्तः स्वयमेव हि ।

यज्ञप्रारम्भार्थं शुभमुहूर्त्ते सपत्नीकः सर्वान् [७१७]अभ्यर्थितवान् । ततः शुभलक्षणयुक्तोऽश्वः सकलप्रारम्भिकविधानपुरःसरं[७१८] मुक्तो जातः । अनन्तरम् अभ्यार्थितानाम् आदेवमनुष्याणां पातालवासिनां च सन्तोषाय यथायोग्यभोजनार्थं च व्यवस्था राज्ञा कृता । इत्थं प्रवर्त्तिते यज्ञे दुर्लभवस्तूनामपि सुलभता परिलक्षिता आसीत् । तदवसरे सप्तदिनानन्तरं समुपस्थितायाः रात्र्याः चतुर्थप्रहरे निद्रितावस्थायां ध्यानावस्थितेन राज्ञा भगवतो विष्णोर्दर्शनं [७१९]लब्धम् । स्वप्नभङ्गानन्तरं

अत्रैवोवाच भगवानस्माकमपि भूतले ॥
प्रविशंस्तदनुक्रोशवशदभूयः प्रकाशनम् ।
करिष्ये दारवं देहाभित्येतत्परिनिष्ठितम् ॥
नात्रात्मकं व्यलीकं तु नेन्द्रस्य च महीपतेः ।
अस्मद्दिष्ट समुद्योगस्तवः नः प्रीतिकारकः ॥
सुखं यजस्व राजेन्द्र वैकुण्ठं भक्तवत्सलम् ।
क्रतुना हयमेधेन सहस्रपरिवर्त्तिना ॥
दूराराध्यो हि भगवानस्माकं भक्तवत्सलः ।
वयमप्यत्र देवत्वं त्यक्त्वा भक्तिपरायणाः ॥
आराधयाम क्षेत्रेस्मिन्विनीता नररूपिणः ।
प्रियं हि मानुषलोके कर्मसिद्धयन्ति वै कृतम् ॥

-स्कन्दपुराणे उत्कलखण्डे - १७/३५-४२ ।

७१७. आकाक्षाकल्पितं लग्नं संवृते स्वस्तिवाचने ।
उपस्थितः सपत्नीकः शुद्धमाङ्गल्यवेषधृक् ॥
स्वस्तिवाच्य द्विजांच्छुद्धान्पुण्याह वृद्धिकर्म च ।
ततः संभृतसम्भारो वरयामास ऋत्विजः ॥

-तत्रैवे- १७/४६-४७ ।

७१८. सुप्रोक्षितं चाभिमन्त्र्य अनुज्ञाप्य दिगीश्वरान् ।
मुमुचुस्ते हयं मुख्यमग्रेषु शुभलक्षणम् ॥ -तत्रैव- १७/५० ।

७१९. सुत्यायाः सप्तदिवसाद्या रात्रिरभवत्पुरा ।
तस्या तुरीयप्रहरे दध्यौ स विष्णुमव्ययम् ॥
ध्याने तस्मिन् ददर्शासौ महाभाग्यवशान्नृपः ।
प्रत्यक्षमिव स श्वेतद्विपं स्फटिकनिर्मितम् ॥

-तत्रैव- १७/१०२-१०३ ।

प्रभाते इन्द्रद्युम्नेन देवर्षेः नारदस्य सविधे [७२०]वृत्तान्तसकलं विनिवेदितम्। नारदोऽपि भगवत्प्रतिमादर्शनेन सर्वदुःखहानिः भविष्यतीति संबोध्य स्वप्नस्यास्य वृत्तान्तं नान्यत्र प्रकाशयित्वा यज्ञस्य समाप्तये राज्ञे [७२१]उपदिष्टवान्।

अष्टादशाध्याये सेवकाः राज्ञे [७२२]निवेदितवन्तः यत् महोदधितीरे विराजमानस्य श्रीविल्वेश्वरदेवस्यानतिदूरे शुभलक्षणयुक्तो देवस्वरूपः कश्चित् वृक्षो विराजते इति। देवर्षेः नारदस्य सविधे राज्ञा इन्द्रद्युम्नेन यदेवं प्रतिपादितं तदा भगवान् दारुमयमूर्त्तिधारणपूर्वकं प्रकटितो

---

७२०. अत्यद्भुतमिदं स्वप्नं दृष्ट्वा च नृपकुञ्जरः।
मेने कृतार्थमात्मानं हयमेधक्रतोस्तथा॥
सहस्रं सफलं चैव स्वभाग्यं समुपस्थितम्।
न हि देवर्षिवचनं वृथा भवति कर्हिचित्॥
प्रत्यक्षं मे कथं नाथः स्वयमत्र भविष्यति।
इति चिन्ताकुलो रात्रिशेषं नीत्वा विशाम्पतिः॥
शंशस नारदस्याग्रे यथा स्वप्नऽन्वभूयते॥
-स्कन्दपुराणे उत्कलखण्डे -१७/१३२-१३५।

७२१. तदनुष्ठीयतां यज्ञः पराग्रे न प्रकाशय।
-तत्रैव- १७/१३८।

७२२. दक्षिणेतटभूदेशे विल्वेश्वर समीपतः॥
नियुक्ताः सेवकाः राज्ञा संसंभ्रममुपस्थिता।
न्यवेदयन्तो नृपतिं कृताञ्जलिपुटाद्विजा॥
देव दृष्टो महान्वृक्षस्तटभूमौ महोदधेः।
प्रविष्टाग्रसमुद्रान्तः कल्लोल तवमूलकः॥
माञ्जिष्ठवर्णः सर्वत्र शंखचक्राङ्कितः प्लवन्।
स्नानवेश्म समीपेऽसौ दृष्टोऽस्माभिः परोऽद्भुतः॥
न दृष्टपूर्वो वृक्षोऽयमुद्यत्सूर्यनिर्भोऽशुना।
गन्धेन वासयन्सर्वां तटभूमिं सुगन्धिता॥
द्रुमो साधारणो नायं लक्ष्यते देवभूरूहः।
कश्चिद्देवस्तरुव्याजादागतो लक्ष्यते ध्रुवम्॥
-तत्रैव - १८/४-९।

भविष्यतीति नारदेन कथितम्[७२३] । ततः राजा नारदस्योपदेशं गृहीत्वा सकलैः ऋत्विग्ब्राह्मणादिभिः मङ्गलनिर्घोषपुरःसरं गन्धचन्दनादि-लेपनपूर्वकं च महावेद्यां तमेव द्रुमं संस्थाप्य पूजयामास[७२४] । अनन्तरं केन प्रकारेण भगवतः प्रतिमानिर्माणं सम्भविष्यति इति नारदेन्द्रद्युम्नयोः मिथ आलोचनावसरे "भगवान् महावेद्यां स्वयमेव अवतरिष्यति । शस्त्रपाणि एको वर्द्धकिः उपस्थितो भविष्यति । महावेद्यां केवलं तस्य प्रवेशः करणीयः । पञ्चदशदिनानि यावत् महावेद्याः द्वारबन्धनं कृत्वा बहिरित्थं मङ्गलध्वनिः सम्पादनीया यथा न कश्चित् प्रतिमानिर्माणविषयं ज्ञातुं शक्नुयात् इति[७२५] अशरीरिवाणी अन्तरीक्षतः

---

७२३. नारदः प्रहसन्वाक्यमुवाच नृपसत्तमम् ।
पूर्णाहुतिः समाप्तौ तु यथा स्यात् सफलः क्रतुः ॥
उपस्थितं ते तद्भाग्यं स्वप्ने यदृष्टवान् पुरा ।
श्वेतद्वीपे विश्वमूर्त्तिर्दृष्टो यो विष्णुरव्ययः ॥
तदङ्गस्खलितं रोम तरुत्वमुपपद्यते ।
अंशावतारः स्थास्नुर्यः पृथिव्यां परमेष्ठिनः ॥
तद्द्रुमावतारं याति भगवान् भक्तवत्सलः ।
द्रुमोह्यपौरुषो योऽसौ भाजने नास्य दर्शने ॥
त्वामृते पुरुषव्याघ्र पृथिव्यां नृपसत्तम ।
त्वद्भाग्यवशतः सर्वलोकानां नयनातिथिः ॥
भविष्यति महाराजा सर्वकल्मषनात्मनः ।
समाप्यावभृथस्नानं तटान्ते सरितां पतेः ॥
उत्सवं सुमहत्कृत्वा कृतकौतुकमङ्गलम् ।
महावेद्यां स्थापयात्र यज्ञेशं तरुरूपिणम् ॥

-स्कन्दपुराणे उत्कलखण्डे- १८/११-१७ ।

७२४. स्रग्गन्धालङ्कृतं दिव्यं महावेदीं विनिन्यतु ।
वितानवरचित्रायां वेष्टितायां निरन्तरम् ॥
वेद्यां तं स्थापयामासुरिन्द्रद्युम्नस्य शासनात् ।
वचसां नारदस्येनं पूजयामास पार्थिवः ॥

- तत्रैव- १८/३०-३१ ।

७२५. अपौरुषेयो भगवानविचारपथे स्थितः ॥
सुगुप्तायां महावेद्यां स्वयं सोऽवतरिष्यति ।

श्रुतिपथारूढा बभूव । तां श्रुत्वा राजा स्वप्नदृष्टानुसारं प्रतिमानिर्माणार्थं तत्र उपस्थितं वर्द्धकिविश्वकर्माणं महावेद्यां प्रवेशनार्थम् [७२६]आदिदेश।

एकोनविंशत्यध्याये अन्तरीक्षवाण्यनुसारं पञ्चदशादिने भगवतश्चतुर्द्धामूर्त्तिः दिव्यसिंहासने बलभद्र-सुभद्रा-जगन्नाथ-सुदर्शनादिरूपेण प्रकटितेति प्रश्नोत्तरच्छलेन महर्षिणा जैमिनिना जिज्ञासूनां स्वशिष्यप्रमुखानां सम्मुखे [७२७]समुपन्यस्तम् । तदवसरे प्रतिमानां स्वरूपाणि अपि [७२८]समुपन्यस्तानि । तत्र च कृष्णबलदेवयोः अभिन्नपरिकल्पनेन सह सुभद्रायाः कमलालयलक्ष्मीत्वेन च

प्रच्छाद्यतां दिनान्येषा यावत्पञ्चदशानि वै ॥
उपस्थितो यं यो वृद्धः शस्त्रपाणिस्तु वर्द्धकिः ।
एनमन्तः प्रवेश्यैव द्वारं बध्नन्तु यत्नतः ॥
बहिर्वाद्यानि कुर्वन्तु यावत्तु घटना भवेत् ।
श्रुतो हि घटनाशब्दो बाधिर्यायत्वदायकः ॥
नरके वसतिं चैव कुर्यात् सन्ताननाशनम् ।
नान्तः प्रवेशनं कुर्यान्न पश्येच्च कदाचन ॥
नियुक्तादन्यः पश्येच्चेद्राज्ञो राष्ट्रस्य चैव ह ।
द्रष्टुश्चापि महाभीतिरन्धता चक्षुषोर्युगे ॥
तस्मान्नावेक्षणं कार्यं यावत् प्रतिमानिर्मितिः ।
निर्व्यूढस्तु स्वयं देव कृत्यान्ते तु वदिष्यति ॥

-स्कन्दपुराणे उत्कलखण्डे - १८/३६-४२ ।

७२६. चिकीर्षति तथा कर्त्तुं तत्रायातश्च वर्द्धकिः ।
प्रोवाच नृपतिं सोऽथ स्वप्ने दृष्टास्तु यास्त्वया ॥
ता एवाहं घटिस्यामि दारुणा दिव्यरूपिणा ।
इत्युक्त्वान्तर्दधे वेद्यां बृद्धवर्द्धकिरूपधृक् ॥

-तत्रैव- १८/४४-४५ ।

७२७. निर्ववाह स्वयं देवः क्रमात्पञ्चदशदिने ।
चतुर्मूर्त्तिः स भगवान् यथा पूर्वमयोदित ॥
तादृशाविर्बभूवासौ युस्माकं वर्णितः पुराः ।
दिव्यसिंहासन गतो बलभद्रा सुदर्शनम् ॥ - तत्रैव- १९/७-८ ।

७२८. शङ्खचक्रगदापद्म लसद्बाहुर्जनार्द्दनः ।
गदामूषलचक्राब्जं धारयन् पन्नगाकृतिः ॥

[727]उपन्यासः प्राप्यते । अवसरेऽस्मिन् पुनः अन्तरीक्षवाणी कर्णकुहरं प्रविश्य पट्टाच्छादनपूर्वकं नीलाभ्रश्यामलधवलरक्तकुङ्कुमवर्ण-सम्बलितः क्रमानुसारं जगन्नाथ-बलभद्र-सुदर्शन-सुभद्राणां मूर्त्तीः संघटयितुं राजानम् [730]आदिदेश । प्रतिवर्षमित्थमाच्छादनवर्णलेपनादि व्यापारसंघटनार्थमपि तत्रोपदेश [731]आसीत् । नीलाद्रौ विराजमानस्य कल्पवृक्षस्य वायव्यां शतहस्तकपरिमिते सुदृढायतनविशिष्ट-

---

छत्राकृति फणा सप्त मुकुटोज्ज्वलकुण्डलः ।
सुभद्रा चारुवन्दना वराब्जाभयधारिणी ॥
-स्कन्दपुराणे उत्कलखण्डे - १९/९-१० ।

७२९. लक्ष्मीः प्रादुर्वभुवेयं सर्वचैतन्यरूपिणी ।
इयं कृष्णवतारे हि रोहिणीगर्भसम्भवा ॥
वलभद्राकृतिर्जाता बलरूपस्य चिन्तनात् ।
क्षणं न सहते साहि मोक्तुं लीलावतारिणम् ॥
न भेदोऽस्तीह को विप्राः कृष्णस्य च बलस्य च ।
एक गर्भप्रसुतत्वात् व्यवहारोऽथ लौकिकः ॥
भगिनी बलदेवस्येत्येषा पौराणिकी कथा ।
पुंरूपे स्त्रीस्वरूपेण लक्ष्मीः सर्वत्रतिष्ठति ॥
पुंनाम्ना भगवान् विष्णुः स्त्रीनाम्ना कमलालया ।
देवतीर्यङ्मनुष्यादौ विद्यते त तयोपरम् ॥
को ह्यन्यः पुण्डरीकाक्षाद्भुवनानि चतुर्दश ।
धारयेत्तु फणाग्रेण सोऽनन्तो बलसंज्ञितः ॥
तस्य शक्तिस्वरूपेयं भगिनी श्रीः प्रकीर्त्तिता ।
सुदर्शनं तु यच्चक्रं सदा विष्णोः करे स्थितम् ॥
शाखाग्रस्तम्भमध्यस्थं तद्रूपं तत्तुरीयकम् ।
एवं तु मूर्त्तयस्तेन चतस्रो वै प्रकाशिता ॥ -तत्रैवे-१९/११-१८ ।

७३०. पट्टैराच्छाद्य सुदृढं नृपते प्रतिमास्त्विमाः ।
स्व स्व वर्णं प्रापयाशु वर्णकैश्चित्रकर्मणा ॥
नीलाभ्रश्यामलं विष्णुं शंखेन्दुधवलं बलम् ।
रक्तं सुदर्शनं चक्रं सुभद्रां कुङ्कुमारुणाम् ॥- तत्रैव- १९/२०-२१ ।

७३१. शिल्पिभिः कर्मकुशलैर्दृढमाच्छादयग्रतः ।
वर्षे वर्षे च संस्कार्याः पूर्वसंस्कारमोचनात् ॥

प्रासादनिर्माणं कृत्वा तत्रैव तत्र प्रतिमाचतुष्टयस्य संस्थापनार्थं तथा च विश्वावसुवंशधरान् देवप्रतिमानां शरीरेषु लेपसंस्कारकर्मणि नियोजनार्थं निर्देशोऽपि तदानीम् अन्तरीक्षवाणीतः आसीदिति सुस्पष्टं [७३२]ज्ञायते। देववाण्या अनन्तरं यदा राज्ञा महावेद्याः वेष्टनम् उन्मोचितं तदा एव रत्नसिंहासने पद्मासनस्थितो दिव्यालङ्कारभूषितः कृष्णः, सप्तफणामण्डलविस्तीर्णशिरो बलदेवः, विकचाम्भोजवदना कुङ्कुमारूपवर्णाभा साक्षात्लक्ष्मीः सुभद्रा, बालार्कसदृशं तीक्ष्णधारसम्पन्नं भगवतो जगन्नाथस्य वामपार्श्वस्थितं सुदर्शनचक्रं चेति चतस्र मूर्त्तयः [७३३]दृष्टिपथारूढा जाता। अवसरेऽस्तिन् भगवतो

ऋते वल्कललेपं तु स तु दिव्यश्चिरन्तनः ।
प्रमादाद्यं इमं लेपमपनीयेत कश्चन ॥
दुर्भिक्षमरकं राष्ट्रे सन्ततिश्चास्य हीयते ।
नेक्षितव्यास्त्वया राजस्कन्दाचिदपवारणाः ॥
मनुष्येश्चापि राजेन्द्र दृष्टा स्युर्भयहेतवः ।
तस्मात्सचित्रा द्रष्टव्या बहुलेपविलेपिताः ॥

-स्कन्दपुराणे उत्कलखण्डे - १९/२४-२७ ।

७३२. नीलाद्रौकल्पवृक्षस्य वायव्यां शतहस्ततः ॥
प्रदेशे सुमहत्स्थाने प्रासादं सुदृढायतम् ।
उत्तरे नरसिंहस्य सहस्रकरमुच्छ्रितम् ॥
कारयित्वा प्रतिष्ठाप्य तत्रेनं विनिवेशय ।
पुरास्थितं पर्वतेऽस्मिन्योऽभ्यर्चयति माधवम् ॥
नाम्ना विश्वावसुर्नाम शवरो वैष्णवोत्तमः ।
पुरोधस संख्यमासीतेन सार्द्धं पुरा च ते ॥
तयोः सन्ततिरेवास्य लेपसंस्कारकर्मणि ।
नियुज्यतां महाराज भविष्यत्सुत्सर्वेषु च ॥

-तत्रैव- १९/३०-३४ ।

७३३. पद्मासनस्थितं कृष्णं दिव्यालङ्कारभूषितम् ।
स्व तेजसा परिवृत्तं दारुदेशेऽपि निर्मलम् ॥
नीलजीमूतसङ्काशं सर्वसन्तापनाशनम् ।
ददर्श बलदेवं साट्टहासं मुखाम्बुजम् ॥
फणामण्डलविस्तीर्णं वारुणी घूर्णितेक्षणम् ।

जगन्नाथस्य स्वरूपसंदर्शनार्थं नारदेन राजा इन्द्रद्युम्नः [734]प्रचोदित आसीदिति परिलक्ष्यते ।

विंशाध्याये राजा इन्द्रद्युम्नः 'त्वदंघ्रिपाथोजयुगादि'[735] उच्चार्य अहर्निशं त्वत्पादपङ्कजे स्वकीयं मनः निमग्नं भवतु[736] इति

प्रोत्थितं नागराजानं पीनोन्नतसुवक्षसम् ॥
किञ्चिन्नतं पृष्णदेशे कुण्डलीकृत विग्रहम् ।
अग्रसंफुल्लकुङ्कुमं कैलासशिखरं यथा ॥
हलचक्राब्जमुषलधारिणं वनमालिनम् ।
हारकुण्डलकेयूर किरीटमुकुट्टोज्वलम् ॥
तयोर्मध्ये स्थितां लक्ष्मीं सुभद्रां भद्रारूपिणीम् ॥
सर्वदेवारणीं पापसागरो तारकारिणीम् ।
विकचाम्भोजवदना वराब्जाभयधारिणीम् ॥
रूपलाबण्यवसतिं शोभमानां प्रसाधनैः ।
कुङ्कुमारुणदेहां तां साक्षात्लक्ष्मीमिवापराम् ॥
ददर्श बिष्णुर्वामस्थां चक्रशाखाग्रनिर्मिताम् ।
बालार्कसदृशीं तीक्ष्णाधारां तेजोमयीं द्विजाः ॥

-स्कन्दपुराणे उत्कलखण्डे- १९/४०-४८ ।

७३४. उवाच तं मुनिवरः स्मितवक्त्रः क्षीतिश्वरम् ।
यदर्थं श्रममापन्नस्तत्साम्प्रतमभूत्तव ॥
प्रत्यक्षं नृपशार्दुल एकस्त्वं भाग्यवान्भुवि ।
अमुं पश्य जगन्नाथं पुण्डरीकायतेक्षणम् ॥
भक्तानुग्रहपाथोधिं सर्वज्ञाननिधिं हरिम् ।
यं द्रष्टुं योगिनो नित्यं यतन्ति यतमानसाः ॥
अवधानेन महता क्षणां पश्यन्ति मानवाः ।
सोऽयं दारुमयं देहं समात्थाय जनार्दनः ॥
अनुग्रहीतुं त्वां भूप प्रत्यक्षत्वमुपागतः ।
भजैनं धरणीनाथं स्तुहि कारुण्यसागरम् ॥ -तत्रैव- १९/५१-५५ ।

७३५. त्वदंघ्रिपाथोजयुगं मुरारे नोपासितं जन्मसु पूर्वजेषु ।
तत्कर्मणां दारुणपाकभाजं दीनं परित्राहि कृपांबुधे माम् ॥

-तत्रैव- २०/२ ।

७३६. न मे त्वदन्यः खलु बन्धुरत्र प्रवाह विभ्रष्टतरुस्वभावे ।
पापीयसी बुद्धिरूपेतभावा स्नेहानुबन्धा विषयेऽभिभेद्या ॥

स्तुतिकारणार्थं नारदेन समादिष्टः । तथैवाचरणपूर्वकमतन्तरं राजा प्रतिमाचतुष्टयस्य[७३७] स्तुतिं चकार । ततः देवर्षिणा नारदेनाऽपि [७३८]स्तुतिः कृता । समुपस्थितैः तत्रत्यैः अन्यैरपि तथाचरणानन्तरं राजा इन्द्रद्युम्नो भगवतो वासुदेवस्य सोपचारपूजासम्बन्धे जिज्ञासुः भूत्वा नारदस्योपदेशानुसारं द्वादशाक्षरमन्त्रेण बलभद्रं, त्रयीसूक्तेन नारायणं, देवीसूक्तेन सुभद्रां, सौन्दर्शन्या सुदर्शनं च पूजयामास[७३९] । तदानीं राज्ञा इन्द्रद्युम्नेन यावत्यः गावः दक्षिणारूपेण प्रदत्ताः तासामेव क्षुरोद्धृतः

अहर्निशं मे तव पादपद्मान्नापैतु मत्प्रार्थितमेतदेव ।
त्वां सच्चिदानन्दसुपूर्णसिन्धुं प्राप्तास्तु ये जन्मसहस्रभाग्यैः ॥
-स्कन्दपुराणे उत्कलखण्डे -२०/१३-१४ ।

७३७. आयासपात्रं परमं सुदीनं मां त्राहि विष्णो जगदेकवन्द्य ।
वेदान्तवेद्याव्यय विश्वनाथ त्वामिशिषे हन्तुमघौघराशिन् ॥
त्वज्ञानमानुदेयमेत्य चान्ते प्रबोध्यते त्वां शरणं प्रपद्ये ।
त्वमेक एवाखिललोककर्त्ता फणासहस्रैः परिवीतमूर्त्तिः ॥
पर्यायवृत्या बलिनां वरिष्ठ त्वामीशितारं शरणं प्रपद्ये ।
यया सृजस्यसि जगन्तिनाथ वक्षः सरोजासनया स्वशक्त्या ॥
तां भद्ररूपां जगदाश्रयान्ते देवारणिं पादयुगे नतोऽस्मि ।
यदंशुजाल प्रतिसृष्टमेतद्ब्रह्माण्डजालं करसन्निनाथ ॥
सुदर्शनं दैत्यबलस्य हन्तृ चक्राभिधं त्वां प्रणतः सुदर्शनम् ॥
-तत्रैव- २०/१९,२१-२४ ।

७३८. जय जय नारायण अपारो भवसागरोत्तारपरायण........
.... न कस्यापि ज्ञान नमस्ते नमस्ते ।
-तत्रैव- २०/२६ ।

७३९. स्वयं स नृपतिश्रेष्ठः पूजयामास तान्क्रमात् ।
नारदस्योपदेशेन विधिना मन्त्रतस्तथा ॥
द्वादशाक्षरमन्त्रेण बलभद्रमपूजयत् ।
यमुपास्य ध्रुवः स्थानं प्राप्तवानुत्तमोत्तमम् ॥
त्रयी प्रसिद्धं यत्सूक्तं पावनं पौरुषं महत् ।
तेन नारायणं भूपः पूजयामास शक्तितः ॥
देव्यासूक्तेन भद्रां तां सौन्दर्शन्यां सुदर्शनम् ॥
-तत्रैव- २०/३०-३३ ।

गर्त्तः दानाम्बुना परिपूर्णः सन् [७४०]इन्द्रद्युम्नसरोवरत्वेन प्रसिद्धो जातः। तदनन्तरं राजा भगवतः प्रासादनिर्माणे समुचितव्यवस्थां[७४१] कृतवान्।

एकविंशाध्याये श्रुत्यादिविहितोपायैर्विना नैव भगवद्दर्शनं सुलभं भवेत् इति केनचित् विप्रेण भगवतो विष्णोर्दारुप्रतिमायां माहात्म्यं सुविस्तृतं [७४२]प्रकटीकृतम् । द्विजस्य एतद्वचनं श्रुत्वा हृष्टमानसेन कर्मणोऽस्य प्रतिष्ठापने पद्मयोनेः सामर्थ्यं [७४३]संसूच्य तस्य निमन्त्रणार्थं

---

७४०. अश्वमेधाङ्गभूताश्च कोटिशो गा ददौ तदा ।
अलङ्कृतास्तथान्याश्च ददौ गा बहुदक्षिणाः ॥
तासां खुरोद्धृतेर्योगाद्गर्त्तोभूद्द्विजसत्तमाः ।
दानाम्बुना स पूर्णाङ्गं वै तीर्थमासीन्महाफलम् ॥
नाम्नाख्यातं सरस्तस्य इन्द्रद्युम्नस्य भूपतेः ॥
-स्कन्दपुराणे उत्कलखण्डे - २०/३५-३६,३८ ।

७४१. ततः प्रासादघटनामुपचक्राम भूपतिः ॥
- तत्रैव- २०/४० ।

७४२. न हि प्रवृत्तिर्विष्णोस्तु विना वेदं प्रवर्त्तते ।
परेषां स्वस्य वा सृष्टौ श्रुतिप्रामाण्यवत्प्रभुः ॥
विना श्रुतिं प्रवर्त्तेच्चेत्कस्तत्प्रामाण्यमृच्छति ।
तस्माच्छ्रुति प्रसिद्धोऽयमवतारोऽत्र भूपतेः ॥
वेदान्तवेद्यं पुरुषं गीतं तं सामगीतेषु ।
प्रतिमानं तु जानीहि निःश्रेयसकरं नृणाम् ॥
श्रुत्यादिभिर्विनोपायैः परमानन्दमुक्तिदः ।
निरन्तरगतायतिदुस्थितानां दुरात्मनाम् ॥
एष दारुवपुर्विष्णुः सुखदाता सुबान्धवः ।
श्रुतिस्मृत्युक्तनियमा वर्त्तन्ते नेह पार्थिव ॥
अस्मादत्र महाभाग तिष्ठ स्वबलपौरुषः ॥
विद्वत्तमोऽसि भक्तश्च साङ्गोपाङ्गममुं भज ॥
-तत्रैव- २१/५-७,१३-१४,२१-२२ ।

७४३. वेत्त्येतदर्थं भगवान् पद्मयोनिः प्रजापतिः ।
अज्ञासिषं च भूपाल साम्प्रतं तन्मुखादहम् ॥
-तत्रैव- २१/२५ ।

तन्निकटगमने स्वमनोभावः प्रकटीकृतः[७४४] । देवर्षिर्नारदस्याभिप्रायं ज्ञात्वा तेन सह ब्रह्मणः समीपं गन्तुं राजा इन्द्रद्युम्न इच्छुकः अभवत्[७४५]। देवर्षिनारदः सन्तुष्टः सन् पितामहस्यान्तिकं तेन सह गच्छन् पथि राजानम् इन्द्रद्युम्नं कथितवान् यत् प्रतिष्ठाकाले सप्तर्षिभिः सह सः तत्र प्रासादपरिसरे स्वयमुपस्थितो[७४६]भविष्यति इति ।

द्वाविंशाध्याये पुष्परथेन ब्रह्मलोकं प्रति गन्तुं सर्वं स्थिरीकृत्य राजा नारदं[७४७]विज्ञापितवान् । श्रुत्वेतत् श्रद्धावान् देवर्षिर्नारदः इन्द्रद्युम्नेन सह महावेदीं प्रविश्य ब्रह्मलोकं प्रति गन्तुं भगवतोऽनुज्ञां लब्धुं प्रार्थनां कृतवान् इति ऋषीणां सविधे महर्षिणा जैमिनिना

---

७४४. तस्याज्ञया कृतं सर्वं यथाभिलसितं तव ।
एनमाराध्य तिष्ठात्र याम्यहं ब्रह्मणोऽन्तिकम् ॥
कृतं निवेदयिष्यामि प्रकाशं च मुरद्विषः ॥
-स्कन्दपुराणे उत्कलखण्डे - २१/२६-२७ ।

७४५. महर्षेऽहं त्वयासार्द्धं यियासुर्ब्रह्मणोऽन्तिकम् ॥
यत् प्रासादाज्जगन्नाथश्चक्रेऽयं लोचनातिथिः ।
निवेद्य तं च प्रासादं प्रतिष्ठार्थं सुरद्विषः ॥
विज्ञापयिष्ये सन्निध्ये प्रासादस्थापनोत्सवम् ।
यथा स्वयं समागम्य ब्रह्मलोकात् पितामह ॥
महोत्सवं भगवतः प्रासादेऽत्र करिष्यति ।
तन्मुने मामपि विद्येः सन्निधिं प्रापयस्व च ॥
-तत्रैव- २१/२९-३२ ।

७४६. पितामह द्रष्टुकामो गन्ता चेदन्तिकं विभोः ।
उपदेक्ष्यति सोऽप्यस्य यात्रास्तास्ता महोत्सवाः ॥
स्वयं च भगवानेव वरं तुभ्यं प्रदास्यति ।
प्रतिष्ठापिते प्रासादे तस्मिन्काले स्वयम्भुवा ॥
अहमप्यागमिष्यति तदा सप्तर्षिभिः सह ॥
-तत्रैव- २१/६८-७० ।

७४७. अयं पुष्परथोऽस्त्येव मनसो वेगवान् मुनेः ।
एनमारुह्य यास्यावः क्षणं तावत् प्रतिक्ष्यताम् ।
यावदेताननुज्ञाप्य प्रासादे ह्यधिकारिणः ॥
- तत्रैव- २२/१-२ ।

[७४७]समुपन्यस्तम् । अतः परं नारदेन सह ब्रह्मलोकं प्रति गच्छता इन्द्रद्युम्नेन व्योममण्डलादीनि अतिक्रम्य यावत् उपर्युपरि गम्यते तावत् भगवतः प्रासादप्रतिष्ठादिविषये अपि च पृथिवीतः ये खलु आगताः तेषां प्रत्यावर्त्तनं न तत्र जातम् इति धिया प्रासादनिर्माणकर्मणि नियुक्तानां शिल्पीनां कदाचित् मन्दाचरणविषये तथा च राज्ञोऽनुपस्थितो शत्रुभिः तद्राज्यापहरणादिव्यापारविषये च विचिन्त्य भृशं [७४९]दुःखमनुभूतम् । नृपं दुःखमानसं ज्ञात्वा नारदेन मानुषवपुषा ब्रह्मलोकगमने तस्य सौभाग्यातिशयमिति कथयित्वा नश्वरसंसारव्यापारे न कदाचित् चिन्ता

---

७४८. करेण धृत्वा राजानं महावेदीं प्रविश्य च ।
सहितं रामभद्राभ्यां नत्वा कृष्णं मुहुर्मुहुः ॥
अनुज्ञां प्रार्थयामास ब्रह्मलोक गतिं प्रति ॥
इन्द्रद्युम्नोऽपि वचसा मनसा वपुषा हरिम् ।
प्रदक्षिणीकृत्य पुनर्नत्वा साष्टाङ्गमुन्मनाः ।
ब्रह्मलोकगतिं विप्रा याचते स्म कृताञ्जलिः ॥
-स्कन्दपुराणे उत्कलखण्डे - २२/४-५ ।

७४९. इन्द्रद्युम्नो न सस्मार पार्थिवं वासमात्मनः ।
क्रमादूर्ध्वगतिर्गच्छन्पश्यनसौख्यैकभाजनान् ॥
निर्द्वाद्वानभिलाषोत्थित तत्क्षणानेक पौरुषाम् ।
केवलं भगवत्प्रीत्ये कर्मभूमौ चकार यत् ॥
प्रासादं चिन्तयामास सम्पूर्णो वा न वा भवेत् ।
मय्यागते ब्रह्मलोकं शत्रुभिरभिभूयते ॥
श्लथादरा वा भूयासुः सेवकाः द्रव्यलोभतः ।
गृहीतवेतना शिल्पिवृन्दा मन्दक्रियास्तथा ।
न शीघ्रं घटयिष्यन्ति मयि ब्रह्मक्षयागते ॥
यावद्गमिष्ये धातारं गृहीत्वाहं चतुर्मुखम् ।
तावन्न पुनरेव स्यात् प्रासादो मयि दूरगे ॥
इहा यातास्तु ये पूर्वे न पुनस्ते क्षितिं गताः ।
मन्वानां मम सामन्ता इत्थं वा दुष्टमानसाः ॥
राज्यं ममाहरिष्यन्ति द्विषन्तः किमु साम्प्रतम् ॥
-तत्रैव- २२/११-१६ ।

करणीया इति [७५०]प्रबोधितम् । यदा राजा इन्द्रद्युम्नेन देवर्षेर्नारदस्य सविधे स्वाभिप्रायसकलं प्रकटीकृतं भगवतः कर्मणि विघ्नकरणे न कस्यचन सामर्थ्यं विद्यते इति नारदेन [७५१]प्रकाशितम् । इन्द्रद्युम्ननारदौ ब्रह्मलोकान्तिके यदा समुपस्थितौ जातौ तदा वेदध्वनिः तयोः श्रुतिकुहरे [७५२]प्रविष्टः । अवसरेऽस्मिन् ब्रह्मलोकस्य द्वारपालः इन्द्रद्युम्ननारदौ दृष्ट्वा सविनयं भगवतो ब्रह्मणः सविधे गमनार्थं मार्गं [७५३]ददौ ।

त्रयोविंशाध्याये इन्द्रद्युम्नस्य परिचयः आगमनकारणं च

---

७५०. कृतार्थोऽसि महाभाग मानुषवपुः स्वयम् ।
ब्रह्मलोकमिहायातः प्रत्यक्षं दृष्टवान् हरिम् ।।
इहायाता न शोचन्ति इमे संसारकल्पके ।।
-स्कन्दपुराणे उत्कलखण्डे - २२/२०-२१ ।

७५१. प्रजापतिसमत्वं हि न तु सामान्यभूपतिः ।
केनाप्यपकृतं नैव भूमौ पूर्वैरनुष्ठितम् ।।
किं पुनः स्तव कृत्यं तु यः सृष्टिस्थितिहानिकृतम् ।
ब्रह्मलोकं गतस्त्वाद्यं प्राप यशसा तव ।।
त्रैलोक्ये भ्रमतो नित्यं यथा सूर्य निशाकरौ ।
यस्य कार्येषु भगवान् सहायोऽसौ चतुर्मुखः ।।
तेषु किं राजशार्दूलं विघ्नशंकाऽपि जायते ।
एष दूरेऽस्ति राजेन्द्र प्रत्यक्षं यस्तवद्विषाम् ।।
सदोमध्य गतः शक्रः साक्षात्त्रिजगतीपतिः ।
विशेषतो जगन्नाथप्रासादे कः पुमान् नृपः ।।
निहन्तुं मनसापीच्छेत्तत्र शंकास्तु मा तव ।
-तत्रैव- २२/२५-३० ।

७५२. इत्थमालपतस्तौ तु ब्रह्मलोकान्तिकं गतौ ।
शुश्रुवाते सुदूरातौ ब्रह्मणां मुखोद्गतम् ।।
स्वाध्यायशब्दं सुपदं स्पष्टवर्णं क्रमस्वरम् ।। -तत्रैव- २२/३२-३३ ।

७५३. इन्द्रद्युम्नेन सहितं नारदं प्रविलोक्य सः ।
द्वारपालः सविनयं नमन्नतकन्धरः ।।
त्वया विना शोभते नो स्वामिंस्तव पितुः सभा ।
इति स्तुवाददौ तस्य प्रवेशं विनयान्वितः ।।
-तत्रैव- २२/४५-४६, ४८ ।

द्वारपालस्य सविधे नारदेन [७५४]समुपस्थापितम् । श्रुत्वैतत् मर्त्यवासिनः तस्य राज्ञः अन्तःप्रवेशे ब्रह्मणः आज्ञा देवर्षिणा नारदेन प्रथमतः प्राप्तव्या इति द्वारपालेन [७५५]सविनयमुक्तम् । तदनन्तरं सभागृहमध्यं प्रविष्टेन नारदेन वेदगानरतस्य ब्रह्मणः केवलं कटाक्षपातात् [७५६]सम्मतिः प्राप्ता । ततो देवर्षिनारदः इन्द्रद्युम्नं ब्रह्मणः सभागृहमध्यं [७५७]प्रवेशयामास । तत्र राजा इन्द्रद्युम्नो भगवन्तं ब्रह्माणं दारुब्रह्मत्वेन मन्यमान सन् भक्त्या प्रणामपूर्वकं स्तुतिं [७५८]कृतवान् । ततो भगवता ब्रह्मणा इन्द्रद्युम्नस्यागमनकारणं सश्रद्धं [७५९]पृष्टम् । तस्मात् स्वाभीप्सितविषयं सूचयित्वा राजा इन्द्रद्युम्नः सविनयं दारुरूपेण चतुर्द्धामूर्त्तिविशिष्टस्य भगवतो जगन्नाथस्य स्थापनार्थं भवताऽवश्यमेवागन्तव्यम् इति तत्र

---

७५४. दैवारिकायं राजर्षिरिन्द्रद्युम्नो महायशाः ।
सार्वभौमौ वैष्णवाग्र्यो धातारं द्रष्टुमागतः ॥
-तत्रैव- २३/१ ।

७५५. तत्रायं मर्त्यनिलयस्तिष्ठेदपि हि पौरुषम् ।
भवान्गत्वा पदसमयोर्नि विज्ञाप्येनं प्रवेशयः ॥
-स्कन्दपुराणे उत्कलखण्डे- २३/४ ।

७५६. इत्युक्त्वा नारद गत्वा ब्रह्माणं जगतां पतिम् ।
नत्वा साष्टाङ्गपतनं विज्ञप्तौ वसुधाधिपः ॥
कटाक्षेणादिशत्सोऽथ इन्द्रद्युम्नं प्रवेशनम् ।
नोवाच किंचिद्भगवान् गाने दत्तावधानतः ॥
-तत्रैव- २३/७-८ ।

७५७. ज्ञात्वेङ्गितं नारदोऽथ इन्द्रद्युम्नं नृपोत्तमम् ।
प्रवेशयामास ततः शक्राद्यैः सुनिरीक्षितः ॥
-तत्रैव- २३/९ ।

७५८. दृष्ट्वा पितामहं दूरात् स्रष्टारं जगतां नृपः ।
आमन्यत द्विजश्रेष्ठा साक्षाद्दारुमयं हरिम् ॥
शनैः शनैः ययौ भूप प्रणमश्च कृताञ्जलिः ।
किञ्चित् दूरे स्थितो भूप नारदस्य निदेशतः ॥
-तत्रैव- २३/२०-२१ ।

७५९. किमर्थमागतोस्यत्र तद् ब्रुहि हृदयस्थितम् ।
मयि दृष्टे न दुष्प्रापममृतं किन्नुवाञ्छितम् ॥ -तत्रैव- २३/२१ ।

[७६०]अनुरोध कृतवान् । तदर्थं भगवता ब्रह्मणा स्वस्वीकृतिः प्रदत्ता । अवसरेऽस्मिन् ब्रह्मलोकं प्रति आगतस्य इन्द्रद्युम्नस्य बहुकालोऽतीतो जातः । ब्रह्मा एतत् विज्ञाप्य शीघ्रं धरणीतलं गत्वा तस्यैव देव प्रासादस्य स्वाधीनताकरणेन सह प्रतिष्ठानिमित्तं सम्भारसकलस्य आयोजनार्थं संचोद्य ततः परं स्वयं गमिष्यामीति[७६१] इन्द्रद्युम्नं कथितवान् । भगवतो जगन्नाथस्य दारुदेहधारणे कारणं किमिति प्रश्नस्य उत्तरं ब्रह्मणा ददता । संसारपापनाशाय कारणं चिन्ताभिभूतस्य भगवतो विष्णोः क्षीराब्धिस्थानन्तशय्यायां शयनकाले तस्य शरीरात् स्खलितेभ्यो लोमेभ्यो ये ये कल्पद्रुमाः सृष्टाः तेषु एकेनैव द्रुमेण तस्य प्रकाशनं यथा भवेत् तथा सिद्ध्यर्थं दारुरूपं जातम् इति [७६२]उत्तरितम् । ततो

---

७६०. मूर्घ्न्याधाम तवानुज्ञां कथितं तव सूनुना ।
इष्टा सहस्रं क्रतवस्तदन्ते दारुदेहभृत् ।।
आविर्बभूव भवगान्भूतभव्यभवत्प्रभुः ।
त्वदनुग्रहसम्पत्तिवशादेवावलोकयन् ।।
तादृशं पुण्डरीकाक्षं येन त्वत्लोकमागतः ।
यस्यारब्धो मया देव प्रासाद तत्र चेत्स्वयम् ।।
गत्वा देवं जगन्नाथं स्थापयिष्यसि चेत्प्रभोः ।
त्वनुग्रहस्तु सफलोभवेन्मे लोकभावन ।।
एतदर्थं जगत्स्वामिन्नारदेन सहाधुना ।
त्वत्पादपद्मयुगलं द्रष्टुं त्वत्लोकमागतः ।।
प्रसीद मां कुरुष्वेदं जगन्नाथस्त्वमेव हि ।
त्वमेव स जगन्नाथो न भेदोयुवयोर्विभो ।।
स्थाप्यः स्थापयिता चासि वेद्यो वेदयिता भवान् ।।
-स्कन्दपुराणे उत्कलखण्डे- २३/२३-२९ ।

७६१. तदगच्छभूमौ रोजन्द्र देवं प्रसादमेव च ।।
आत्मसम्बन्धिनं कृत्वा पुनरायाहि वेगवान् ।
अथवाहं प्रयास्यामि तवानुपदमेव हि ।।
त्वमग्रतो धरां गत्वा यावत्संभारमृद्धिमत् ।
करिष्यसि महाभाग तावदेव व्रजाम्यहम् ।। -तत्रैव- २३/४४-४६ ।

७६२. क्षीरोदार्णवमध्ये हि श्वेतद्वीपे हि तल्पके ।
यः शेते योगनिद्रां तां मानयन्पुरुषोत्तमः ।।

दारुमूर्त्तिदर्शनाय देवैः सह ब्रह्मा मर्त्यलोकमागतवानिति [७६३]परिलक्ष्यते।
चतुर्विंशाध्याये उपस्थितैः देवैः भगवत्स्तुतिः [७६४]कृता । तदवसरे ब्रह्मणा दारुमूर्त्तिस्थापनार्थं पुनः नभोवाणी [७६५]जाता ।

समूलं जगतामादिस्तस्य रोमाणि यानि वै ।
तानि कल्पद्रुमाख्यानि शंखचक्राङ्कितानि वै ॥
तन्मध्यस्थो ह्ययं वृक्षश्चैतन्याधिष्ठितः सुराः ।
स्वयमुत्पतितः सिन्धोः सलिले सत्यपुरुषः ॥
भोगान्भोक्तुं त्रिलोकस्थान्दारुवर्ष्मा जनार्द्दनः ।
अनेकजन्मसाहस्रैर्भक्तियोगेन भावितः ॥
घोरसंसारनाशाय मया पूर्वं प्रयाचितः ।
पुनः पुनः सृष्टिलीनपालनोद्विग्नचेतसा ॥
अशेषकर्मनाशाय जगतां सर्वमुक्तये ।
धारणाध्यानयोगानां दुष्कराणां विनापि सः ॥
मोक्षाय भगवानाविर्बभूव पुरुषोत्तमः ।
प्रच्छन्नं वपुरेतस्य क्षेत्रं नास्य विचारयेत् ॥

-स्कन्दपुराणे उत्कलखण्डे- २३/६१-६६ ।

७६३. प्रतिष्ठायैः भगवतः संयतौ सर्ववस्तुनः ।
इन्द्रद्युम्नोऽपि हृष्टात्मा दृष्ट्वा ब्राह्मीं श्रियं द्विजाः ॥
महदाश्चर्यसंपन्नः प्रणिपत्य जगद्गुरुम् ।
तदाज्ञां शिरसा धृत्वा देवैः क्षीणाधिकारिभिः ॥
आजगाम भूवं विप्रा विधिना चानुमोदितः ॥

-तत्रैव- २३/७८-८० ।

७६४. सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।
स भूमिं सर्वतो व्याप्य अध्यतिष्ठदृशाङ्गुलम् ॥
यः पुमान् परमं ब्रह्म परमात्मेति गीयते ।
भूतभव्यभविष्यं च सर्वपुरुष एवं तत् ॥
एतावानस्य महिमा ज्यायानेष पुमान् प्रभुः ।
पादोऽस्य विश्वभूतानि त्रिपादस्यामृतं दिवि ॥
नमोऽस्त्वनन्ताय सहस्रमूर्त्तये सहस्रपादाक्षिशिरोरुवाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटियुगधारिणे नमः ॥

-तत्रैव- २४/६-८,२० ।

७६५. एतत्प्रतिष्ठानविधौ स्वयमत्रागमिष्यति ।

पञ्चविंशाध्याये नवनिर्मितप्रासादे दारुमूर्त्तीनां प्रतिष्ठापनार्थं मूर्त्तिनिर्माणस्थानतः निर्दिष्टस्थानं प्रति मूर्त्तीनामानयने [७६६]रथत्रित्रयस्य निर्माणं तथा च नारदेन तेषां प्रतिष्ठापनादिविषये आलोचना समुपलभ्यते । तदनन्तरं रथयात्राविषये तथा च रथभङ्गहेतोः राज्यं प्रति [७६७]अपशकुनादिविषये वर्णनमुपलभ्यते ।

षड्विंशाध्याये भगवतः प्रासादप्रतिष्ठानिमित्तं सम्भारसकलं यदा आयोजितं तदा तदानीन्तनमन्दिराधिकारिणा गालनामकेन नृपतिना सह इन्द्रद्युम्नस्य प्रथमतः मनान्तरं जातम् । अनन्तरं मिथः सौहार्दं जातं तथा च गालनृपतिना इन्द्रद्युम्नस्य वश्यता स्वीकरणं कृतमित्यादि-

---

पद्मयोनिः स्वयं सार्द्धं सिद्धब्रह्मर्षिदैवतैः ॥

-स्कन्दपुराणे उत्कलखण्डे- २४/३८ ।

७६६. श्रीवासुदेवस्य रथो गरुडध्वजचिह्नितः ।
पद्मध्वजः सुभद्रायां रथमूर्द्धनि धार्यताम् ॥
रथषोडशचक्रस्तु विष्णोः कार्यः प्रयत्नतः ।
चतुर्दशबलस्यैव सुभद्रायास्तु द्वादश ॥
हस्तशोडशविस्तारो रथचक्रधरस्य तु ।
चतुर्दश बलस्यैव सुभद्रायास्तु द्वादश ॥
पश्येच्चराचरं विश्वं ज्ञानादर्शसुनिर्मले ।
स्थितोहस्ततले नित्यं निर्मलस्तस्य दर्पणः ॥
तलस्थत्वादसौ तालः सदा तेनाङ्कितः प्रभुः ।
ततः स एव शेषस्य बलभद्रवतारिणः ॥
अथवा सीरिणः कार्यं सीरमेव ध्वजोत्तमम् ।
ध्वजः सुनिर्मलः कार्यस्तस्मात्तालध्वजो मतः ॥

-तत्रैव- २५/९-११, १३-१५ ।

७६७. ईषाभङ्गे द्विजभयं भग्नेऽक्षे क्षत्रियक्षयः ।
तुलाभङ्गे वैश्यनाशः शम्या शूद्रभयं भवेत् ॥
धुराभङ्गे त्वनावृष्टिः पीठभङ्गे प्रजाभयम् ।
परचक्रागमं विद्याच्चक्रभङ्गे रथस्य तु ॥
ध्वजस्य पतने विप्रा नृपोऽन्यो जायते ध्रुवम् ।
प्रतिमाभङ्गतायां तु राज्ञो मरणमादिशेत् ॥

-तत्रैव- २५/६१-६३ ।

सकलविषयो[७६८] वर्णितोऽस्ति ।

सप्तविंशाध्याये ब्रह्मलोकादागत्य ब्रह्मणा भगवत्प्रासादस्य प्रतिष्ठा सम्पादिता तथा च जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनदारुदेवतानां रथोपरि [७६९]स्तुतिराचरिता ।

अष्टविंशाध्यायादारभ्य अष्टचत्वारिंशाध्यायं यावत् भगवतः चतुर्द्धामूर्त्तिविशिष्टस्य जगन्नाथस्य ये ये विषयाः पूजोत्सवादिप्रसङ्गे

---

७६८. गालो नाम महीपालस्तदा क्षितितलेऽभवत् ।
सोप्यत्र प्रतिमां कृत्वा माधवाख्यां दृषन्मयीम् ॥
स्थापयित्वात्र प्रसादे पूजयामास ऋद्धिमत् ॥
गालोऽभ्यागात्ससैन्यः सन्क्रुद्धस्तं नीलपर्वतम् ।
दृष्ट्वा प्रतिष्ठासम्भारं मर्त्यैः स्वप्नेऽपि दुर्लभम् ॥
विस्मयाविष्टचेताः स तस्थौ गाल नराधिपः ॥
यत्नाद्दिव्यं सविज्ञाय इन्द्रद्युम्नं नराधिपम् ।
ब्रह्मलोकादागतं तं कर्त्तारं देववेश्मनः ॥
प्रतिष्ठापयितुं देवैः सार्द्धं सम्भारकारकम् ।
सहितं पद्मविधिना गुरुणा नारदेन च ॥
ब्रह्माणं चागमिष्यन्तं प्रतिष्ठायै सुरोत्तमम् ॥
इन्द्रद्युम्नस्य निकटं विनीतः प्रययौ मुदा ॥
अज्ञात्वा महिमां ते सचिवैर्मन्त्रयन् मुहुः ।
योद्धुमभ्यागतो देव दृष्ट्वा ते पौरुषं महत् ॥
साम्प्रतं हि भवानत्र पृथिव्यामेकपार्थिवः ॥
प्रासादे स्थापयेद्यस्तु हरेरर्चां विधानतः ॥
-स्कन्दपुराणे उत्कलखण्डे- २६/५-३३ ।

७६९. नमस्तुभ्यं नमो मह्यं तुभ्यं मह्यं नमो नमः ।
अहं त्वं त्वमहं सर्वं जगदेतच्चराचरम् ॥
अनिर्वक्तव्यमेवेदं सत्वात्सत्त्वविवेकतः ।
अद्वितीय जगद्भास स्वप्रकाश नमोऽस्तु ते ॥
फणामणिफणाकारक्षितिमण्डलधारिणे ।
नमः कालाग्निरुद्राय महारुद्राय ते नमः ॥
त्वमेव शेष भगवत्सहस्रफणमण्डितः ।
फणामणिगणव्याजसम्भृताखिलभौतिकः ।

प्रतिपादिताः ते निर्दिष्टेषु स्वतन्त्रप्रकरणेषु यथाशक्ति च समुपस्थापयिष्यते ।

पद्मपुराणस्य पातालखण्डे सप्तदशाध्याये वर्णितमस्ति यत् अश्वमेधयज्ञसम्पादनार्थमश्वेन सह शत्रुघ्नः वाजिपुरं प्रति गतवान् । तेन सह सुमतिरपि आसीत् । सुमतिना सह गच्छता शत्रुघ्नेन मार्गे सुशोभनं गिरिवरमेकं दृष्ट्वा तस्य परिचयज्ञानार्थं यदा [770]इप्सितं तदा सोऽयं पुरुषोत्तमशोभितो नीलगिरिरिति सुमतिना [771]उत्तरं दत्तम् । यस्यैव भगवतः पुरुषोत्तमस्य पदरजोऽपि इन्द्रसदृशैः देवैः अहरहः प्रार्थ्यते सोऽयं पुरुषोत्तमः नीलशैलस्योपरि विराजितः, तस्यैव दर्शनं कर्त्तव्यमिति संसूच्यते [772]सुमतिवाक्यात् । तद्दर्शनफलश्रुतौ सुमतिना

यो वै विष्णुः स वै रामो यो रामः कृष्ण एव स ॥
जय देवी जगन्मातः प्रसीद परमेश्वरी ॥
त्वमेव लक्ष्मी गौरी च सती कात्यायनी तथा ॥
जय भद्रे सुभद्रेत्वं सर्वेषां भद्रदायिनी ।
भद्राभद्रस्वरूपे त्वं भद्रकाली नमोऽस्तु ते ॥
चक्रं सुदर्शनं विष्णोश्चतुर्थं वपुरास्थितम् ॥

-स्कन्दपुराणे उत्कलखण्डे- २७/१५-६३ ।

७७०. कोऽयं महागिरिवरो विस्मापयति मे मनः ।
महारजतसत्प्रस्थौ मार्गे राजति मेऽद्भूतः ॥

-पद्मपुराणे पतालखण्डे- १७/२१ ।

७७१. नीलोऽयं पर्वतो राजन्पुरतो भाति भूमिपः ।
मनोहरैर्महाशृङ्गैः स्फटिकाग्रैः समन्ततः ॥
असौ पुण्यगिरिवरः पुरुषोत्तमशोभितः ॥
पवित्रयति सर्वान्नो दर्शनेन मनोहरः ।
अत्र तिष्ठति देवानां मुकुटैरर्चिताङ्घ्रिकः ॥

-तत्रैव- १७/२४, ३२-३३ ।

७७२. यत्पादरज इन्द्रादि देवैर्मृग्यं सुदुर्लभम् ।
देवातादिभिरन्यूनैर्वाक्योर्विन्दन्ति यं बुधा ॥
सोऽत्र श्रीमान्नीलशैले वसते पुरुषोत्तमः ।
आरुह्य तं नमस्कृत्य संपूज्य सुकृतादिना ॥

-तत्रैव- १७/३५-३६ ।

नृपतेः रत्नग्रीवस्य चतुर्भुजप्राप्तिविषये पुरातनं तथ्यम् [७७३]उपन्यस्तम् । तत्र स्वपापेभ्यः मुक्तिनिमित्तं नृपतिना रत्नग्रीवेण यदा चिन्तितं तदेव समुपस्थितेन केनचित् विलक्षणसम्पन्नेन ब्राह्मणेन भगवान् पुरुषोत्तमः आराध्यः एतदर्थम् इति [७७४]सूचितम् । तदा भगवतः श्रीरामचन्द्रस्य नाम्नः प्रतिपादनात् रामचन्द्रपुरुषोत्तमयोर्मध्ये अभेदभावः प्रकटितः । सर्वतीर्थपरिभ्रमणं सम्पाद्य तेन ब्राह्मणेन यत् ज्ञानं लब्धं तत्र नीलगिरौ भगवतः पुरुषोत्तमस्य आत्यन्तिकी महनीयता अस्ति इति [७७५]प्रकटितम् ।

अष्टादशाध्याये पर्यटकेन तेनैव ब्राह्मणेन नृपतेः रत्नग्रीवस्य सविधे नीलपर्वते वासं कुर्वन्तो भिल्लाः चतुर्भुजधारिणः पापशून्याः सञ्जाता इति दृढं [७७६]प्रतिपादितम् । किन्तु तत्रस्थनीलपर्वतः गङ्गासागरतोयेन नितरां क्षालितप्राङ्गण इति [७७७]प्रतिपादनात् तदानीन्तनकाले गङ्गानदीस्रोतसः सागरपतितस्य साक्षात् प्रभावो नीलगिरेः पाददेशे उपलब्धः आसीदिति कथयितुं शक्यते ।

---

७७३. रत्नग्रीवस्य नृपतेर्यद्वृत्तं सुकुटुम्बिनः ॥
चतुर्भुजादिकं प्राप्तं देवदानवदुर्लभम् ।
आसीत् काञ्चिमहाराज पुरीलोकेषु विश्रुता ॥
-पद्मपुराणे पातालखण्डे- १७/३८-३९ ।

७७४. सेव्यः श्रीरामचन्द्रोऽसौ संसारज्वरनाशकः ।
पूज्य स एव भगवान् पुरुषोत्तमसंज्ञकः ॥
-तत्रैव- १७/६७ ।

७७५. परमेकं महच्चित्रं यद्दृष्टं नीलपर्वते ।
पुरुषोत्तमसान्निध्ये तत्र काप्यक्षिगोचरम् ॥
-तत्रैव- १७/८२ ।

७७६. तत्र भिल्ला मया दृष्ट्वा पर्वताग्रे धनुर्भुतः ॥
चतुर्भुजा मूलफलैर्भक्ष्यैर्निर्वाहितक्लमाः ॥
-तत्रैव- १८/३ ।

७७७. मया पर्यटता तत्र गतं नीलाभिधे गिरौ ।
गङ्गासागरतोयेन क्षालितप्राङ्गणे मुहुः ॥
-तत्रैव- १८/२ ।

एकोनविंशाध्याये नीलगिरियात्राविधिवर्णनप्रसङ्गे पर्यटकेन ब्राह्मणेन पापेभ्यः मुक्तिनिमित्तं चतुर्भुजत्वादिप्राप्तिनिमित्तं च तत्र नीलगिरिं गत्वा पुरुषोत्तमदर्शनार्थं नृपतिः रत्नग्रीवः [७७८]प्रचोदितः ।

विंशाध्याये गण्डकीशालग्रामममाहात्म्यवर्णनप्रसङ्गे नृपतिना रत्नग्रीवेण मार्गे एव पुरुषोत्तमनामश्रवणं विना अन्यत् किमपि नोपलब्धम् ।

एकविंशाध्याये रत्नग्रीवः नीलगिरिं गत्वा तत्र गङ्गाब्धिसङ्गमे स्नानादीन् समाप्य यथा भगवतः पुरुषोत्तमस्य दर्शनं मिलिष्यति तदर्थं व्रतं कृत्वा[७७९] स्तोत्रपाठं कृतवान् । तत्र पुरुषोत्तमनामोच्चारणं [७८०]सुमतिवाक्यात् प्राप्यते ।

द्वाविंशाध्याये रत्नग्रीवेण स्वप्नदर्शनानुसारं नीलगिरौ भगवतः विराजमानविषयः प्रतिपादितः । तथ्येभ्यः एतेभ्यः एतदेव ज्ञातं भवति यत् विष्णोर्विषये यद्यपि निर्दिष्टेऽस्मिन् पुराणे पूर्वोक्तस्थलेषु विचारितं तथापि पुरुषोत्तमनाम्नः मुहुर्मुहुरुच्चारणेन सह रामचन्द्रसम्बन्धि-विषयवस्तुनः प्रतिपादनात् तदानीं श्रीरामचन्द्रस्य तादृशी ख्यातिर्जाता यथा श्रीजगन्नाथदेवस्य अस्तीति ।

---

७७८. तत्रापश्यं महाराज देवं देवादिवन्दितम् ।
नमस्कृत्य कृतार्थोऽहं जातेऽन्नप्राशनेन च ॥
चतुर्भुजत्वं सम्प्राप्तं शङ्खचक्रादिचिह्नितम् ।
पुरुषोत्तमदर्शनेन न पुनर्गर्भमाविशम् ॥
राजंस्त्वमपि तत्राशु गच्छ नीलाभिधं गिरिम् ।
कृतार्थं कुरुचात्मानं गर्भदुःखविवर्जितम् ॥
-पद्मपुराणे पातालखण्डे- १९/३-५ ।

७७९. स्नात्वा गङ्गाब्धिसंयोगे ततोऽनशनमादधात् ॥
करिष्यति कृपां यदि दर्शने पुरुषोत्तमः ।
पूजां कृत्वाऽशनं कुर्यामन्यथाऽनशनं व्रतम् ॥
-तत्रैव- २१/१७-१८ ।

७८०. गायन्गच्छन्गृणंस्तिष्ठन्वदत्येतदहर्निशम् ।
दर्शयस्व कृपानाथ स्वां तनुं पुरुषोत्तमः ॥
-तत्रैव-२१/३० ।

द्वादशयात्राः-

मनुष्यसमाजे जातिधर्मवर्णनिर्विशेषेण यथा उत्सवानां पर्वणां च पालनं भवति तथा अस्मज्जगन्नाथसंस्कृतौ विविधाः उत्सवाः विशेषतः श्रीजगन्नातदेवायतने परिपाल्यन्ते । पुराणसिद्धान्तानुसारेण द्वादशपूजोत्सवाः एव सुप्रसिद्धाः सन्ति । त एव उत्सवाः यात्रापदेन न केवलमधुनातनकालेऽपि च [७८१]प्रसिद्धपुराणेषु व्यवह्रियन्ते ।

जगन्नाथदेवस्य ता एव [७८२]द्वादशसंख्यका यात्राः प्रत्येकस्मिन् संवत्सरे स्नानपूर्णिमा, गुण्डिचायात्रा, शयनोत्सवः, दक्षिणायनोत्सवः, पार्श्वपरिवर्त्तनोत्सवः, उत्थापनोत्सवः, प्रावरणोत्सवः, पुष्याभिषेकोत्सवः, उत्तरायणोत्सवः, दोलोत्सवः, दमनकोत्सवः, अक्षयतृतीया चेति प्रसिद्धाः भवन्ति । एतासां यात्राणां क्रमानुसारमालोचनं क्रियते ।

१. स्नानयात्रा-

ज्येष्ठपूर्णिमायां भगवतः श्रीजगन्नाथदेवस्य दारुब्रह्ममूर्त्तिचतुष्टयस्य स्नानोत्सवः निर्दिष्टे स्नानमण्डपे परिपाल्यते । [७८३]ब्रह्मपुराणानुसारं श्रीजगन्नाथमन्दिरस्थकूपात् सुवर्णकलसैरेव जलमानीय तज्जलेन स्नानमण्डपे विराजितानां श्रीबलभद्रसुभद्राजगन्नाथसुदर्शनानां यथाक्रमं चन्दनगन्धादिपूरितेन अभिमन्त्रितेन जलेन

---

७८१. (क) यात्रा द्वादश पुण्या या उद्दिश्य भगवत्प्रियाः ॥
द्वादशैता महायात्रा गुण्डिचाद्यास्तु पावनः ॥
-स्कन्दपुराणे उत्कलखण्डे- ४५/२, ४६/२९ ।

(ख) यात्रा द्वादशसम्पूर्णा यदा स्यात्तु द्विजोत्तमाः ॥
-ब्रह्मपुराणे- ६७/११ ।

७८२. मञ्चास्नानं रथवरगतिः शायनं चायने द्वे ।
पार्श्वावृत्तिः शयननिवृत्तिः प्रावृत्तिं पुष्यपूजा ।
दोलाकेलिदमनकमहोक्षय्यापुण्या तृतीया
यात्रा ह्येता भुवनविदिता द्वादशा हे नरेन्द्र ॥
- यात्राभागवतम् ।

७८३. मासि ज्येष्ठे च सम्प्राप्ते नक्षत्रे चन्द्रदैवते ।
पौर्णमास्यां तदा स्नानं सर्वकालं हरेर्द्विजाः ॥

स्नानकार्यं सम्पाद्यते । एतस्मिन्नेव महोत्सवे ब्राह्मण-क्षत्रिय-वैश्य-शूद्रप्रभृतीनां सर्वेषामस्ति समान एव अधिकारः इति ब्रह्मपुराणं यत् प्रस्तौति अधुनाऽपि तत् श्रीपुरुषोत्तमक्षेत्रेऽस्मिन् स्नानोत्सव-परिपालनावसरे तथापरिलक्ष्यते । ज्येष्ठानक्षत्रयुतायां पौर्णमास्यां स्नानयात्राविधानं सिद्धमेव । [७८४]फलश्रुतौ भगवतः एतासां प्रतिमानां स्नानयात्रादर्शनं विहितमिति । [७८५]स्कन्दपुराणस्य पुरुषोत्तमक्षेत्रमाहात्म्य-

सर्वतीर्थमय कूपस्तत्राऽस्ते निर्मलः शुचिः ।
तदा भोगवती तत्र प्रत्यक्षा भवति द्विजाः ॥
तस्माज्ज्येष्ठ्यां समुद्धृत्य हेमाढ्यैः कलशैर्जलम् ।
कृष्णरामाभिषेकार्थं सुभद्रायाश्च भो द्विजा ॥

-ब्रह्मपुराणे- ६५/३-५ ।

७८४. तस्मिन्काले तु ये मर्त्याः पश्यन्ति पुरुषोत्तमम् ।
बलभद्रं सुभद्रां च ते यान्ति पदमव्ययम् ॥
सुभद्रा राम सहितं मञ्चस्थं पुरुषोत्तमम् ।
दृष्ट्वा निरामयस्थानं यान्ति नास्त्यत्र संशयः ॥

-तत्रैव- ६५/५७-५८ ।

७८५. कृतस्य प्रथमे ज्येष्ठे ग्रीष्माख्य ऋतु संस्थितौः ।
ज्येष्ठ्यामहं चावतीर्णस्तत्पुण्य जन्मवासरम् ॥
तस्या मे स्नपनं कुर्यात् महास्नान विधानतः ।
पत्यर्चायां महाराज साधिवासं समृद्धिमत् ॥
कम्बु काहालमुरजध्वनिषु सुस्वरेषु च ।
द्विजातयः स्वर्णकुम्भैरुद्धरेयुस्ततो जलम् ॥
ज्येष्ठ्यां प्रातस्तनेकाले ब्रह्मण सहितं च माम् ।
रामं सुभद्रां संस्नाप्य ममलोकमवाप्नुयात् ॥
स्नाप्यमानं तु यः पश्येन्मां तदा नृपसत्तम ।
देहबन्धं च नाप्नोति स पुनर्न तु पुरूषः ॥
कारयित्वा दृढं मञ्चमैशान्यां दिशि मण्डितम् ।
वितानशोभारचितं चन्दनाम्भः समुक्षितम् ॥
तत्र मां रामभद्राभ्यां स्नापयित्वा पुनर्नयेत् ।
दक्षिणाभिमुखं यान्तं यो मां पश्यति भक्तितः ।
तत्तद्ध्रुवमवाप्नोति मनसा यद्यदिच्छति ॥

-स्कन्दपुराणे उत्कलखण्डे- २९/१६-१७,२२-२७ ।

प्रसङ्गे भगवता श्रीपतिना स्वमुखेन सत्ययुगस्य प्रथमज्येष्ठपौर्णमासी एव स्वजन्मवासर इति संसूच्य तस्मात् ज्येष्ठपूर्णिमायां स्वस्नानविधानार्थं राजा इन्द्रद्युम्नः प्रचोदितः । स्नानमण्डपे भगवतः प्रतिमाचतुष्टयस्य प्रतिष्ठापनार्थं यद्यपि पुराणेषु एतेषु विशेषतः विधानं नोपलब्धं भवति तथापि सम्प्रति एतदेव विधानं संघटते । अन्यत्र विशेषतः बलभद्रदेवस्य प्रसिद्धपीठे केन्द्रापडानगर्यां दारुमूर्त्तिचतुष्टयस्य चन्दनागुरुमिश्रिततीर्थजलेन स्नानविधानं विना केवलं चन्दन-दिनास्नानविधानं भवतीति [७८६]डॉ० विश्वनाथस्वाई महाभागैः प्रतिपादितमस्ति ।

२. *गुण्डिचायात्रा (रथयात्रा)-*

भगवतः श्रीजगन्नाथस्य द्वादशयात्रासु इयमेवयात्रा मूर्द्धन्यभूतं स्थानं धत्ते । यात्रावसरेऽस्मिन् रथत्रयाधिरूढा सत्यो भगवतः चतस्रप्रतिमाः गुण्डिचामण्डपं यान्ति । गुण्डिचामण्डपस्य महावेदीतिनामान्तरत्वात् इयमेव यात्रा गुण्डिचायात्रा महावेदीयात्रा वेति प्रसिद्धा । पुराणेषु गुण्डिचास्थले गुण्डिवा, गुड़िवा चेति पाठान्तरप्रयोगात् गुण्डिवायात्रा महावेदीयात्रा वेति नामान्तरेणाऽपि नास्ति किञ्चित् असौविध्यम् । तालध्वजाख्ये रथे भगवान् बलदेवः, मध्ये देवदलनाख्ये रथे सुदर्शनेन सह भगवती सुभद्रा, पश्चादेव नन्दिघोषाख्यरथे भगवान् स्वयं श्रीजगन्नाथश्च प्रतिष्ठापिताः भवन्ति । यात्राया अस्या नामकरणं कथमित्थं जातम्, अस्या इति कर्त्तव्यता कियद्दिनपरिमिता चेत्यादि अत्र उपस्थापनीयम् ।

ब्रह्मपुराणे इन्द्रद्युम्नस्य भक्त्या सन्तुष्टः सन् भगवान् पुरुषोत्तमः तस्य मनोवाञ्छानुसारं तस्मै वरं प्रदाय तन्नामविशिष्टसरस्तीरे[७८७]

---

७८६. एतद्वसरे उत्कलेषु बलदेवक्षेत्रे स्नानमण्डपे कर्पूरादिमिश्रितचन्दनैः दारुमूर्त्तीनां स्नानविधिः समाचर्यते ॥

-कालसर्वस्वस्य पादटिप्पणी (स्नानयात्राप्रसङ्गे) ।

७८७. सप्ताहं सरसस्तीर तवराजन्भविष्यति ।
गुड़िवा नाम यात्रा मे सर्वकाम फलप्रदा ॥

-ब्रह्मपुराणे- ६६/८ ।

प्रत्येकस्मिन् संवत्सरे गमनार्थं गुण्डिचानामेति यात्रायाः सूचनां दत्तवान्। इयं यात्रा आषाढ़मासस्य शुक्लपक्षे पुष्यनक्षत्रयुताद्वितीयातिथौ एव अनुष्ठिता भवति ।

[७८८]ब्रह्मपुराणे सनक्षत्रद्वितीयातिथेः व्यवस्थां विना केवलं मासपक्षयोर्विधानं रथयात्राप्रसङ्गे फलश्रुतिपुरःसरं प्रतिपादितम् । किन्तु [७८९]स्कन्दपुराणे यात्राया अस्या इति कर्त्तव्यता स्पष्टरूपेण आषाढशुक्लपक्षे पुष्यनक्षत्रयुतद्वितीयातिथौ सूचिता भवति । [७९०]पद्मपुराणे केवलं आषाढ़मासस्य द्वितीयातिथिः रथयात्रायाः कर्मकालत्वेन परिचिता भवति । यदि कस्मिंचित् संवत्सरे यथासमयं पुष्यानक्षत्रस्याभावः परिलक्ष्येत तदा केवलं तिथावपि रथयात्रा कर्त्तव्येति [७९१]स्कन्दपुराणात् स्पष्टं ज्ञायते । यात्राया अवधि

---

७८८. यात्राकृत्वा गुडिवाख्यां विधिवत्सुसमाहितः ।
आषाढस्य सिते पक्षे नरोयोषिदथापि वा ॥
दृष्ट्वा कृष्णं च रामं च सुभद्रां च द्विजोत्तमाः ।
दशपञ्चाश्वमेधानां फलं प्राप्नोति चाधिकम् ॥
-ब्रह्मपुराणे- ६६/१८-१९ ।

७८९. आषाढ़स्य सितेपक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
महोत्सव प्रवृत्यर्थं प्रीणयित्वा द्विजान् बहून् ।
गुण्डिचामण्डपं नाम यत्राहमजनं पुरा ॥
- स्कन्दपुराणे उत्कलखण्डे- २९/३३-३४ ।

७९०. आषाढ़स्य द्वितीयां रथं कुर्याद् विशेषतः ।
आषाढ़स्य शुक्लैकादश्यां जप-होम-महोत्सवम् ॥
रथस्थितं व्रजन्तं तं महावेदी महोत्सवे ।
ये पश्यन्ति मुदा भक्त्या वासस्तेषां हरेः पदे ॥
-पद्मपुराणे क्रियासारयोगखण्डे - १८/७-८ ।

७९१. माघमासस्य पञ्चम्यामष्टम्यां चैत्रशुक्लकैः ।
एते काला प्रशस्ता हि गुण्डिचाख्यमहोत्सवे ॥
विशेषान्मोक्षदाषाढ़द्वितीया पुष्यसंयुता ।
ऋक्षाभावे तिथौ कार्या सदा सा प्रीतये मम ॥
-स्कन्दपुराणे उत्कलखण्डे- २९/३१-३२ ।

नवदिनात्मिका नाम श्रीमन्दिरतः देवताभिः सह रथानां गमनागमन-दिवसौ विहाय तत्र गुण्डिचामण्डपे भगवतः प्रतिमानां सप्तदिनात्मिका स्थितिरिति [७९२]ब्रह्मणो मुखात् प्रतिपाद्यते । उत्सवेऽस्मिन् चतुर्वर्णाधिकारः चेति सूचयन् इन्द्रद्युम्नं स्वयमेव भगवान् [७९३]निबोधयति स्म । अतः इयमेव यात्रा नवदिनात्मिकेति [७९४]स्कन्दपुराणे स्पष्टं प्रतिपादितम् । उत्सवस्यास्य अरुणोदयवेलायां प्रारम्भिकभूता इति सूचयन् [७९५]स्कन्दपुराणं यद् वचनं प्रतिपादयति वास्तविकतया तत्र अरुणोदयपदस्य सूर्योदयार्थकत्वे दिवसस्य प्रथमत्रिमुहूर्त्तात्मकभागः पूर्वाह्णः तस्य कर्मकालः इति उत्कलीयविशिष्टधर्मशास्त्रनिबन्धकारैः [७९६]महामहोपाध्यायकृष्णमिश्रैः तथा प्रतिपादितत्वात् । आषाढमास-शुक्लपक्षस्य द्वितीयातिथौ रथे

---

७९२. ये पश्यन्ति तदा कृष्णं सप्ताहं मण्डपे स्थितम् ।
हलिनं सुभद्रां च विष्णुलोकं व्रजन्ति ते ॥

-ब्रह्मपुराणे- ६६/२ ।

७९३. सप्ताहं सरसस्तीरे तव राजन्भविष्यति ।
गुड़िवा नाम यात्रा ये सर्वकामफलप्रदाः ॥
ये मां तत्रार्चयिष्यन्ति श्रद्धया मण्डपे स्थितम् ।
सङ्कर्षणं सुभद्रां च विधिवत् सुसमाहितः ॥
ब्राह्मणाः क्षत्रिया वैश्याः स्त्रियः शूद्रा च वै नृप ॥
न तेषां दुर्लभं किञ्चित् फलं यस्य यदीप्सितम् ।
भविष्यति नृपश्रेष्ठ मत्प्रसादादसंशयः ॥

-तत्रैव- ६६/८-१०, १२ ।

७९४. यथा पूर्वा तथा चेयं द्वे च मुक्ति प्रदायिके ।
यात्राप्रवेशो देवस्य एक एवोत्सवो मतः ॥
पुराविदो वदत्येतां यात्रा नवदिनात्मिकाम् ॥

-स्कन्दपुराणे उत्कलखण्डे- ३५/९-१० ।

७९५. आषाढस्य सितेपक्षे द्वितीया पुष्यसंयुता ।
अरुणोदयवेलायां तस्यां देवं प्रपूजयेत् ॥

-तत्रैव- ३३/३५ ।

७९६. अत्रारुणपदस्य सूर्यार्थत्वं, सूर्योदयादित्रिमुहूर्त्तात्मकपूर्वाह्णोऽस्यकालः ।

- कालसर्वस्वे, पृ- १२० ।

जगन्नाथादिदेवप्रतिमानां गुण्डिचामन्दिरं प्रति गमनम्, ततः सप्तदिनानन्तरं दशम्यां तिथौ श्रीमन्दिरं प्रत्यावर्त्तनमिति हिन्दुसाम्राज्ये सर्वजनपरिपालिता इयं रथयात्रा सम्प्रति अन्येषामुपरि स्वप्रभावं क्रमशो विस्तारयति इति ।

३. *शयनोत्सवः-*

आषाढ़शुक्लपक्षस्य एकादश्यां तिथौ भगवतः श्रीजगन्नाथस्य शयनोत्सवः परिपाल्यते [७९७]स्कन्दपुराणे एतत् प्रतिपादितम् । तत्र भगवतः शयनार्थं शयनागारे रत्नपल्यङ्कादीनां व्यवस्था परिलक्षिता दृश्यते । भगवतो विष्णोऽयमेव शयनोत्सवः यदि च आषाढ़शुक्लैकादश्यां परिपाल्यते तथापि कार्त्तिकशुक्लदशमीपर्यन्तं भगवान् शेते इति प्रसिद्धं [७९८]पुराणवचनम् । अवसरेऽस्मिन् मलमासे पातेऽपि मासचतुष्टयस्य गणने अत्र नान्यथात्वम् ।

४. *पार्श्वपरिवर्त्तनोत्सवः-*

शयनोत्सवस्य परवर्त्तीसंयुक्तोत्सवः भवत्येव पार्श्वपरिवर्त्तनोत्सवः । भाद्रशुक्लपक्षैकादश्यां परिपालिते अस्मिन्नेव उत्सवे भगवतः

---

७९७. आषाढ़शुक्लैकादश्यां कुर्यात्स्वापमहोत्सवम् ।
मण्डपं रचयेत्तत्र शयनागारमुत्तमम् ॥
देवस्य पुरतः शय्यां रत्नपल्यङ्किकोपरि ।
स्वास्तीर्य सोपधानां तु मृदुची नोत्तरच्छदाम् ॥
कर्पूरधूलिविक्षिप्तां साधुचन्द्रातपां शुभाम् ।
सर्वतो वेष्टितां छिद्ररहितां चन्दनोक्षिताम् ॥
साधुद्वारां समां स्निग्धां नानाचित्रोपशोभितम् ।
एकं स्वापगृहं कृत्वा निशीथे प्रतिमा त्रयम् ॥
-स्कन्दपुराणे उत्कलखण्डे- ३६/१८-२१ ।

७९८. (क) आषाढ़ीमवधिं कृत्वा हरेः स्वापस्तु कर्कटे ॥
वार्षिकांश्चतुरो मासान्यावत्स्यात्कार्त्तिकी द्विजाः ॥
-तत्रैव- ३६/१-२ ।

(ख) वार्षिकांश्चतुरो मासान्प्रसुप्ते वै जनार्दने ।
व्रतैरनैकैर्नियमैर्मासान्वै चतुरः क्षिपेत् ॥
-तत्रैव- ३६/३२ ।

पार्श्वपरिवर्त्तनमाचर्यते । एतस्मिन् विषये एव [799]स्कन्दपुराणे बहुतथ्यं प्रतिपादितमस्ति ।

५. *उत्थापनोत्सवः-*

कार्त्तिकशुक्लपक्षस्य एकादश्याम् उत्थापनमहोत्सवो भगवतो विष्णोः परिपाल्यते । चतुर्मासात्मकशयनानन्तरम् एकादश्यां* तिथौ अवश्यमेव भगवतः उत्थापने उत्सवस्यास्य पालनीयता विद्यते इति [800]स्मृतितत्वोद्धृतमात्स्यवचनात् ज्ञायते । विष्णोरुत्थापनानन्तरं सर्वासां क्रियाणामेव सम्पादनार्थमवसरलाभात् तन्मध्ये तत्करणे अन्यथापत्तिः । यदि कदाचित् कार्त्तिकमासस्य शुक्लैकादश्यां मलमासो भवेत् तदा आश्विनशुक्लैकादश्यां विष्णोरुत्थापनकार्यं न तु कार्त्तिकशुक्लैकादश्यां यतः-

"न वर्द्धयेत् स्वापदिनं तदा लोकः सुखी भवेत् ।
पञ्चमासान् हरौ सुप्ते देशे तत्र भयं भवेत् ॥" चेति

[801]दिव्यसिंहेन स्वग्रन्थे युक्तियुक्तं प्रतिपादितम् । चतुर्मासव्रतसाधनत्वेऽपि शुक्लैकादश्यां उत्सवस्यास्य अवश्यं कर्त्तव्यत्वेन पाठश्रवणात् हानितः निष्कृतिनिमित्तं वा यदि मलान्वित-कार्त्तिकशुक्लैकादशीतः पूर्वस्यां पूर्वस्यां शुक्लैकादश्याम् उत्सवोऽयं परिपालितः भवेत् तर्हि नास्ति कश्चिद्दोषः इति कथयितुं शक्यते ।

---

७९९. अतः परं प्रवक्ष्यामि पार्श्वस्य परिवर्त्तनम् ।
शायितस्य जगद्धर्त्तुः परिवर्त्तयितुर्युगम् ॥
नभस्य विमलपक्षे सम्प्राप्ते हरिवासरे ।
विष्णोः स्वापगृहद्वारि शनैर्गत्वा प्रविश्य च ॥
नमस्कृत्वा जगन्नाथं पर्यङ्के शयितं मुदा ।
अवच्छाद्य शनैर्गत्वा पूजयेदुपचारकैः ॥
-स्कन्दपुराणे उत्कलखण्डे- ३९/१६-१८ ।

८००. शेते विष्णुः सदाऽऽषाढे भाद्रे च परिवर्त्तते ।
कार्त्तिके परिबुध्येत शुक्लपक्षे हरेर्दिने ॥
-स्मृतितत्वे प्रथमभागे- पृ० ११२ ।

८०१. कालदीपे - पृ०- ७४ ।

उत्थापनोत्सवस्य पालनफलदानविषये [८०२]स्कन्दपुराणे विस्तृततया वर्णितमस्ति ।

६. *प्रावरणोत्सवः-*

मार्गशीर्षमासस्य शुक्लषष्ठ्यां भगवतः जगन्नाथदेवस्य प्रावरणोत्सवः परिपाल्यते । अधुना श्रीक्षेत्रेऽस्मिन् प्रतिष्ठापितानां सर्वासां देवतानाम् अयमेवोत्सवः परिपालितो भवति किन्तु सर्वतोभावेन पालनस्यास्य मूलमेव भगवान् श्रीजगन्नाथ इति नास्ति संशयः ।

[८०३]स्कन्दपुराणे उत्सवस्यास्य पालनरीतिरेवं परिलक्षिता भवति यत् पञ्चम्यां निशि अधिवासकर्म समाप्य अष्टदलपद्माकारविशिष्टमण्डपं च निर्माय तस्य पार्श्वसकले दिक्पाल-क्षेत्रपाल-चण्डप्रचण्डादीन्

---

८०२. अतः परं वै श्रृणुत उत्थापनामहोत्सवम् ।
पूजयित्वा जगन्नाथं कौमुद्याख्ये महोत्सवे ॥
अक्षक्रीडादिभिः पुण्यवस्त्रमाल्यानुलेपनैः ।
ततोऽस्मिन् पौर्णमास्यायां रात्रावुत्सवसंयुतम् ॥
नारिकेलादिभिः द्रव्यैः पिष्टकैरर्चयेद्धरिम् ।
ततः प्रभाते सङ्कल्प्य कार्त्तिके व्रतमुत्तमम् ॥
व्रतेन तेनैव नयेद्यावदेकादशी सिता ।
तस्यामुत्थापयेद्देवं सुसुप्तं जगदीश्वरम् ॥
-स्कन्दपुराणे उत्कलखण्डे- ३९/३२-३५ ।

८०३. वासोधिवासं कुर्वीत पञ्चम्यां निशि कर्मवित् ॥
देवाग्रे मण्डपे कुर्यात् पद्ममष्टदलान्वितम् ।
दिक्पालान्पूजयेद्दिक्षु क्षेत्रपालं गणाधिपम् ॥
चण्डप्रचण्डौ च बहिश्चतुर्दिक्षु प्रपूजयेत् ।
मध्ये पात्रं समाधाय प्रोक्षयेद्वस्त्रवारिणा ॥
द्युतानस्वेतिमन्त्रेणाच्छादयेद्दिव्यवाससा ।
सुधूपितं वस्त्रजातमेकविंशतिसंख्यकम् ॥
तन्मध्ये स्थापयेन्मन्त्रं वैष्णवं च समुच्चरन् ।
अन्येन वाससा तद्धि समाच्छाद्य प्रयत्नतः ॥
स्पृष्ट्वा जपेन मन्त्रमिमं संस्मरन् पुरुषोत्तमम् ।
आच्छादको यो जगतां तेजसा विष्णुरव्ययः ॥

पूजयेत् । मण्डपमध्ये जलपात्रं सन्निवेश्य वस्त्रप्रोक्षणं च साधयेत् । ततः पात्रमिदं द्युतानस्वेतिमन्त्रोच्चारणपूर्वकं दिव्यवाससा आच्छादयेत्। ततः एकविंशतिसंख्यकसुधूपितं वस्त्रसमूहं समन्त्रकं अन्येन वाससा समाच्छाद्य तच्च स्पृष्ट्वा पुरुषोत्तमं संस्मरेत्। परस्मिन् दिवसे प्रातःतदेव वस्त्रसकलं आनीय सप्तभिः सप्तभिः वासोभिः मुखवर्जं देवान् परिवेष्टयेत् । तदवसरे च दुर्वाक्षतादिभिः यथायथं निराजनं [८०४]भगवतः सम्पादयेत् इति ।

वस्तुतः हिमागमे ततः निष्कृतिनिमित्तं यथा जनाः स्वशरीराणि शीतवस्त्रादिभिः अच्छादयन्ति तथेदं देवानां कृते निदर्शनमिति ।

१७. *पुष्याभिषेकोत्सवः-*

उत्सवोऽयं पुरा राज्याधिष्ठितानां पुरुषविशेषाणां कृते परिपालित आसीत् । अधुनाऽपि कुत्रचित् कुत्रचित् परिपाल्यते । अनेन कर्मणा फलाधिक्यश्रवणात् अधिनायकानां राज्ञां वाऽयं विधिः ।

"पुष्ययोगेषु कर्त्तव्या राज्ञां वन्दापनां सदा"

इति प्रसिद्धवचनानुसारं सदा पदश्रवणात् उत्सवस्यास्य सांवत्सरिकनित्यत्वं व्यज्यते । यतः हिन्दुसाम्राज्ये स्वयं जगन्नाथः "राजाधिराजः" इति बहुप्रसिद्धं ततः स्कन्दपुराणे उत्सवस्यास्य विषये तथ्यं सुस्पष्टं सन्निविष्टमस्ति । पौषमासे पुष्यानक्षत्रसंयुतायां पौर्णमास्यां

वासनास्तस्य वस्त्रत्वं वस वासे जगत्पतेः ।
इन्द्रघोषस्त्वेति रक्षां विदध्यातस्य सर्वतः ॥
-स्कन्दपुराणे उत्कलखण्डे- ४०/२-८ ।

८०४. ततोऽरुणोदये काले प्रातः सन्ध्यासमीपतः ।
पुनः प्रपूजयेद्देवं पूर्ववत्सुसमाहितम् ॥
ततस्तं पूजितं वस्त्रं समूहं वहिरानयेन् ।
कार्पासपट्टक्षेमाद्यं तथैवाच्छादितं द्विजाः ॥
सप्तभिः सप्तभिर्देवान् वासोभिः परिवेष्टयेत् ।
सुखवर्जं तु सर्वाङ्गं शीतप्रावरणैः द्विजाः ॥
ताम्बुलं च निवेद्याथ कर्पूरतिलकां तथा ।
दूर्वाक्षतैः प्रपूज्याथ कुर्यान्नीराजनं विभोः ॥
-तत्रैव- ४०/१०-११ ।

अस्य अभिषेकोत्सवस्य इति कर्त्तव्या निर्द्दिष्टा विद्यते, यथा एकादशीतः अङ्कुरार्पणादिकं संपाद्य प्रतिदिनं भगवतः प्रतिमानां तथा नियमं निराजनं विधाय चतुर्द्दशीनिशायाम् एकादशीति स्वर्णमयकुम्भानां संस्थापनं कुर्य्यादिति [८०५]स्कन्दपुराणे प्रतिपादयतमस्ति । ततः पुरुषसूक्तेन अभिमन्त्रितकुम्भजलेन [८०६]पुरुषोत्तमं स्नापयेत् । ततः अलङ्कारान् [८०७]परिधापयेत् । गोघृतदीपः भगवतः श्रीजगन्नाथस्य पूजनार्थं तत्र सुस्पष्टं [८०८]प्रतिपादितोऽस्ति । साम्प्रतिकैः परिपालिते उत्सवेऽस्मिन् अष्टोत्तरैकशतस्वर्णकुम्भानां व्यवहारो दृश्यते । एतद्व्यतीतं वन्दापनादिकमत्र पूर्ववत् भवति इति ।

८. *दक्षिणायनोत्सवः-*

भगवतः सूर्यदेवस्य दक्षिणायनानुसारं नीलाद्रिनाथस्य श्रीजगन्नाथदेवस्य अयनोत्सवः परिपाल्यते । अयमेव अयनोत्सवः

---

८०५. पुष्यो स्नानोत्सवं वक्ष्ये यथोक्तं ब्रह्मणपुरा ।
पुष्यर्क्षेण च संयुक्ता पौर्णमासी यदा भवेत् ॥
पौषे मासि तथा कुर्यात् पुष्यस्नानोत्सवं हरेः ।
एकादश्यां प्रकुर्वीत ऐशान्यामङ्कुरार्पणम् ॥
ततः प्रतिदिनं कुर्यात् प्रतिमायां हरेर्गृहे ।
नृत्यगीतोपहारैश्च प्रतिरात्रं बलिं हरेत् ॥
चतुर्द्दशीनिशायां तु कुम्भानामधिवासनम् ।
एकाशीतिप्रमाणानां तथा स्वर्णमयांच्छुमान् ॥
-स्कन्दपुराणे उत्कलखण्डे- ४१/१-४ ।

८०६. ततः पुरुषसूक्तेन कुम्भां स्नानभिमन्त्रयेत् ॥
तेनैवाच्छिद्रधारेण स्नापयेत्पुरुषोत्तमम् ॥
-तत्रैव- ४१/९-१० ।

८०७. देवाङ्गं लेपयेद्गन्धैश्चन्दनेन च विग्रहे ॥
यथास्थानं यथाशोभामलङ्कारश्च यजयेत् ॥
-तत्रैव- ४१/१२-२३ ।

८०८. गोसर्पिर्दीपकैः स्वर्णपात्रकैरतिनिर्मलैः ।
नीराजयेज्जगन्नाथं कर्पूरयुतवर्त्तिभिः ॥
-तत्रैव- ४१/१८ ।

दक्षिणोत्तरभेदेन द्विधा । प्रतिसंवत्सरं दक्षिणायनस्य प्राथम्यात् अयनोत्सवयोर्मध्ये अस्य एव प्राथमिकता । कर्कटसंक्रान्तौ अस्योत्सवपालनस्य इति कर्त्तव्या विहिता । तद्दिवसे कदा कर्मकाल इति शङ्कायाः समाधानमपि दत्तं [८०९]पुराणे यत् संक्रमणात् पूर्वं विंशतिकला एव कर्मणोऽस्य समुचितः कालः तदवसरे पञ्चामृतेन देवप्रतिमानां स्नानं विधाय गन्धचन्दनादिभिस्तासां सर्वाङ्गे लेपयेत् । तथा च सुगन्धमाल्यैरलङ्कारादिपरिधापनेन यथोचितं माङ्गल्यवाद्यनादैः भगवन्तं प्रपूजयेत् । इयमेव यात्रा येन केनचित्प्रकारेण परिपालिता भवतु नाम अवश्यमेव इयं यात्रा पापिनामपि कल्मषापहा इति विष्णोः साक्षाद्वचनं महर्षिणा जैमिनिना अनुचराणां सविधे [८१०]उपन्यस्तम् । अयमेवोत्सवः श्वेतनामधेयेन महाराजेन त्रेतायुगे परिपालित इति [८११]पौराणिकी वार्त्ता ।

---

८०९. अतः परं प्रवक्ष्यामि दक्षिणायनमुत्तमम् ।
संक्रान्तेः पूर्वकाले या कला वै विंशतिर्मताः ॥
अयनं पुण्यकालोऽयं पुण्यकर्मसु कर्मिणाम् ।
पञ्चामृतैस्तत्र देवं स्नापयेत् स्वापवद्द्विजाः ॥
सर्वाङ्गं लेपयेदस्यागुरुकर्पूरचन्दनैः ।
सुगन्धमाल्यालङ्कारैश्चारुवस्त्रैश्च दीपकैः ॥
नानाभक्ष्योपहारैश्च पूजयेत्परमेश्वरम् ।
कर्पूरालतिकामुच्चैर्मुखाभ्याशे हरेर्ददेत् ॥
दुर्वाङ्कुराक्षतैर्नीराजनो नाथं प्रवन्दयेत् ।
माङ्गल्यगीतनृत्याद्यैर्नारी हुलुहुलां वदेत् ॥
-स्कन्दपुराणे उत्कलखण्डे- ३७/१-५ ।

८१०. स्वल्पा वा महती यात्रा सर्वामुक्तिप्रदा हरेः ।
तस्मिंस्तस्मिन्दिने दृष्टो भगवान्मुक्तिदो ध्रुवम् ॥
विश्वासहेतोर्मुर्खाणां यात्रा ह्येताः कृपावता ।
विष्णुना कथितो विप्राः पापिनां किल्विषापहा ॥
-तत्रैव- ३७/८-९ ।

८११. श्वेतनाम महाराजः पुरा त्रेतायुगेऽभवत् ॥
व्रतस्थोऽपि महाभक्तिं चकार पुरुषोत्तमे ।
इन्द्रद्युम्नेन रचितभोगमात्रानुसारतः ॥ -तत्रैव- ३७/२७-२८ ।

१. *उत्तरायणोत्सवः-*

संवत्सरे अन्तिमोऽयनोत्सवः भवति उत्तरायणोत्सवः । मकरसंक्रान्तितः सूर्योस्योत्तरगतिप्रकाशच्छलेन अस्योत्सवस्य पालनं भवति । संक्रमणेऽस्मिन् मध्ये विंशकलात्मके पुण्यात्मककाले स्नातस्य नरस्य कल्पवृक्षप्रणामः देवतागारे प्रवेशस्तत्र वारत्रयं प्रदक्षिणं, पुरुषोत्तम-बलभद्र-सुभद्रादेवानां निर्दिष्टमन्त्रैः प्रपूजनं चेत्यादि सूचना [८१२]पुराणे प्रदत्ता । तदवसरे यथालङ्कारपरिधापनेन सह देवतात्रयस्य आन्दोलिकामाध्यमेन भ्रमणोत्सवं [८१३]सम्पादयेत् । पुराकल्पे कश्यपेन भगवत्प्रीतये अयमेवोत्सवः पालित आसीदिति [८१४]प्रसिद्धिः ।

---

८१२. मृगराशौ संक्रमति यदा भास्वान् द्विजोत्तमाः ।
उत्तराशां जिगमिषुस्तदा स्यादुत्तरायणम् ॥
तस्य संक्रमणार्द्धं च यावत्स्युर्विंशतिः कलाः ।
महापुण्यतमः कालः पितृदेव द्विजप्रियः ॥
तत्र स्नात्वा विधानेन तीर्थराजजले नरः ।
नारायणं समभ्यर्च्य कल्पवृक्षं प्रणम्य च ॥
प्रविश्यदेवतागारं कृत्वा तं त्रिः प्रदक्षिणम् ।
मन्त्रराजेन संपूज्य देवं श्रीपुरुषोत्तमम् ॥
तथा बलं सुभद्रां च स्वमन्त्रेण प्रपूजयेत् ।
दृष्ट्वोत्तरायणे देवं मुच्यते देहबन्धनात् ॥

-स्कन्दपुराणे उत्कलखण्डे- ४२/१-५ ।

८१३. ततो निर्माल्यवसन मालामस्यां निधापयेत् ।
महासमृद्ध्या तामर्चां त्रिदेवान्भ्रामयेत्ततः ॥
आन्दोलिकायामारोप्य प्रासादद्वारमानयेत् ।
त्रिविक्रमं त्रिक्रमेण त्रैलोक्यक्रमणं विभुम् ॥
विडम्बयन्तं तां लीलां प्रासादं भ्रामयेच्च तम् ।
त्रिरन्ते पुनरङ्के च सुसमृद्ध्या शनैः शनैः ॥

-तत्रैव- ४२/१०-१२ ।

८१४. इयं महोत्सवं विप्राः पुराकल्पे च कश्यप ॥
स च सृष्टिं विनिर्माय भगवत्प्रीतयेऽकरोत् ।
ये पश्यत्युत्सवं चैनं कश्यपेन विनिर्मितम् ॥

-तत्रैव- ४२/२८-२९ ।

१०. दोलोत्सवः-

भगवतः श्रीजगन्नाथदेवस्य अवसरेऽस्मिन् दोलाधिरोहणात् दोलोत्सवत्वेन अयं सुपरिचितः। एतदर्थं षोडषस्तम्भादिसमन्वितं मण्डपमेकं कारयित्वा तस्य च शोभां संपाद्य श्रीपर्णिकाष्ठनिर्मिते भद्रासने भगवत्प्रतिमाविशेषं संस्थाप्य फल्गुत्सवं [८१५]साधर्येत्। अवसरेऽस्मिन् भगवत्प्रतिमानां महास्नानादिविधिः [८१६]सूच्यते। इयमेव यात्रा प्रथमतः इन्द्रद्युम्नेन सम्पादिता इति [८१७]सुप्रसिद्धम्। अयमेवोत्सवः फाल्गुनपूर्णिमातिथौ परिपाल्यते। उत्सवस्यास्य विशेषविधिः पद्मपुराणेऽपि प्राप्यते।

११. दमनकोत्सवः-

चैत्रशुक्लत्रयोदश्यां दमनकभञ्जकनाम्ना अयमुत्सवः परिपाल्यते। पुरा भगवता दमनकाख्यास्य दैत्यस्य विनाशसाधितत्वात् तत्स्मरणानुरोधेन अस्यैव प्रसिद्धिः। उत्सवेऽस्मिन् दमनकाख्यतृणाहरणं तथा च भगवतः हस्ते तत् प्रदानं मध्यरात्रे

---

८१५. प्रासादपुरतः कुर्यात् षोडशस्तम्भमुच्छ्रितम् ॥
चतुरस्रं चतुर्द्वारं मण्डपं वैदिकान्वितम्।
चारुचन्द्रातपं माल्यं चामरध्वजशोभितम् ॥
भद्रासनं वैदिकायां श्रीपर्णीकाष्ठनिर्मितम् ॥
-स्कन्दपुराणे उत्कलखण्डे- ४३/२-४।

८१६. भद्रासनेऽधिवास्यैव पूजयेदुपचारकैः।
महास्नानस्य विधिना स्नपनं तस्य कारयेत् ॥
पञ्चामृतैश्च सर्वैश्च तेषामन्यतमेन वा।
स्नानान्ते गन्धतोयेन श्रीसूक्तेनाभिषेचयेत् ॥
सम्प्रोक्ष्य भूषयद्देवं वस्त्रालङ्कारमाल्यकैः।
नीराजयित्वा सम्पूज्य प्रासादं परिवेष्टयन् ॥
-तत्रैव- ४३/१६-१८।

८१७. इयं लीला भगवतः पितामहमुखेरिता।
राजर्षिणेन्द्रद्युम्नेन कारिता पूर्वमेव हि ॥
-तत्रैव- ४३/२१।

सकलविधिपालनपुरःसरं च सर्वं पालनं [८८]स्कन्दपुराणे समुपन्यस्तम् ।

१२. *अक्षयतृतीया-*

वैशाखशुक्लतृतीया अक्षयतृतीयात्वेन सुपरिचिता । ततः पूर्वनिशायां चतुष्कोणविशिष्टं सुशोभनं मण्डपमेकं कारयित्वा ततो भगवते निवेदनार्थं चन्दनादीनां [८९]संरक्षणं कुर्यात् । अरुणोदयकाले उत्सवस्यास्य पालनार्थं व्यवस्थां यथारीति प्रतिपाद्य भगवतः प्रतिमासु विशेषतो जगन्नाथस्य प्रतिमायां लेपनादीनां [९०]विधिरुपन्यस्तः ।

---

८१८. पुरा यत्कथितं विप्रस्तृणं दमनकाह्वयम् ।
चैत्रशुक्लत्रयोदश्यामाहरेतत्समूलकम् ॥
तन्मध्ये मण्डलं कुर्यात्सुशुभं पद्मसंज्ञितम् ।
तदन्तर्वासयेद्देवप्रत्यर्चां प्रतिपूजिताम् ॥
युक्ता श्रीसत्यभामाभ्यां पूजयेद्विधिवच्च ताः ।
अर्द्धरात्रे तु कर्मेदं देवदेवस्य कारयेत् ॥

-स्कन्दपुराणे उत्कलखण्डे - ४५/४-६ ।

८१९. वैशाखस्यामले पक्षे द्वितीयारात्रिमध्यतः ।
मण्डपं च चतुष्कोणं सुधालिप्तं सवैदिकम् ॥
सुधौतवाससा कुर्यात् प्रतिसीरासमं ततः ।
साधुसोपानसंयुक्तं चारुचन्द्रातपान्वितम् ॥
तन्मध्ये विन्यसेन्नूनं साधु भद्रासनोत्तमम् ।
तस्मिन्निचोलसंछन्ने विन्यसेत् स्वर्णभाजनम् ॥
तस्य पश्चिमभागे वै स्वासीनो ब्राह्मणः शुचिः ।
पात्रान्तरे तु गृह्णीयाच्चन्दनं पञ्चविंशतिम् ॥ -तत्रैव- ४६/२-५ ।

८२०. एवं तु मण्डपे तस्मिन्साधिवासं निधापयेत् ।
अरुणोदयकालेऽथ नयेत्कृष्णस्य सन्निधिम् ॥
शंख चामरछत्राद्यैर्भ्रामयित्वा सुरालयम् ।
देवाग्रे स्थापयित्वा च पूजयेत्पुरुषोत्तमम् ॥
उद्घाटयेत्ततो वस्त्रं दिव्यदृष्ट्यावलोकयेत् ।
प्रोक्षितं मन्त्रराजेन संस्कुर्याताडनादिभिः ॥
गन्धपुष्पाक्षतैः पूज्य श्रियः सूक्तेन लेपयेत् ।
श्रीशस्य सर्वगात्रेषु मृदुस्पर्शं शनैः शनैः ॥
वैष्णवा जयशब्दैस्तं वर्द्धयन्ति तदा हरिम् ।

प्रथमतः कलियुगे दक्षनामधेयेन प्रजापतिना अयमेव अक्षयतृतीयोत्सवः परिपालितः इति महर्षिणा जैमिनिना [८२१]सूचितम् । तदवसरे भगवन्तं जगन्नाथमुद्दिश्य दक्षेन या स्तुतिः कृता तत्र पापराशिध्वंससाधननिमित्तं नीलाचले भगवान् विराजत इति [८२२]प्रसिद्धिर्भवति । अस्योत्सवस्य महनीयता साधु प्रतिपादिता । अपि च अक्षयतृतीयातः रथयात्रानिमित्तं रथत्रयस्य निर्माणकर्म प्रारभ्यते इति सुप्रसिद्धम् ।

एताः यात्रा अविच्छिन्नभावेन इदानीं यावत् परिपालिताः भवन्ति । नीलाद्रिमहोदय-यात्राभागवत-वामदेवसंहितादिशास्त्रेभ्यः एतस्मिन्नेव प्रसङ्गे बहुलं तथ्यं प्राप्यते ।

द्वादशयात्राभ्यः भिन्नाः बहवः उपयात्रा अपि श्रीमन्दिरे परिपालिताः दृश्यन्ते । परन्तु तेषां नामानि स्कन्द-ब्रह्मादिपुराणेषु नोट्टङ्कितानि भवन्ति । अतएव संक्षेपेण तासां नामानि उपस्थाप्यन्ते पाठकानां गोचरार्थम्-

---

नानासूक्तोपनिषदैर्विद्वांसस्तं स्तुवन्ति वै ॥
वेणुवीणादिकैर्नृत्यगीतवाद्यैरनेकशः ।
व्यजनैश्चामरैश्छत्रैरन्यैर्नानोपहारकैः ॥
सन्तोषयञ्जगन्नाथं तृतीयादौ विलेपयेत् ।
यस्य चिन्तनमात्रेण तापा नश्यन्ति देहिनाम् ॥

-स्कन्दपुराणे उत्कलखण्डे- ४६/१०-१६ ।

८२१. पुरा कलियुगे विप्रा दक्षोनाम प्रजापतिः ।
आध्यात्मिकादिसन्तापैः सुदीनान्वीक्ष मानवान् ॥
तत्र गत्वा कृपायुक्तो महिमानं चकार वै ।
यथाविधि मया प्रोक्तं स एव प्रथमं द्विजाः ॥

-तत्रैव- ४६/२१-२२ ।

८२२. कलिकल्मष संमूढानुद्धर्तुं जगतां पते ॥
अवतारोऽयमेतस्मिन्नीलाचलगुहान्तरे ॥
चिरकालप्ररूढानां दुस्त्यजानां महांहसाम् ॥
राशिं दग्धुं त्वमेवेशो दीनानाथकृपाकर ॥

-तत्रैव- ४६/२६-२८ ।

क्रमसंख्या	उत्सवानां नामानि	पालनार्थं तिथयः
१.	चन्दनयात्रा-	वैशाखशुक्लतृतीयातः एकविंशतिदिनानि यावत् ।
२.	नृसिंह जयन्ती-	वैशाखशुक्लचतुर्दशी ।
३.	शीतलषष्ठी-	ज्येष्ठशुक्लषष्ठी ।
४.	रुक्मिणीपरिणयोत्सवः-	ज्येष्ठशुक्लैकादशी ।
५.	नेत्रोत्सवः-	आषाढमासस्य अमावास्या ।
६.	सन्ध्यादर्शनम् इन्द्रद्युम्नमहोत्सवश्च-	आषाढशुक्लनवमी ।
७.	चित्रप्रदानामावास्या-	श्रावणमासस्य अमावास्या ।
८.	झुलणयात्रा मदनमोहन यात्रा वा-	श्रावणशुक्लदशमीतः भाद्रकृष्णप्रतिपद् यावत् ।
९.	श्रीकृष्णजन्माष्टमी-	भाद्रकृष्णाष्टमी ।
१०.	कालीयदलनोत्सवः-	भाद्रकृष्णैकादशी ।
११.	श्रीगणेशपूजा-	भाद्रशुक्लचतुर्थी ।
१२.	राधाष्टमी-	भाद्रशुक्लाष्टमी (अस्मिन्दिवसे सुदर्शनचक्रस्य यमेश्वरसमीपगमनं भवति)।
१३.	भागवतजन्मोत्सवः-	भाद्रपूर्णिमा ।
१४.	महाष्टमी-	आश्विनशुक्लाष्टमी (विमलामन्दिरे पूजा) ।
१५.	कुमारोत्सवः-	आश्विनपूर्णिमा ।
१६.	वैकुण्ठचतुर्दशी कल्पवृक्षोत्सव वा-	कार्त्तिकशुक्लचतुर्दशी ।
१७.	देवदीपावली-	मार्गशीर्षस्य अमावास्या ।
१८.	वकुलोत्सवः-	पौषमासस्यामावास्या ।
१९.	वसन्तपञ्चमी वसन्तोत्सवो वा-	माघशुक्लपञ्चमी ।
२०.	तिलसप्तमी-	माघशुक्लसप्तमी ।
२१.	महाशिवरात्रिः-	फाल्गुनकृष्णचतुर्दशी ।

उल्लिखितानां यात्राणाम् उत्सवानां वा पुरुषोत्तमक्षेत्रस्थितैर्देवैः सह सम्पर्को वर्त्तते । एतद्व्यतिरिक्तं श्रीमन्दिरे जगन्नाथ-बलभद्र-सुभद्राप्रभृतीनां विविधेषु कालेषु बहवः मनोरमवेशाः भवन्ति, यान् दृष्ट्वा जनाः मुग्धाः भवन्ति । तेषु प्रसिद्धेषु वेशेषु मुख्यवेशाः विदुषामवगतिनिमित्तमत्र समुपस्थाप्यन्ते ।

क्रमसंख्या	वेशाः	पालनार्थं तिथयः
१.	हस्तिवेशः (हातीवेशः)	ज्येष्ठपूर्णिमा ।
२.	सुवर्णवेशः (सुनावेशः)	आषाढशुक्लैकादशी ।
३.	वनभोजिवेशः	भाद्रकृष्णदशमी ।
४.	कालीयदलनवेशः	भाद्रकृष्णैकादशी ।
५.	प्रलम्बासुरवधवेशः	भाद्रकृष्णद्वादशी ।
६.	रामबलरामवेशः	भाद्रकृष्णत्रयोदशी ।
७.	वलिवामनवेशः	भाद्रशुक्लद्वादशी ।
८.	राजाधिरावेशः	आश्विनशुक्लदशमी ।
९.	राधादामोदरवेशः	आश्विनशुक्लैकादशी ।
१०.	लक्ष्मीनारायणवेशः	कार्त्तिकशुक्लैकादशी ।
११.	वक्रचूडावेशः(वाङ्कचूडावेशः)	कार्त्तिकशुक्लद्वादशी ।
१२.	त्रिविक्रमवेशः (आडकिआ)	कार्त्तिकशुक्लत्रयोदशी ।
१३.	नृसिंहवेशः (डालकिआ)	कार्त्तिकशुक्लचतुर्दशी ।
१४.	राजराजेश्वरवेशः	कार्त्तिकपूर्णिमा ।
१५.	परशुरामवेशः नागावेशो वा	कार्त्तिकपूर्णिमा ।
१६.	पद्मवेशः	माघकृष्णतृतीया ।
१७.	गजोद्धारणवेशः	माघपूर्णिमा ।
१८.	राजवेशः	पौषपूर्णिमा ।
१९.	वृहच्छृङ्गारवेशः (वड़सिंहार)	प्रत्यह रात्रौ ।

श्रीपुरुषोत्तमक्षेत्रस्य माहात्म्यम्-

भगवान् पुरुषोत्तमः श्रीजगन्नाथः यस्मिन्नेव क्षेत्रे सर्वदा विराजते तस्यैव क्षेत्रराजस्य माहात्म्यं विदुषां पुरतोऽपि समुपस्थापनीयम् । एतत्प्रसङ्गे स्वतन्त्रतया वर्णनं ब्रह्म-स्कन्द-नारदपुराणेषु समुपलभ्यते । ब्रह्मपुराणे एतद्विषये यादृशं वस्तु सन्निवेशितं नारदपुराणे तादृशं परिलक्ष्यते । अतोऽत्र केवलं ब्रह्म-स्कन्दपुराणद्वयमाधारीकृत्य ओलोचना क्रियते ।

ब्रह्मपुराणस्य सप्तसप्तत्यधिकशततमेऽध्याये पुरुषोत्तमक्षेत्रे

कृष्णसङ्कर्षणसुभद्रादेवतानां सन्दर्शनेन अशेषफलप्राप्तिर्भवतीति [८२३]प्रतिपादितम् । शयनोत्थापने तावत् ये तत्र कृष्णादिदेवतात्रयं पश्यन्ति ते विष्णुलोकं [८२४]प्राप्नुवन्तीति तत्र सूचितमस्ति । यस्तत्र पुरुषोत्तमक्षेत्रे मासचतुष्टयं वसति स पृथिव्यास्तीर्थयात्राफलसकलं प्राप्नोति । अपि च तत्र एकमासवसतिद्वारा अन्यतीर्थेषु वर्षायुते काले तपस्तप्त्वा यत्फलं प्राप्यते तत्फलं मिलतीति [८२५]उररीकृतम् । तत्रैव श्रीपुरुषोत्तमक्षेत्रे प्राणविसर्जनादपि परमगतिं प्राप्नोति जीवविशेषः इति ततः [८२६]स्पष्टं ज्ञायते ।

---

८२३. यत्राऽऽस्ते पुण्डरीकाक्षः शंखचक्रगदाधरः ।
पीताम्बरः कृष्णः कंसकेशिनिषुदनः ॥
त्रैलोक्याधिपतिं देवं सर्वकामफलप्रदम् ।
ये ध्यायन्ति सदा कृष्णं मुक्तास्ते नात्र संशयः ॥
-ब्रह्मपुराणे - १७७/२-४ ।

८२४. शयनोत्थापने कृष्णं ये पश्यन्ति मनीषिणः ।
हलायुधं सुभद्रां च हरेः स्थानं व्रजन्ति ते ॥
सर्वकालेऽपि ये भक्त्या पश्यन्ति पुरुषोत्तमम् ।
रोहिणेयं सुभद्रां च विष्णुलोकं व्रजन्ति ते ॥
-तत्रैव- १७७/७-८ ।

८२५. आस्ते यश्चतुरो मासान्वार्षिकान्पुरुषोत्तमे ।
पृथिव्यास्तीर्थयात्रायाः फलं प्राप्नोति चाधिकम् ॥
ये सर्वकालं तत्रैव निवसन्ति मनीषिणः ।
जितेन्द्रिया जितक्रोधा लभन्ते तपसः फलम् ॥
तपस्तप्त्वाऽन्यतीर्थेषु वर्षाणामयुतं नरः ।
यदाप्नोति तदाप्नोति मासेन पुरुषोत्तमे ॥
-तत्रैव- १७७/९-११ ।

८२६. देहं त्यजन्ति पुरुषास्तत्र ये पुरुषोत्तमे ।
कल्पवृक्षं समासाद्य मुक्तास्ते नात्रसंशयः ॥
वटसागरयोर्मध्ये ये त्यजन्ति कलेवरम् ।
ते दुर्लभं परं मोक्षं प्राप्नुवन्ति न संशयः ॥
अनिच्छन्नपि यस्तत्र प्राणांस्त्यजन्ति मानवः ।
सोऽपि दुःखविनिर्मुक्तो मुक्तिं प्राप्नोति दुर्लभाम् ॥

स्कन्दपुराणस्य वैष्णवखण्डस्य द्वितीये पुरुषोत्तमक्षेत्रमाहात्म्यस्य सप्तचत्वारिंशाध्याये पुरुषोत्तमक्षेत्रमाहात्म्यं प्रकटितमस्ति । तत्र उपासनानुसारं फलं मिलतीति [८२७]प्रतिपादितम् । यथा श्रीमद्भगवद्गीतायां विभूतियोगः प्रवर्त्तितः तथा अस्मिन् पुराणे भगवतः श्रीजगन्नाथस्य विभूतिः [८२८]प्रतिपादिताऽस्ति । इत्थं श्रीजगन्नाथदेवस्य माहात्म्येन सह क्षेत्रस्यास्य माहात्म्यं प्रकटितमिति विद्वभिः ज्ञातव्यम् ।

श्रीपुरुषोत्तमक्षेत्रस्य भौगोलिकस्थितिः-

श्रीपुरुषोत्तमजगन्नाथक्षेत्रस्य भौगोलिकस्थितिवर्णना ब्रह्म-स्कन्द-नारदपुराणेषु समुपलभ्यते । ब्रह्मपुराणं दर्शयति एतत् यत् गुह्यक्षेत्रं बालुकाकीर्णं दशयोजनविस्तीर्णमशोकपुन्नागाश्वत्थतमाल-

---

कृमिकीटपतङ्गाद्यास्तिर्यग्योनिगताश्च ये ।
तत्र देहं परित्यज्य ते यान्ति परमां गतिम् ॥
पथि श्मशाने गृहमण्डपे वा, रथ्याप्रदेशेष्वपि यत्र कुत्र ।
इच्छन्ननिच्छन्नपि तत्र देहं संत्यज्य मोक्षं लभते मनुष्य ॥
-ब्रह्मपुराणे - १७७/१६-१९, २४ ।

८२७. यथायथोपचरति तथा वै जायते नरः ॥
यो यथा समुपास्ते तं तथा वै फलमाप्नुयात् ।
एकपन्थाश्चतुर्णां वै धर्मादीनां स दारवः ॥
-स्कन्दपुराणे उत्कलखण्डे- ४७/४-५ ।

८२८. धर्मो हि भगवान्विष्णुर्धर्ममूलमिदं जगत् ।
धर्मस्य जगतश्चापि प्रभूरेष जनार्दनः ॥
पुरुषार्थमये तस्मिन्भक्तिर्यस्य प्रतिष्ठिता ।
स सर्वकामतृप्तात्मा न शोचति न कांक्षति ॥
त्रैलोक्यैश्वर्यदातासौ शक्ररूपो ह्युपासितः ।
भावितो धातुरूपेण वंशवृद्धिकरो हरिः ॥
सनत्कुमाररूपेण दीर्घमायुः प्रयच्छति ।
वृत्तिसम्पत्प्रदो ह्येष पृथुरूपेण भावितः ॥
गङ्गादितीर्थफलादौ वाचस्पतिरुपासितः ।
अन्तस्तमः प्रणुदति भास्वद्रूपेण भावितः ॥
सौभाग्यमतुलं दद्यादमृतांशुरुपासितः ।
विद्याष्टादशतत्त्वज्ञो वाक्पतित्वेन भावयन् ॥

प्रभृतिभिः वृक्षैर्लतादिभिः [८२९]परिशोभितमासीत् तत् पुरुषोत्तमक्षेत्रम् । तदेव क्षेत्रं ब्रह्मचारि-गृहस्थ-वानप्रस्थ-भिक्षुभिः नितरां परिपूर्णत्वात् सर्वधर्मगुणोपेतं परमदुर्लभं यस्मादुत्कलदेशस्य कीर्त्तिः [८३०]विस्तारिता । बहुविधैः पशुपक्षिभिः पर्वतकन्दरादिभिश्च [८३१]शोभितस्य पुरुषोत्तम-क्षेत्रस्य आयतनं दशयोजनेन [८३२]पञ्चयोजनपरिमितम् । विशेषतः ब्रह्मपुराणस्य षड्चत्वारिंशाध्याये पुरुषोत्तमक्षेत्रवर्णनं विस्तृतमस्ति यत्र विन्ध्यपादाद्विनिर्गता पुण्यतोया महानदी चित्रोत्पला, वेदाध्ययनरताः विप्राः, सर्वशास्त्राकुशलाः यज्वानः, देवयोषित्प्रतीकाः स्त्रियः, मन्त्रस्तपोयज्ञसिद्धाः ब्रह्मचारिणः निवसन्ति । अधिकन्तु यत्र

वाजिमेधादियज्ञानां फलदोऽयं सनातनः ।
यज्ञेश्वरस्वरूपेण भावितोऽयं जगन्मयः ॥
ध्यातः कुवेररूपेण समृद्धिमतुलां ददेत् ॥
एवं दयाम्बुधिरसौ तस्मिन्नीलाचले वसन् ।
दीनानाथानुग्रहाय दारुव्याजशरीरवान् ॥

-स्कन्दपुराणे उत्कलखण्डे- ४७/८-१६ ।

८२९. आस्ते गुह्यं परं क्षेत्रं मुक्तिदं पापनाशनम् ॥
सर्वत्र बालुकाकीर्णं पवित्रं सर्वकामदम् ।
दशयोजनविस्तीर्णं क्षेत्रं परमदुर्लभम् ॥

-ब्रह्मपुराणे- ४२/१३ ।

८३०. ब्रह्मचारिगृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः ॥
अस्ते तत्र मुनिश्रेष्ठा विख्यातः पुरुषोत्तमः ।
यावदुत्कलमर्यादा दिक्क्रमेण प्रकीर्त्तिता ॥

-तत्रैव- ४२/३२,३५ ।

८३१. पर्वतैर्दीप्तशिखरैश्चारुकन्दरमण्डितैः ।
नानावृक्षं समाकीर्णं नानाधातुविभूषितैः ॥
दशयोजनविस्तीर्णं पञ्चयोजनमायतम् ।
नानाश्चर्यसमायुक्तं क्षेत्रं परमदुर्लभम् ॥

-तत्रैव- ४४/७६,७९ ।

८३२. दक्षिणस्योदधेस्तीरे न्यग्रोधो यत्र तिष्ठति ।
दशयोजनविशिष्टं क्षेत्रं परमदुर्लभम् ॥

-तत्रैव- ४५/५३ ।

महाकायन्यग्रोधकल्पवृक्षः सततं शोभते यत्तु विष्णोर्मानसतीर्थत्वेन ख्यातिं लभते तदेव परमशोभनं श्रीपुरुषोत्तमक्षेत्रमिति[833] ।

स्कन्दपुराणस्य वैष्णवखण्डे पुरुषोत्तममाहात्म्ये पुरुषोत्तमक्षेत्रस्य भौगोलिकस्थितेस्तथा च श्रीमन्दिरस्य चतुर्पार्श्वस्थशाक्तशैवपीठानां स्थितेश्चोल्लेखः स्पष्टतया वर्त्तते । तत्र प्रथमाध्याये क्षेत्रस्यास्य विस्तृतिर्दशयोजनपरिमिता आयतनं च पञ्चयोजनपरिमितमिति वर्णितमस्ति । समुद्रजलात् उत्थितं बालुकाव्याप्तं नीलाचलनाम्ना इदं क्षेत्रं "[834]सर्वजनगोचरीभूतम् एव । सागरस्योत्तरतीरे महानद्यास्तु दक्षिणदिग्भागे पृथिव्यां सर्वपुण्यप्रदं स्थानं "[835]पुरुषोत्तमक्षेत्रं सर्वजनवन्द्यम् । अस्य क्षेत्रस्याधिपतिः श्रीजगन्नाथदेवो विश्वमङ्गलाय सततं विराजते"[836] । अत्र यमेश्वरः समुद्रतटमाश्रित्य श्रीजगन्नाथमुपासितुं

---

८३३. नदी यत्र महापुण्या विन्ध्यपादविनिर्गता ।
चित्रोत्पलेति विख्याता सर्वपापहरा शिवा ॥
महानदीतिनाम्ना सा पुण्यतोया सरिद्वरा ॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्रास्तत्र पृथक् पृथक् ॥
वेदपूर्णमुखाविप्राः सषडङ्गपदक्रमाः ॥
सर्वशास्त्रार्थकुशला यज्वानो भूरिदक्षिणाः ॥
स्त्रियस्तद्देशवासिन्यो रूपयौवनगर्विता ॥
देवयोषित्प्रतिकाशा दृश्यन्ते शुभलक्षणाः ॥
भिक्षुवैखानसैः सिद्धैः स्नातकैर्ब्रह्मचारिभिः ॥
इत्येवं ददृशे राजा क्षेत्रं परमशोभनम् ॥

-ब्रह्मपुराणे- ४६/४-२६ ।

८३४. अहो तत्परमं क्षेत्रं विस्तृतं दशयोजनम् ।
तीर्थराजस्य सलिलादुत्थितं बालुकाचितम् ॥
नीलाचलेन महता मध्यस्थेन विराजितम् ॥

-स्कन्दपुराणे उत्कलखण्डे- १/११-१२ ।

८३५. सागरस्योत्तरतीरे महानद्यास्तु दक्षिणे ।
सः प्रदेशः पृथिव्यां हि सर्वतीर्थफलप्रदः ॥
पृथिव्यां गोपितस्थानं तव चापि सुदुर्लभम् ॥

-तत्रैव- ४/३२-३३ ।

८३६. पञ्चक्रोशमिदं क्षेत्रं समुद्रान्तर्व्यवस्थितम् ।

[८३७]विराजते । पुरुषोत्तमक्षेत्रमिदं शङ्खाकारविशिष्टम् । अस्य मूर्द्धनि यमेश्वरदेवः, अग्रे [८३८]नीलकण्ठदेवश्च राजते । सिन्धुसलिलात् कल्पवटमूलं यावत् [८३९]पवित्रपावनक्षेत्रमिति श्रिया कथितम् । शङ्खस्योदरभागः समुद्रजलभाग एव, यस्मात् समुद्रतीर्थराजत्वेन [८४०]ख्यातः । शङ्खस्य द्वितीयावर्त्ते कपालमोचनेश्वरः दक्षिणपार्श्वे भवमोचनेश्वरः तृतीयावर्त्तगा विमलादेवी । शङ्खस्य नाभिदेशे रोहिण्यकुण्डं, कल्पवटश्च [८४१]विद्यते । शङ्खस्य मध्यभागे अर्द्धाशिनी

द्विकोशं तीर्थराजस्य तटभूमौ सुनिर्मलम् ॥
सुवर्णबालुकाकीर्णं नीलपर्वतशोभितम् ।
योऽसौ विश्वेश्वरदेव साक्षान्नारायणात्मकः ॥
संयम्य विषयग्रामं समुद्रतटमास्थितः ॥

-स्कन्दपुराणे उत्कलखण्डे- ३/५२-५४ ।

८३७. उपासितुं जगन्नाथं चतुःषष्टितमः प्रभुः ॥
यमेश्वर इति ख्यातो यमसंयमनाशनः ॥

-तत्रैव- ३/५४-५५ ।

८३८. सीमा प्रतीची क्षेत्रस्य शङ्खाकारस्य मूर्द्धनि ॥
शङ्खाग्रे नीलकण्ठः स्यादेतत्क्रोशं सुदुर्लभम् ।
परमं पावनं क्षेत्रं साक्षान्नारायणस्य वै ॥

-तत्रैव- ४/१-२ ।

८३९. सिन्धुराजस्य सलिलाद्यावन्मूलं वटस्य वै ।
शङ्खस्योदरभागस्तु समुद्रोदकसंप्लुतः ॥

-तत्रैव- ४/३ ।

८४०. यत् सम्पर्कात् समुद्रोऽत्र तीर्थराजत्वमागतः ।

-तत्रैव- ४/४ ।

८४१. कपालमोचनं लिङ्गं द्वितीयावर्त्तसंस्थितम् ॥
तस्य दक्षिणपार्श्वे तु मरणं भवमोचनम् ॥
तृतीयावर्त्तगामाद्यां शक्तिं मे विमलाह्वयाम् ॥
नाभिदेशे स्थितं ह्येतत्त्रयं कुण्डं वटो विभुः ।
कपालमोचनाद्यावदर्द्धाशिनी प्रतिष्ठिता ॥

-तत्रैव- ४/७-११ ।

[842]शक्तिर्विद्यते । पुरुषोत्तमक्षेत्रस्य श्रेष्ठताप्रतिपादनार्थं पुरुषोत्तमः [843]तीर्थराजत्वेन प्रतिपादितः । तदनन्तरं लक्ष्मीः रोहिण्यकुण्डस्य [844]नामकरण कृतवती । तदवसरे नृसिंहस्य स्थानप्रदर्शनेन सह तस्य श्रेष्ठता प्रतिपादिता । अन्तर्वेदीरक्षणार्थम् [845]अष्टशक्तीनां सृष्टिः कृता भगवता अब्जपतिना । ताः लक्ष्मीः, गौरी, मङ्गला, विमला, सर्वमङ्गला, अर्द्धाशिनी, कालरात्रि, मरीचिका चेति । कालरात्रिः परवर्त्तिनि समये चण्डीरूपेण [846]ख्याता । तदनन्तरं आत्मानम्

---

८४२. मध्यं शंखस्य जानीयात्सुगुप्तं चक्रपाणिना ।
अर्द्धमश्नाति सलिलं महाप्रलयवर्द्धितम् ॥
सृष्ट्यादौ धर्मराजेयं शक्तिर्मेऽर्द्धाशिनी स्मृता ॥
-स्कन्दपुराणे उत्कलखण्डे- ४/१२-१३ ।

८४३. पृथिव्यां यानि तीर्थानि गगने च त्रिविष्टपे ।
सार्द्धं त्रिकोटिसंख्यानि स्वर्गमोक्षप्रदानि वै ॥
तेषामयं तीर्थराजः कीर्त्तितः पुरुषोत्तमः ।
सर्वेषां मुक्तिक्षेत्राणामिदं सायुज्यदं मतम् ॥
-तत्रैव- ५/१६-१७ ।

८४४. कुण्डं ह्येतद्रोहिणाख्यं कारणाख्यजलेन वै ॥
संभृत तिष्ठते नित्यं स्पर्शनाद्बन्धमुक्तिदम् ।
अत्र प्रतिष्ठितं वारि प्रलये यत्प्रवर्द्धते ॥
अत्रैव लीयते पश्चात्तस्माद्रोहिणासंज्ञितम् ॥
-तत्रैव- ४/१८-२० ।

८४५. अन्तर्वेदी रक्षणार्थं शक्तयोऽष्टौ प्रकीर्त्तिताः ॥
-तत्रैव- ४/३९ ।

८४६. पत्न्यर्थं सा मया सृष्टा गौरी तस्याथ भाविनी ॥
सा तु तिष्ठति मत्प्रीत्या अष्टधा दिक्षु संस्थिता ।
मङ्गला वटमूले तु पश्चिमे विमला तथा ॥
शङ्खस्य पृष्ठभागे तु संस्थिता सर्वमङ्गला ।
अर्द्धाशिनी तथा लम्बा कुवेरदिशि संस्थिता ॥
कालरात्रिर्दक्षिणस्यां पूर्वस्यां तु मरीचिका ।
कालरात्र्यास्तथा पश्चाच्चण्डरूपा व्यवस्थिता ॥
- तत्रैव- ४/४०,४२-४४ ।

[847]अष्टशम्भुरूपेण सृष्टवान् । तेनैव क्षेत्रपाल-कपालमोचन-यमेश्वर-मार्कण्डेय-ईशानेश्वर-विल्वेश-नीलकण्ठ-वटेशाभिधेयानि अष्टलिङ्गानि [848]स्थापितानि । एवं प्रकारेण पुरुषोत्तमक्षेत्रस्य भौगोलिकस्थितिर्वर्णिता वर्त्तते । पञ्चतीर्थानां समावेशो यथास्थानं विद्यते येषां स्पर्शेनावगाहनेन चात्मानं पवित्रितं कुर्वन्ति जना इति विद्वद्भिः ज्ञातव्यम् ।

***

८४७. रुद्राण्याश्चाष्टधा भेदं दृष्ट्वा रुद्रोऽपि शङ्करः ।
आत्मानमष्टधा भित्वा उपास्ते परमेश्वरम् ॥
-स्कन्दपुराणे उत्कलखण्डे- ४/४७ ।

८४८. कपालमोचनं नाम क्षेत्रपालं यमेश्वरम् ।
मार्कण्डेयं तथेशानं विल्वेशं नीलकण्ठकम् ॥
वटमूले वटेशं च लिङ्गान्यष्टौ महेशितुः ॥
-तत्रैव- ४/५२-५३ ।

चतुर्थपरिच्छेदः

उपसंहारः-

प्रारब्धस्य कर्मणः समाप्ति अवश्यं कर्त्तव्याः । अतः अत्रोपन्यस्तविषयाणामन्तिमे कश्चन सिद्धान्तो दातव्य इति अनुभूयते ।

'अष्टादशपुराणेषु श्रीजगन्नाथः' इति सन्दर्भस्यास्य प्रस्तुत्यवसरे अस्माभिः सनातनहिन्दुसंस्कृतितः आरभ्य देवतोपासनायाः मूलतत्त्वादिकमालोचितम् । तत्र प्रागैतिहासिकपुराणयुगादारभ्य इदानीं यावत् श्रीजगन्नाथतत्त्वस्य कल्पना कुतः कथं केन च जाता इत्यादिकं सर्वं सन्दर्भेऽस्मिन् अन्तर्भुक्तम् । अतः प्राक् अनुसन्धानकारिभिः इतिहासमालोच्य एतद्देशे प्रथमतः अनार्याः शवराः द्राविडा वा आसन्, तेषामेव भक्तिकारणात् क्रमानुसारं निराकारसाकारदेवपूजा प्रसिद्धिं गता इति प्रतिपादितम् । प्रागैतिहासिकयुगेऽपि वृक्षादीनामाराधनम् आसीत् । तस्य [illegible] अधुनातनचतुर्द्धामूर्त्तिविशिष्टजगन्नाथतत्त्वं परिकल्पितं जातम्, इत्यपि तैः बहुत्र प्रतिपादितम् । किन्तु अस्माकं [illegible]तथ्यसकल विचार्य विविधशङ्कानिराकरणच्छलेन अधुना [illegible] ।

[illegible] समुद्घाटनेन उत्कलेषु उड्रेषु वा पुरुषोत्तम-श्रीजगन्नाथदेव उपासितो भवति इत्यस्मिन् विषये नास्ति मतद्वैधम् । महाराजा इन्द्रद्युम्नः श्रीजगन्नाथादिमूर्त्तिप्रतिष्ठाकाले हठादाविर्भूत-नरसिंहमूर्त्तिं [८४९]दृष्टवान् इति पठ्यते । श्रीजगन्नाथदर्शनात् प्राक् नरसिंहदर्शनं जातम् । नरसिंहदेवस्य अवतारत्वं पूर्वत्र [८५०]प्रतिपादितम् ।

---

८४९. नृसिंहं शान्तवपुषं लक्ष्मीसंश्रितवक्षसम् ॥.
चक्रं पिनाकं दधतं चन्द्रसूर्याग्निचक्षुषाम् ॥
प्रजहर्ष नृपो दृष्ट्वा तादृशं पुरुषोत्तमम् ॥
-स्कन्दपुराणे उत्कलखण्डे- २८/२७-२८,३२ ।

८५०. (क) आद्या मूर्त्तिर्भगवतो नारसिंहाकृतिर्नृप ।
नारायणेन प्रथिता मदनुग्रहतस्त्वयि ॥
-तत्रैव- २८/३८ ।

स्वभीष्टसिद्धिनिमित्तं इन्द्रद्युम्नेन श्रीनरसिंहदेवस्योपासना कृता। देवप्रतिष्ठादिकर्मसु श्रीनरसिंदेवस्योपासना [८५१]परिलक्ष्यते। श्रीजगन्नाथसंस्कृतौ नूतनदारुमूर्त्तिप्रतिष्ठावसरे अधुनाऽपि श्रीनरसिंहदेवस्य पूजामन्त्रः 'मन्त्रराजः'[८५२] उच्चार्यते। सृष्ट्यारम्भे नृसिंहमन्त्रराजस्य उच्चारणं सिद्धमिति [८५३]स्कन्दपुराणं प्रस्तौति। श्रीजगन्नाथदेवस्य पूजार्च्चना नृसिंहमन्त्रेण न भवति। श्रीजगन्नाथनृसिंहयोः पूजामन्त्रभिन्नत्वात् य एव नरसिंह स एव जगन्नाथः इति कथनमयोक्तिकम्। श्रीनरसिंहदेवः स्वतन्त्रः, श्रीजगन्नाथदेवः स्वतन्त्रश्चेति स्वीकार्यम्।

अन्या शङ्का उदेति यत् किं जैनबौद्धप्रभृतिधर्मसम्प्रदायाः श्रीजगन्नाथधर्मस्योपरि प्रभावं विस्तारयन्ति अथवा तत् प्रभावान्विताः भवन्ति ? इतिहासानुसारेण जैनबौद्धप्रभृतिधर्मसम्प्रदायसकलस्य

(ख) सिंहाकृर्तिं स हृदये उद्वास्य कमलासनः ॥
पूर्वप्रकाशरूपं यद्विष्णोस्तु प्रकटीकृतम् ॥
-स्कन्दपुराणे उत्कलखण्डे- २९/१-२।

८५१. अन्तर्हितः खल्विदानीं नीलरत्नतनुर्हरिः।
तत्र श्रीनरसिंहस्य क्षेत्रं कुरु मदाज्ञया ॥
तत्र नः सन्निधौ वाजिमेधेन यजतामयम्।
सहस्रेण नृपश्रेष्ठ मदन्ते तरुमद्भुतम् ॥
दर्शयेनं द्विजश्रेष्ठ ब्रह्मरूपमकल्मषम्।
चतस्रः प्रतिमास्तेन विश्वकर्मा घटिष्यति ॥
-तत्रैव- १२/१०६-१०८।

८५२. ॐ उग्रवीरं महाविष्णुं ज्वलन्तं सर्वतोमुखम्।
नृसिंहं भीषणं भद्रं मृत्युमृत्युं नमाम्यहम् ॥

८५३. सिंहयन्त्रं समालेख्य तस्योपरि निवेश्य च ॥
दीक्षयित्वा मन्त्रराजं साक्षादाथर्वणोदितम् ॥
यमधीत्यं महामन्त्रं मनुः स्वायम्भुवः पुरा ॥
सृष्टिं चकार भगवान् प्राप्तमस्माच्चतुर्मुखात् ॥
मन्त्रराजं ततो लब्ध्वा इन्द्रद्युम्नश्चतुर्मुखात् ॥
-तत्रैव- २८/१८-२१,२७।

श्रीजगन्नाथसंस्कृतेरुपरि प्रभावः जातः । वस्तुगत्या पुराणवचनानाम् आलोचनात् तन्न समीचीनं मन्यते । त एव धर्मसम्प्रदायाः परवर्त्तिनि काले संघठिता इति ज्ञायते । कारणमेतत् यत् उभयोः बौद्धजैनसम्प्रदाययोः उपास्यं रत्नत्रितयं यत् भवति तत् श्रीजगन्नाथसंस्कृतौ श्रीजगन्नाथ-बलभद्र-सुभद्रेतिरूपेण त्रिमूर्त्ति-तत्त्वमूलकम् । यदि च अत्र संशयो भवेत् यत् एतयोः धर्मसम्प्रदाययोः उद्भवानन्तरं तत्प्रभावात् श्रीजगन्नाथादिमूर्त्तित्रित्रयस्य कल्पना जाता इति तर्हि अष्टमशतके इन्द्रभूतिना विरचिते 'ज्ञानसिद्धि'नामके बौद्धधर्मग्रन्थे मङ्गलाचरणे जीनेभ्यः बौद्धेभ्यः वा श्रीजगन्नाथदेवस्य महत्त्वाधिक्यं न प्रकटीकृतं भवेत् । जैनधर्मग्रन्थेषु अपि तथा परिलक्ष्यते । यदि वा जैनसंस्कृतेः च अनन्तरं श्रीजगन्नाथसंस्कृतेरुद्भवो जातः, तर्हि श्रीजगन्नाथदेवस्य विषयप्रतिपादकेषु ब्रह्मादिपुराणेषु न कुत्रचित् बौद्धजैनधर्मसम्पर्कीयतथ्यप्रतिपादनं कथं नोपलभ्यते ? वस्तुतः श्रीजगन्नाथः न केनचित् धर्मेण प्रभावितः । श्रीजगन्नाथ-संस्कृत्या अन्ये धर्ममतवादाः प्रभाविताः तथा च परिपुष्टाः जाताः । अतएव न केवलं शवरसंस्कृतितः अपि च जैनबौद्धसंस्कृतितः श्रीजगन्नाथसंस्कृतिः प्राचीनतरा इति सिद्धम् ।

ब्रह्मपुराणे एकोनषष्टितमेऽध्याये प्रतिपादिततथ्यानुसारं श्वेतगङ्गानामधेयस्य सरोवरस्य तटे [८५४]हस्तचतुःशतपरिमितोच्चता-विशिष्टं मन्दिरमेकं निर्मितं यत्रैव श्वेतमाधवदेवस्य उपासना प्रचलिता आसीत् । अधुना अस्मिन्नेव पुरीक्षेत्रे तस्य सरोवरस्य तटे क्षुद्रकाये एकस्मिन् मन्दिरे श्वेतमाधव-मत्स्यमाधवयोः मूर्त्तिपूजा प्रचलिता । कालक्रमेण पूर्वोक्तमन्दिरस्य ध्वंसो जातः ।

ब्रह्मपुराणे सप्तचत्वारिंशाध्याये श्रीजगन्नाथमन्दिरस्य निर्माणार्थम् इन्द्रद्युम्नस्यादेशेन कलिङ्गोत्कलकोशलाधिप-

---

८५४. श्वेतोऽथ कारयामास प्रासादं शुभलक्षणम् ॥
धन्वन्तरशतं चैकं देवदेवस्य दक्षिणे ।
ततः श्वेतेन विप्रेन्द्राः श्वेतशैलमग्रेन च ॥

-ब्रह्मपुराणे - ५९/२८-२९ ।

प्रभृतिभिः[८५५] विन्ध्याचलात् प्रस्तरखण्डानाम् आनयने वहुकार्यं सम्पादितम् इति पठ्यते । किन्तु विन्ध्याचलस्य श्रीपुरुषोत्तमक्षेत्रात् वहुदूरत्वात् ततः शकटैर्नौकाभिश्च प्रस्तरखण्डानाम् आनयनं कष्टसाध्यमिति हेतोः इन्द्रद्युम्नः भग्नश्वेतमाधवमन्दिरस्य शिलाखण्डान् संगृह्य श्रीजगन्नाथदेवस्य मन्दिरांशनिर्माणं कृतवान् इति अनुमातुं शक्यते ।

अपरा शङ्का आगच्छति यत् [८५६]स्कन्दपुराणानुसारं भगवतः श्रीजगन्नाथदेवस्य विराजमानस्थानं शिलामयं तथा च कण्टकितारण्यपूर्णम् । यद्येतत् तर्हि इन्द्रद्युम्नस्य आदेशात् राजभिः कथं विन्ध्याचलात प्रस्तरखण्डाः आनीता ? एकदा प्रचण्डबातफलेन भगवतः श्रीजगन्नाथदेवस्य इन्द्रनीलमणि पाषाणमयी प्रतिमा वालुकायां वालिभिर्गोपिता जाता इति [८५७]पठ्यते । वस्तुतः तदवसरे तस्मिन्नेवक्षेत्रे

---

८५५. कलिङ्गाधिपतिं शूरनुत्कलाधिपतिं तथा ।
कोशलाधिपतिं चैव तानुवाच तदा नृपः ।
गच्छध्वं सहिताः सर्वे शिलार्थे सुसमाहिता ॥
गृहीत्वा शिल्पिनुख्यांश्च शिलाकर्मविशारदान् ।
विन्ध्याचलं सुविस्तीर्णं वहुकन्दरशोभितं ॥
निरुप्य सर्वसानूनि छेदयित्वा शिलाः शुभाः ।
संवाह्यन्तां च शकटैर्नौकाभिर्मा विलम्वथ ॥

-व्रह्मपुराणे - ४७/७-९ ।

८५६. इत्युक्त्वा तं करे धृत्वा वत्मना गहनं ययौ ।
उपर्युपर्युपारुह्य शिला विषमवत्मनि ॥
एकैक नरगन्ये च कण्टकाचितदुर्गमे ॥

-स्कन्दपुराणे उत्कलखण्डे, ८/१३-१४ ।

८५७. (क) दक्षिणोदधितीरेऽस्ति नीलाद्रिः काननावृतः ।
न तत्र लोकसंचारस्तत्रास्ते साऽपि देवता ॥
वात्यया वालुकाकीर्णः साम्प्रतं श्रुयते तु स ॥

-तत्रैव, ११/१३३-१३४ ।

(ख) प्रत्यागते ततो विप्रे सायाह्ने सुरसङ्कुले ।
माधवार्चनवेलायां वातश्चण्डगतिर्ववौ ॥

भवतु समग्रपृथिव्यां वा भवतु अवश्यं वातभूकम्पादिप्रचण्डदैव-दुर्विपाकः जातः येन तस्यैव क्षेत्रस्य भौगोलिकपरिवर्त्तनं जातम् । तदवसरे महासागरकूलस्थाश्ममण्डलस्य नीलपर्वतस्य वा परिवर्त्तनं जातं तथा च तत्र महासागरस्य कूलप्रान्ते बालुकाराशिः व्याप्ता जाता इति ज्ञायते । अतः पूर्वप्रसिद्धानां रोहिणींकुण्डादीनाम् अदर्शनं जातम् । केवलं तच्चिह्नप्रदर्शनार्थं सम्प्रति रोहिणीकुण्डं विद्यते । स एव बालुकापर्वतः नीलाश्ममणिविग्रहस्य प्राक्प्रसिद्ध्यनुसारं नीलगिरिरिति नाम्ना प्रसिद्धो जातः ।

अत्र शङ्का भवति यत् नीलमाधवस्य उपासनाकाले किं नीलमाधवः एकाकी एव प्रपूजिता आसीत् ? अथवा तेन सह अपरेषां देवानाम् उपासना संयुक्ता आसीत् ? श्रीजगन्नाथदेवस्य त्रिधा मूर्त्तितत्त्वं चतुर्द्धा चेति द्वयं परिलक्ष्य विदुषां मनसि एषः संशय आगच्छेत् । एतस्मिन्नेव विषये स्कन्दपुराणं[८५८] तथ्यं प्रतिपादयति यत् तदानीमेव माधवोपासनायां चतुर्द्धामूर्त्तिकल्पना सन्निहिता आसीत् इति । यद्यपि एतद्वचनं देवताचतुष्टयस्य नाम न प्रस्तौति तथापि तदानीं[८५९]चतुर्द्धामूर्त्तिकल्पना जाता आसीत् इति निश्चीयते ।

शङ्का आगच्छति यत् बौद्धसम्प्रदाये भगवतः बुद्धदेवस्य

सुवर्णा बालुकाश्चासौ विचकार च सर्वशः ॥

-स्कन्दपुराणे उत्कलखण्डे, ९/१-२ ।

(ग) सायं काले ततोऽन्येद्युः स्वर्णबालुकया वृत्तः ।
यया पातालनिलयं मर्त्यलोके सुदुर्लभः ॥

-तत्रैव - १४/१० ।

(घ) ब्रह्मपुराणे ४५/७२-७५ ।

८५८. पदात्पदाच्छ्रेष्ठतमो नीलाद्रिरपवर्गदः ।
चतुर्देहस्थितोऽहं वै यत्र नीलमणीमयः ॥

-स्कन्दपुराणे उत्कलखण्डे, १२/७६ ।

८५९. (क) पुरा स्म मणिमूर्त्तिस्तु चतुर्द्धावस्थितो हरिः ॥
दिव्यदारुवपुर्भूयश्चतुर्द्धावतरिष्यति ॥

-तत्रैव- १४/४३-४४ ।

दन्तोत्सवरूपेण आषाढमासशुक्लद्वितीयातिथौ रथयात्राविधिराचर्यते। जैनसम्प्रदाये अपि ऋषभदेवस्य 'गर्भकल्याणदिवसः' अस्मिन्नेव दिवसे परिपाल्यते । बौद्धाः कथयन्ति यत् बुद्धदेवस्य देहत्यागानन्तरं अविनष्टस्य दन्तस्य स्थलविशेषे स्थापनार्थं यः एव उत्सवः पालितः तस्य स्मारकीयोऽयं उत्सवः । बुद्धदेवस्य दन्तविशेषः यदि श्रीजगन्नाक्षेत्रे ब्रह्मरूपेण प्रतिष्ठापितः तर्हि बौद्धसम्प्रदायाधीनः रथयात्राविशेषोऽयं कथं न भवेत् ? निरर्थकोऽयं संशयः । वैष्णवाः मरशरीरं कदाचित् न पूजयन्ति । अतएव भगवतः श्रीजगन्नाथदेवस्य वैष्णवाराध्य-दारुविग्रहमध्ये बुद्धदेवस्य दन्तः अस्ति इति शङ्कायाः अवसरः नास्ति। अधिकन्तु अत्र विचार्यविषयो वर्त्तते मन्त्रपीठयोरेकत्रसंयोगेन मूर्त्तिस्थापनं भवति । देवमूर्त्तिप्रतिष्ठानन्तरं मन्त्रशुद्धपीठात् यदा बहिरागच्छति तदा तस्याः देवत्वं नष्टं भवति । तर्हि श्रीजगन्नाथादिदेवमूर्त्तिनां नवदिनात्मकरथयात्रोद्देश्येन बहिरागमनेन देवतात्वं नापसरति किमु ? नैतत् भवति । केचन दारुप्रतिष्ठाकर्म विद्वासः आमन्यन्ति यत् ब्रह्मत्वेन मूर्त्तीनां गर्भे शालग्रामं वर्त्तते । अपरे केचन मतं पोषयन्ति यत् बौद्धाः भगवतः श्रीजगन्नाथदेवस्य दारुमूर्त्तिगर्भे ब्रह्मत्वेन बुद्धदन्तः अस्तीति यत् कथयन्ति वस्तुगत्या तन्न, प्रत्युत तत्र सुवर्णनिर्मितं मन्त्रपूतं यन्त्रमेकं वर्त्तते । तद्वारा प्रतिष्ठापितपीठस्थानात् अपसरेणापि देवमूर्त्तिनां देवत्वं नष्टं न भवति । अतएव नवदिवसात्मक यात्रायाः अनुष्ठानरनन्तरमपि ताः एव देवताः पूर्ववत् पूज्यन्ते इति दृष्ट्या श्रीजगन्नाथदेवस्य दारुविग्रहबुद्धदेवस्य दन्तः नास्ति इति दृढतया प्रतिपादयितुं शक्यते ।

जैनसम्प्रदायस्य ऋषभदेवस्य गर्भकल्याणदिवसोऽयं कदाचित् न भवेत् । एकस्मिन्नेव रथे ऋषभदेवस्य नगरपरिक्रमा क्रियते । एतत्तु श्रीजगन्नाथरथयात्रातः सम्पूर्णतया भिन्ना भवति ।

(ख) अस्य मूलात्प्रतीच्यां हि नृसिंहस्योत्तरे नृप ।
अतिष्ठन्माधव यत्र चतुमूर्त्तिधरो विभुः ॥
अनुग्रहीतुं त्वामेवपुनरत्रोद्भविष्यति ॥

-स्कन्दपुराणे उत्कलखेण्डे, १५/२४-२५ ।

स्कन्दपुराणप्रतिपादनानुसारं महावेद्यां भगवतः प्रतिमाचतुष्टयस्य[८६०] निर्माणानन्तरं श्रीमन्दिरस्य रत्नसिंहासनं प्रति तासामेव आनयनकाले भगवता विष्णुना इन्द्रद्युम्नाय आशीर्वादं प्रदाय श्रीमन्दिरं प्रति देवतानाम् आगमनदिवसस्य स्मरणनिमित्तं तस्मिन्नेव दिने यथा रथयानेन आनयनं सम्पादितं तथा तन्निर्दिष्टे आषाढशुक्लद्वितीयादिवसे भगवतः प्रतिमाचतुष्टयस्य महावेदीं गुण्डिचामण्डपं वा [८६१]प्रति यात्रा कारयितव्या इति कथितम् ।

अतः ऐतिहासिकैः जैनोत्सवोत्वेन बौद्धोत्सवत्वेन वा यदयं कथ्यते पुराणानुसारं तत् न समीचीनं मन्यते । रथयात्रा एव रत्नसिंहासनं प्रति भगवतः प्रतिमानाम् आनयने एव स्मारकीयदिवसः न तु जैनोत्सवः बौद्धोत्सवः वेति । अस्याः यात्रायाः उपरि न कस्यचित् सम्प्रदायस्य प्रभावः पततिः प्रत्युतः सर्वेषामुपरि श्रीजगन्नाथदेवस्य प्रभावः पतितः येन तैः सम्प्रदायैः श्रीजगन्नाथदेवस्य रथयात्रायाः अनुकरणेन जन्मोत्सवः, गर्भकल्याकोत्सवः, दन्तोत्सवप्रभृतिः परिपाल्यते । श्रीजगन्नाथदेवः ब्राह्मण्यधर्मस्य भगवतधर्मस्य वैष्णवधर्मस्य वा

---

८६०. (क) स्वर्णः सुघटितं साधुरथत्रयमलङ्कृतम् ॥
यथाशास्त्रविधानेन नारदेन प्रतिष्ठितम् ॥
एवं प्रतिष्ठिते तत्र स्यन्दनेऽथ सुभुषिते ।
आरोप्यदेवं विधिवत् ब्रह्मघोषपुरःसरम् ॥

-स्कन्दपुराणे उत्कलखेण्डे, २८/८,२२,५० ।

(ख) उत्सवांश्चापि विज्ञाय करिष्ये प्रतिवत्सरम् ॥

-तत्रैव- २६/१४।

८६१. आषाढस्य सितेपक्षे द्वितीया पुष्यसंयुता ।
तस्यां रथे समारोप्य रामं मां भद्रया सह ॥
महोत्सवप्रवृत्यर्थं प्रीणयित्वा द्विजान् बहून् ।
गुण्डिचामण्डपं नाम यत्राह्मजनं पुरा ॥
अश्वमेध सहस्रस्य महावेदी तदाभवत् ॥
तथा नृसिंहं क्षेत्रे वै महावेदी तव क्रतोः
ममोत्पत्तेश्च निलयं प्रीतिकृन्ममशाश्वतम् ॥

-तत्रैव- २९/३३-३५, ३८ ।

देवतात्वेन आदिकालतः पूजितो भवति इति ऐतिहासिकैः यत् तथ्यं प्रतिपाद्यते तत्सर्वं समीचीनं प्रतिभाति ।

केचन विद्वांसः न केवलं जानन्ति अपि च दृढं प्रतिपादयन्ति यत् नीलगिरौ प्रथमतः माधवः प्रपूजितः आसीत् । तदनन्तरं सम्पृक्तभूखण्डेऽस्मिन् नन्दगिरिनाथस्य, नीलगिरिनाथस्य, शबरीनारायणस्य वा उपासना प्रचलिता जाता

श्रीजगन्नाथः प्रथमतो नीलमाधवनाम्ना इन्द्रनीलमणिपाषाणमयी प्रतिमारूपेण विराजितः आसीत् इति [८६२]ब्रह्मादिपुराणेषु प्रतिपादितम् । श्रीजगन्नाथस्य इयमेव इन्द्रनीलमणिपाषाणमयीप्रतिमा तदानीमुत्कलीय-सभ्यतायाः चरमनिदर्शनं द्योतयति । अतः पूर्वं तत्र उत्कलेषु सुमहती आर्यसभ्यता निरवच्छिन्ना आसीदिति कथयितुं शक्यते । तदवसरे पापिम्लेच्छशिक्षितप्रभृतीनां तस्याः प्रतिमायाः सम्मुखे आगमनेन प्रतिक्रियास्वरूपतः सा प्रतिमा अन्तर्हिता जाता इति [८६३]ब्रह्मपुराणे स्पष्टं

---

८६२. (क) अस्मिन्नायतने पुण्ये विख्याते पुरुषोत्तमे ।
इन्द्रनीलमणि श्रेष्ठा प्रतिमा सार्वकामिकी ॥

-ब्रह्मपुराणे, ४५/७१ ।

(ख) नीलेन्द्रमणिपाषाणमयी मूर्त्तिः पुरातनी ॥

-स्कन्दपुराणे उत्कलखण्डे - ९/६३ ।

(ग) इन्द्रनीलमयो देव आस्ते चक्रगदाधरः ।
एकाशीत्यङ्गुलमित स्वर्णपद्मोपरिस्थितः ॥
वपुषोऽश्ममयत्वेऽपि सुस्मितस्नपिताधरः ॥

-तत्रैव- १०/१८,२१ ।

८६३. (क) प्रतिमाचेन्द्रनीलाख्या स्वयं देवेन गोपिता ।
न चात्र दृश्यते चान्या प्रतिमावैष्णवी शुभा ॥

-ब्रह्मपुराणे- ४६/२७ ।

(ख) तां दृष्ट्वा पुण्डरीकाक्ष भावेनैकेन श्रद्धया ।
श्वेताख्यं भवनं यान्ति निष्कमाश्चैव मानवाः ॥
अतः कर्त्तु न शक्नोमि व्यापारमरिसूदन ।
प्रसीद सुमहादेव संहर प्रतिमां विभा ॥

परिलक्ष्यते । [८६४]स्कन्दपुराणम् अत्र किञ्चित् विलक्षणसम्पन्नं तथ्यं प्रतिपादयति येन दारवीमूर्त्तिरूपेण प्रतिष्ठां प्राप्तुं इन्द्रनीलमणि-पाषाणप्रतिमा अन्तर्हिता जाता इति ज्ञायते । यद्वा भवतु पूर्वोक्त-प्रतिपादनानुसारं प्रचण्डवातफलेन एषा इन्द्रनीलमणिपाषाणमयी प्रतिमा नष्टा जाता इति निश्चितम् । तदनन्तरं भगवतः दारवीमूर्त्तिः प्रतिष्ठापिता इति । शङ्का आगच्छेत् यदि तदोत्कलेषु सुशिक्षिता सुसंगठिता आर्यसभ्यता आसीत् तर्हि सुदूरमालवदेशस्थात् अवन्तीनगरात् राजा इन्द्रद्युम्नः अत्र आगत्य दारवीमूर्त्तिनिर्माण-व्यापारेऽस्मिन् कथं सम्पृक्ताऽभवत् ? श्रीजगन्नाथस्य संस्कृतेश्च पृष्ठपोषकत्वेन तदानीं केनचित् सुसभ्येन उत्कलीयनरपतिना अस्य विरोधः न कृत ? अत्र विवेचनीयं यत् पुरीक्षेत्रमिदं तदानीं महतीतीर्थसम्पृक्तक्षेत्ररूपेण अपि प्रसिद्धमासीत् । उपासनार्थं तत्रैव सर्वेषां अधिकारः आसीत् । अतो न कस्यचन कृते अत्र पुरुषोत्तमोपासनार्थं बाधा आगच्छति । अतएव निर्विघ्नेन राजा इन्द्रद्युम्नः पुरुषोत्तमोपासनार्थं जनकल्याणायमन्दिर-निर्माणं कृतवान् । अधिकन्तु इन्द्रद्युम्नः सार्वभौमनरपतित्वेन[८६५] तदानीं प्रख्यात इति हेतोः उत्कलेषु पृथिव्यां सर्वेषु राष्ट्रेषु च यत्किञ्चित्करणार्थं

श्रुत्वा वैवस्वतस्यैतद्वाक्यमेतदुवाच ह ।
यमं तां गोपयिष्यामि सिकतामि : समन्ततः ॥
ततः सा प्रतिमादेवी बल्लिभिर्गोपिता मया ।
यथा तत्र न पश्यन्ति मनुजा स्वर्गकांक्षिणः ॥

-ब्रह्मपुराणे- ४५/७२-७५ ।

८६४. अत्र क्षेत्रे मृता ये च न तेषां तु प्रभुर्यमः ।
यदर्थमागतस्त्वं हि तदन्यत्रप्रसाधय ॥
तथाप्यसौ जगन्नाथो भक्तायात्मसमर्पकः ।
यमेन तोषितो भक्त्या प्रपन्नार्तिहरः प्रभुः ॥
सुदर्शनेन चक्रेण मायां च व्यवधास्यति ।
अत्याज्यऽस्मिन्क्षेत्रवरे स्वर्णवालुकया वृते ॥

-स्कन्दपुराणे उत्कलखण्डे - ४/५४-५६ ।

८६५. (क) इन्द्रद्युम्नो नरपतिः सार्वभौमः प्रतापवान् ।

-तत्रैव- ८/४९ ।

तस्यैव अधिकारः सर्वदा आसीदिति ज्ञातव्यम् । तदानीम् उत्कलकलिङ्ग-कोशलप्रभृतिराज्यसकलं सार्वभौमराज्ञः इन्द्रद्युम्नस्य शासितराज्यम् आसीदिति निश्चीयते ।

अत्र कथयितुं शक्यते यत् ⁸⁶⁶स्कन्दपुराणप्रतिपादनानुसारं शवरराज्ञा विश्वावसुना इन्द्रनीलमणिपाषाणमयी प्रतिमा प्रपूजिता आसीत् केवलं भक्तिपूर्णचित्तेन न तु मन्त्रोच्चारणपूर्वकम् । अत्र घनारण्यमध्ये शवरेण विश्वावसुना कृता नीलमाधवोपासना तदानीन्तन शिक्षितसमाजे निन्दिता । अधिकन्तु यदि स अरण्यवासी तथापि द्विजपरीवेष्टनात् तस्यैव महत्वमधिकं प्रकटितमस्ति ⁸⁶⁷स्कन्दपुराणे । अतोऽत्र डॉ० गोपिनाथमहापात्रमहोदयानां⁸⁶⁸ सार्थको उक्तिः । अत्र

(ख) स्वामिन्सर्वत्रकुशलं त्वत्पादानुग्रहान्मम ॥
निसर्गगुणासंसर्गवशीकृतमहीभुजा ।
त्वया सनाथा पृथिवी जिष्णुनेवामरावती ॥
सदा धर्मश्चतुष्पादस्त्वयि शासति मेदिनीम् ॥
अष्टादशद्वीपवती क्षितिरेकगृहोपमा ॥
-स्कन्दपुराणे उत्कलखण्डे -११/१२६-१२८, १३० ।

(ग) सत्यं त्वं सार्वभौमोऽसि क्षेत्रं विष्णोर्वपुस्त्विदम् ॥
-स्कन्दपुराणे उत्कलखण्डे - १४/९ ।

(घ) भवानपि हरेर्भक्त सार्वभौमो महीपतिः ॥
साम्प्रतं हि भवानत्र पृथिव्यामेकपार्थिवः ॥
-तत्रैव- २६/२९-३० ।

८६६. ततो विश्वावसुर्नाम शवरः पलिताङ्ककः ॥
अवसाय हरेः पूजां पूजाशेषोपशोभित ॥
-स्कन्दपुराणे उत्कलखण्डे- ७/८५-८६ ।

८६७. ददर्श शवरागारैर्वेष्टितं परितोद्विजाः ।
क्षेत्रस्य दीपसंस्थानं ख्यातं शवरदीपकम् ॥
-तत्रैव- ७/८३ ।

८६८. It can, therefore, be promised that in the early stages, of the Aryans, Nilamadhab was a deity and that in course of time when the place became densely forested inaccesible to

शङ्का भवति यत् विश्वावसुः शवरः जात्या शूद्रः, वैदिकमन्त्रोच्चारणे तस्या [८६९]नाधिकारात् । किन्तु ईदृशस्य देवस्य पूजोपासनानिमित्तं तादृक् नान्यः कश्चन सुसभ्यः सुशिक्षित द्विजो वा तत्र नासीत् किमु ? सामान्येन येन केनचित् भावेन वैदिकमन्त्रोच्चारणेन वा भवतु अथवा भक्तिनिविष्टचित्तेन वा भवतु जगन्नाथनीलमाधवस्य पूजा सर्वोपरि तस्याः संरक्षणं च कृतम् इति सर्वै स्वीकार्यम् ।

पुरुषोत्तमक्षेत्रं बहुकालात् नारायणक्षेत्रत्वेन प्रसिद्धमासीत् इति [८७०]स्कन्दपुराणं प्रस्तौति । भगवान् नारायण एव मोक्षस्याधिकारि न तु अन्यः । अतः जनानां सायुज्यमुक्तिदानार्थं प्रलयकालेऽपि श्रीक्षेत्रस्य

---

others, the worship of God fell into the hands of the forest dwellers, i.e. the Savaras. But by the time of the Brahma and Skanda Puranas, it once again gained populatity with the Aryans.

-The Land of Vishnu, P-21.

८६९. शवरस्य शूद्रान्तर्गतत्वात् तस्य वैदिकमन्त्रोच्चारणे अधिकारो नास्ति इति प्रतिपादितं स्मृत्यन्तरे यथा 'नहि वेदेष्वधिकारः कश्चिद् शूद्रस्य वर्त्तते' इति।

८७०. (क) स्तत्क्षेत्रपरं चास्य वपुर्भुतं महात्मनः ।
स्वयं वपुष्मांस्तत्रास्ते स्वनाम्ना स्यापितं हि तत् ॥
-स्कन्दपुराणे उत्कलखण्डे- १/९ ।

(ख) अत्र साक्षाद्वपुन्मन्तं नीलेन्द्रमणिमञ्जुलम् ॥
दृष्ट्वा नारायणं देवं मुच्यते कर्मबन्धनात् ॥
--तत्रैव- २/३७-३८ ।

(ग) कस्मिन्देशो द्विजश्रेष्ठ तत्क्षेत्रं पुरुषोत्तमम् ।
यत्र नारायणः साक्षाद्दारुरूपी प्रकाश्यते ॥
-तत्रैव- ६/१ ।

(घ) तस्य प्राकटमास्थाय नीलेन्द्रमणिनिर्मिता ॥
तनुः श्रीवासुदेवस्य साक्षान्मुक्तिप्रदायिनी ॥
-तत्रैव- ७/२६-२७ ।

(ङ) वपुष्मन्तं जगन्नाथं प्रत्यक्षं ब्रह्मरूपिणाम् ॥
-तत्रैव- २७/७७ ।

नाशः नाभवत् इति स्वयं भगवता विष्णुना [८७१]कथितम् । अत्रत्य कल्पवृक्षोऽपि बहुकालादेव विराजते ।

अतः भगवान् श्रीजगन्नाथदेवो बहुप्राचीनकालादेव मोक्षदानार्थं पुरुषोत्तमक्षेत्रे विराजते इति ।

॥ श्रीश्रीजगन्नाथार्पणमस्तु ॥

***

८७१. पदात्पदाच्छ्रेष्ठतमः क्रमात्परमपावनः ।
सिन्धुतीरे तु यो ब्रह्मन्राजते नीलपर्वतः ॥
पृथिव्यां गोपितं स्थानं तव चापि सुदुर्लभम् ।
सुरासुराणां दुर्ज्ञेयं माययाछादितं मम ॥
सर्वसङ्गपरित्यक्तस्तत्र तिष्ठामि देहभृत् ।
क्षराक्षरावतिक्रम्य वर्त्तेऽहं पुरुषोत्तमे ॥
सृष्ट्या लयेन नाक्रान्तं क्षेत्रं मे पुरुषोत्तमम् ॥
-स्कन्दपुराणे उत्कलखण्डे- १/३४-३७ ।

सहायक ग्रन्थसूची

१. अथर्ववेदः, विश्वेश्वरानंन्दवैदिकशोधसंस्थानम्, होशियारपुर, १९६१
२. कौटल्यार्थशास्त्रः, ओडिशा साहित्य एकाडेमी, भुवनेश्वर, १९६४
३. आपस्तम्बगुह्यसूत्रम्, चौखम्बा संस्कृतसिरीज, वाराणसी, १९६९
४. आश्वलायनगुह्यसूत्रम्, वाराणसी, १९६४
५. ईशावास्योपनिषत्, प्राच्यभारतीप्रकाशनम्, कामच्छा, वाराणसी १९६५
६. ऋग्वेदः, देशिकसंशोधनमण्डलम्, वाराणसी, १९४६
७. ऋग्वेद भाष्यभूमिका, चौखम्बा, वाराणसी
८. कैवल्योपनिषत्, वाराणसी, १९६५
९. कठोपनिषत्, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
१०. गोपथब्राह्मणम्, वाराणसी
११. गौतमधर्मसूत्रम्, चौखम्बासंस्कृतसिरीज, वाराणसी, १९६६
१२. छान्दोग्योपनिषत्, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
१३. तैत्तरीयारण्यकम्, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
१४. तैत्तरीयसंहिता, युधिष्ठिरमीमांसक, जहालगड, हरियाणा
१५. नारायणोपनिषत्, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
१६. निरूक्तभाष्यटीका, यास्काचार्यभाष्यम्, पाणिनी, नईदिल्ली, १९८२
१७. बृहदारण्यकोपनिषत्, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
१८. मनुस्मृतिः, चौखम्बासंस्कृतसंस्थान, वाराणसी, १९८२
१९. मण्डुकोपनिषत्, प्राच्यभारती प्रकाशनम्, वाराणसी, १९६५
२०. याज्ञवल्क्यस्मृतिः, निर्णयसागरप्रेस, १९४९
२१. शतपथब्राह्मणम्, चौखम्बासंस्कृतसिरीज, वाराणसी, १९५०
२२. शुक्लयजुर्वेदः, मोतीलालवनारसीदास, वाराणसी, १९५७
२३. श्वेताश्वेतरोपनिषत्, प्राच्यभारतीप्रकाशनम्, वाराणसी, १९६५
२४. अग्निपुराणम्, चौखम्बासंस्कृतसंस्थान, वाराणसी, १९६६
२५. कालिकापुराणम्, चौखम्बाविद्याभवन, वाराणसी, १९७२
२६. कूर्मपुराणम्, काशीराजट्रस्ट, वाराणसी, १९७२

२७. गरुडपुराणम्, चौखम्बासंस्कृतसंस्थान, वाराणसी, १९६४
२८. नारदपुराणम्, क्षेमराजकृष्णदास, मुम्बई
२९. नीलाद्रिमहोदय, धर्मग्रन्थस्टोर, कटक, १९८३
३०. पद्मपुराणम्, गुरुमण्डलग्रन्थमाला, कलिकता, १९५८
३१. पुरुषोत्तमतत्त्वम्, एसिआटिक् सोसाइटि, कलिकत्ता
३२. पुरुषोत्तमक्षेत्रमाहात्म्यम्, क्षेमराजकृष्णदास, मुम्बई, १९०९
३३. वामनपुराणम्, काशीराजट्रस्ट, वाराणसी, १९८१
३४. वामनपुराणम्, कल्याणविशेषाङ्क, गीताप्रेस, गोरखपुर
३५. वायुपुराणम्, वाराणसी, १९५१
३६. विष्णुपुराणम्, गीताप्रेस, गोरखपुर
३७. विष्णुधर्मोत्तरपुराणम्, ओरियण्टाल इनिस्टीच्युट्, वरोदा, १९५८
३८. ब्रह्मपुराणम्, हिन्दी साहित्य सम्मेलन, वाराणसी, १९७५
३९. ब्रह्मवैवर्त्तपुराणम्, क्षेमराजकृष्णदास, मुम्बई
४०. ब्रह्माण्डपुराणम्, मोतिलाल वनारसीदास, वाराणसी, १९६३
४१. भविष्यपुराणम्, क्षेमराजकृष्णदास, मुम्बई, १९५६
४२. भागवतपुराणम्, गीताप्रेस, गोरखपुर
४३. मत्स्यपुराणम्, आनन्दाश्रमग्रन्थमाला, पुना, १९८१
४४. महाभारतम्, पुना, महाराष्ट्र, १९७२-७६
४५. महाभारतम्, गीताप्रेस, गोरखपुर
४६. मार्कण्डेयपुराणम्, नागपब्लिशर्स, दिल्ली, १९८१
४७. योगवाशिष्ठ रामायणम्, मुशीराम मनोहरलाल, दिल्ली, १९८१
४८. लिङ्गपुराणम्, मोतिलालबनारसीदास, वाराणसी, १९८०
४९. रामायणम्, वरोदा, १९७५
५०. रामायणम्, गीताप्रेस, गोरखपुर
५१. श्रीमद्देवीभागवतपुराणम्, ठाकुरदास एण्ड सन्स, वाराणसी
५२. शिवपुराणम्, नागपब्लिसर्स, दिल्ली, १९८१
५३. श्रीमद्भगवद्गीता, गीताप्रेस, गोरखपुर
५४. हरिवंश, पुना, १९७५
५५. कुलार्णवतन्त्रम्, कलिकता
५६. ज्ञानसिद्धिः, इन्द्रभूति
५७. महानिर्वाणतन्त्रम्, मोतिलालवनारसीदास, वाराणसी, १९७७
५८. रुद्रयामलतन्त्रम्, संपूर्णानन्दसंस्कृतविश्वविद्यालय, वाराणसी, १९८०

५९. लक्ष्मीतन्त्रम्, वाराणसी, १९७९
६०. शक्तिसङ्गमतन्त्रम्, बरोदा, १९७८
६१. अनर्घराघवम्, श्रीमुरारीमिश्रः, वाराणसी
६२. अभिनवगीतगोविन्दम्, कविवरदिवाकररायः, ओडिशा साहित्य एकाडेमी, भुवनेश्वर
६३. गङ्गवंशानुचरितचम्पूः, वासुदेवरथसोमयाजी, ओडिशा साहित्य एकाडेमी, भुवनेश्वर
६४. गीतगोविन्दम्, जयदेवः, चौखम्बासुरभारतीप्रकाशनम्, वाराणसी, १९७२
६५. चैतन्यचन्द्रोदयनाटकम्, कविकर्णपूर
६६. प्रबोधचन्द्रोदयनाटकम्, कृष्णमिश्रः, चौखम्बाविद्याभवन, वाराणसी, १९५५
६७. नैषधमहाकाव्यम्, श्रीहर्षः, निर्णयसागरप्रेस, १९१९
६८. मालतीमाधवनाटकम्, भवभूतिः, चौखम्बा विद्याभवन, वाराणसी, १९७१
६९. रघुवंशमहाकाव्यम्, कालिदासः, चौखम्बासिरीज, वाराणसी
७०. चकडापोथि
७१. मुकुन्दविलासम्, रघुत्तमतीर्थ
७३. वसन्तोत्सवमहाकाव्यम्
७४. श्रीकृष्णभक्तवात्सल्यचरितम्, गजपतिरामचन्द्रदेवः
७५. अष्टाध्यायी- पाणिनी
७६. पुराणविमर्श- बलदेवउपाध्याय, चौखम्बाविद्याभवन, वाराणसी, १९७८
७७. पुराणपर्यालोचनम्- डॉ० कृष्णमणित्रिपाठी, चौखम्बासुरभारती प्रकाशनम्, वाराणसी १९७५
७८. भारतस्य सांस्कृतिकनिधिः, रामजीउपाध्याय, भारतीयविद्या प्रकाशन, वाराणसी
७९. वैदिकदेवता उद्भव और विकाश, डॉ० गयाचरणत्रिपाठी, आलाहाबाद
८०. सिद्धान्तदर्पण, सामन्तचन्द्रशेखर, धर्मग्रन्थस्टोर, कटक
८१. संक्षिप्तशङ्करदिग्विजयः
८२. स्तोत्ररत्नाकर, गीताप्रेस, गोरखपुर

८३. सांख्यकारिका, चौखम्बा ओरियण्टालिया, वाराणसी, १९७६
८४. अमरकोशः- चौखम्बासंस्कृतसंस्थान, वाराणसी, १९८२
८५. अभिधानराजेन्द्रः, जैनप्रभाकर यन्त्रालय, रतलाम, १९३४
८६. नानार्थरत्नमालाकोशः, वाराणसी
८७. हेमचन्द्रकोश, एस्.एन्. पब्लिकेशन्, दिल्ली, १९८१
८८. त्रिकाण्डशेष, पुरुषोत्तमदेव, क्षेमराजकृष्णदास, मुम्बई
८९. ओडिशार इतिहास, हरेकृष्णमहताव, कटक स्टुडेण्टस् स्टोर, कटक
९०. उत्कलर इतिहास, पण्डित कृपासिन्धु दास
९१. ओडिआ साहित्यर इतिहास, डॉ० मायाधर मानसिंह
९२. ओडिआ साहित्यर इतिहास, डॉ० वंशीधरमहान्ति, फ्रेण्डस् पब्लिशर्स, कटक, १९७८
९३. ओडिआ साहित्यर इतिहास, पण्डित सूर्यनारायण दास
९४. ओडिआ साहित्यर इतिहास, नवीन कुमार साहु
९५. ओडिशारे वैष्णवधर्म, डॉ० काह्नुचरणमिश्र, ओडिशा साहित्य एकाडेमी, भुवनेश्वर, १९८३ ।
९६. उड्रदेश राजवंशावली ओ राजभोग इतिहास, डॉ० काह्नुचरणमिश्र, ओडिशा साहित्य एकाडेमी, भुवनेश्वर, १९८३ ।
९७. ओडिशारे आदिवासी संस्कृति, केदारनाथमहापात्र, ओडिशा साहित्य एकाडेमी, भुवनेश्वर ।
९८. ओडिशारे जैनधर्म, लक्ष्मीनारायण साहु, मनमोहन प्रेस, कटक, १९५८ ।
९९. ओडिआ साहित्यर क्रमपरिणाम, पं० नीलकण्ठ दाश, नीलकण्ठग्रन्थावली, कटक स्टुडेण्टस्टोर, १९६७ ।
१००. जगन्नाथमन्दिर ओ जगन्नाथतत्त्व, पं० सूर्यनारायणदास, कटक स्टुडेण्टस्टोर, कटक ।
१०१. जगन्नाथचेतनार उद्भव ओ विकाश, डॉ० वासुदेव साहु, भुवनेश्वर, १९८१ ।
१०२. जगन्नाथचरितामृतम्, दिवाकरदास, बडओडिआमठ, पुरी, १९६३
१०३. कोटिब्रह्माण्डसुन्दरी, उपेन्द्रभञ्ज, धर्मग्रन्थस्टोर, कटक ।
१०४. खुरुधार इतिहास, केदारनाथमहापात्र
१०५. चन्द्रभागा, राधानाथ राय, राधानाथग्रन्थावली, कटक ट्रेडिं कम्पानी, कटक, १९६९ ।

१०६.दारुदेवता, डॉ० वेणीमाधवपाढी, कटक स्टुडेण्टस्टोर, १९७५ ।
१०७.प्राचीन उत्कल, जगबन्धुसिंह, ओडिशा साहित्य एकाडेमी, भुवनेश्वर, १९८१ ।
१०८.प्राचीन गद्यपद्यादर्श, प्राचीसमिति, कटक
१०९.बन्दीर आत्मकथा, पं० गोपबन्धुदाश, कटक, १९८१ ।
११०.प्रेमभक्तिगीता, यशोवन्तदास
१११.मन्मथचन्द्रिका / शून्यसंहिता, अच्युतानन्ददास
११२.सारलामहाभारत, सारलादाश, कटक
११३.विष्णुकेशरीपुराण, दिवाकरदास ।
११४.राधारसामृतगीता, शिवदास ।
११५.भुवनेश्वर शिलालेख, परमानन्दआचार्य, ओडिशा साहित्य एकाडेमी, भुवनेश्वर, १९६९ ।
११६.श्रीजगन्नाथ, डॉ० वंशीधरमहान्ति, कटक ।
११७.संस्कृत ओ संस्कृति, पं० नीलकण्ठदाश, कटकस्टुडेन्टस् स्टोर, कटक, १९७२ ।
११८.शंङ्कराचार्यग्रन्थावली, कटक ।
११९.मादलापाञ्जि, प्राचीसमिति, उत्कलविश्वविद्यालय, भुवनेश्वर ।
१२०.कोणार्क- जगन्नाथसंस्कृतिविशेषाङ्क, ओडिशा साहित्य एकाडेमी, भुवनेश्वर, १९७७ ।
१२१.उत्कलप्रसङ्ग- ओडिशा सरकार, भुवनेश्वर, १९७१,१९८०,१९८४
१२२.पौरुष- १४, १५ संख्या, कटक, १९८१ ।
१२३.भञ्जप्रदीप, १३४२ साल ।
१२४.झङ्कार- १९८० अक्टोवर, कटक ।
१२५.मातृभूमि- पूजाविशेषाङ्क, कटक, १९६० ।
१२६. श्रीमन्दिर- श्रीजगन्नाथमन्दिरपरिचालना समिति, पुरी ।
127. Antiquities of Orissa, Vol.-II, Rajendralal Mitra
128. The Ancient Indian Historical Tradition, A.E. Pargiter
129. A Descriptive Catalogue of Sanskrit Manuscripts: Kedarnath Mohapatra, Sahitya Academy, Bhubaneswar, 1958-60
130. Castes and Tribes in Southern India : Thurston
131. The Cult of Jagannath : Dr. K.C. Mishra, Calcutta, 1971
132. The Cult of Jagannath & Regional Tradition in Orissa : Kulke, Tripathy, Eschmann, Manohar Publication : New-Delhi, 1978.

133. The Comparative Essays : R.G. Bhandarkar
134. Development of Hindu Iconography : Dr. J. N. Banarjee, Calcutta
135. Early History of the Vaishnab Sect Dr. R.C. Ray Choudhury.
136. Glimpses of Indian Culture : K.V. Soudrarajan, Sunfeep Prakashan, New-Delhi, 1981
137. The History of Orissa : K.C. Panigrahi, Kitab Mahal, Cuttack, 1981
138. The History of Orissa : R.D. Banerjee, Calcutta, 1930
139. The History of Orissa : H.K. Mahatab, Cuttack Students Store, 3rd. Edn, 1891
140. The History of Orissa : Dr. N.K. Sahoo, Cuttack
141. The History of Dharmasastra : P.V. Kane, B.O.R.I., Poona, II Edn. 1973.
142. Hindusim : Nirad C. Choudhury, New-Delhi, 1981.
143. Historical Geography and Dynastic History of Orissa : D. K. Ganguly, Puthi Pustak, Calcutta, 1975.
144. Hindu Methology : W. J. Wilkins.
145. The Heart of Jainism : Mrs. Stevenson.
146. The History of Medieval Vaishnavism in Orissa : Prabhat Mukherjee, Calcutta, 1940
147. The History and Culture of Indian People : R.C.Majumdar
148. The History of Ganga : Dr. S. N. Rajguru, Orissa Shitya Acadmy, Bhubaneswar.
149. The Indian Empire : Sir H. H. Hunte.
150. The Indian Architecture : Ferguson
151. The Indian Historical Quarterly
152. The Indian Antiqury
153. Inscription of Orissa : Dr. S. N. Rajguru, Orissa Sahiya Academy, Bhubaneswar.
154. Indian Culture : Edited : Bimal Charan Law, Calcutta 1948-49
155. The Jagannath Temple : M.M. Pt. Sadasiva Mishra, Calcutta.
156. The Jagannath Temple in Eastern India : Kedarnath Mohapatra, Bhubaneswar, 1977.
157. The Land of Vishnu : Dr. Gopinath Mohapatra B.R. Publishing Corporation, Delhi, 1979
158. Mysticism in the Temple of Jagannath, Puri, Orissa Servus Servorum.

159. New Aspects- History of Orissa : Sambalpur University
160. Modern Buddism in Orissa : Nagendranath Basu.
161. Orissa and Her Remains : M.M. Ganguly
162. Our Culture : C. Rajagopalachari, Bharatiya Vidya Bhavan, Bombay, 1974
163. Prachi Valley (Orissa State Archaeological Survey Report) Bhubaneswar, 1975.
164. Proceedings of the first International Samskrit Conference, 1981, R.Sk.S., New-Delhi.
165. Rg. Veds- Bhasyabhumiks- Dayananda Saswati, Meharchand Laxmandas, 1st Edn. New-Delhi, 1981.
166. The Study of Markandeya Purana : A. E. Pargiter.
167. Studies in Skanda Puran A.B. Avasti, Kailash Prakashan, Lucknow, 1976
168. Studies in Puranic Records on Hindurites and Customs : Prof. R.C. Hazra, University of Dacca, 1940
169. Vedic Reader : Macdonell
170. The Unknown Life of Jesus Christ : Nikolash Natovich
171. Geographical Date in the Early Puranas : Dr. M.R. Gupta, Punthi Pustak, Calcutta, 1972.
172. O.H.R.J.- Orissa Historical Research Journal, Bhubaneswar
173. J.B.A.S.- Journal of Bengal Asiatic Society, Calcutta
174. J.A.S.B.- Journal of Asiatic Society of Bengal, Calcutta
175. Epigraphica Indica- Calcutta.
176. Encyclopaedua Britanica : Published- University of Chicago, 15th Edition, 1973-1974

****

THE AUTHOR

Dr. Kanhu Charan Panda, S/o. Late Krushna Charan Panda was born on 30. 04. 1957 at the Village of Karadapalli, Subdivision- Banki in the District of Cuttack, Odisha. He was educated in the traditional line upto Acharya and Sikshashastri under Rashtriya Sanskrit Sansthan, New Delhi and Vidyavaridhi (Ph.D.) under Sri Jagannath Sanskrit Vishvavidyalaya, Puri, Odisha.

Dr. Panda is presently serving in the Department of Puranetihas at Ramadhina Sanskrit Collage, Brahmapur, Dist.- Ganjam, Odisha.

ISBN 978-81-921079-0-5